

श्रीपराशरभट्टार्यैः प्रणीतस्य

श्रीरङ्गराजस्तवस्य समीक्षणम्

ŚRĪ PARĀŚARA BHAṬṬA'S ŚRĪRAṄGARĀJASTAVA

- A COMPREHENSIVE STUDY

Dr. MARIMGANTI TIRUMAZISAI ALWAR M.A.; Ph.D.

LECTURER IN SANSKRIT, A.P.R.JR. College

NAGARJUNA SAGAR.

GUNTUR Dt. (A.P.)

ŚRĪ BHAKTISĀRA PUBLICATIONS

Nagarjuna Sagar

2000

श्रीपराशरभट्टार्यैः प्रणीतस्य
श्रीरङ्गराजस्तवस्य समीक्षणम्
(प्रथमो भागः)

रचयिता
साहित्यशिरोमणिः, शिक्षाशास्त्री
Dr. मरिङ्गण्टि तिरुमडिशै आळ्वार् M.A. Ph. D.
संस्कृतोपन्यासकः,
A.P.R. Jr. College, Nagarjunasagar
Guntur Dt., A.P.

श्रीभक्तिसारप्रकाशनम्
नागार्जुनसागर
2000

श्रीपराशरभट्टार्यैः प्रणीतस्य श्रीरङ्गराजस्तवस्य समीक्षणम्
प्रथममुद्रणम् - २०००
1000 copies
Price : Rs. 150

This Book is published with the Financial Assistance of Tirumala Tirupati Devasthanams, under their scheme "Aid to the Authors for Religious books."

Published by :
Dr. M.T. ALWAR, M.A.; Ph. D.
Jr. Lecturer, A.P.R. Jr. College,
NAGARJUNASAGAR
Guntur Dt., A.P.
Ph : 08642 - 78296

Typesetting :
SUDARSAN GRAPHICS
TIRUPATI. Ph: 39701

MANGALASASANAM

SRIMANNARAYANA RAMANUJA YATIBHO NAMAH

TRIDANDI CHINNA SRIMANNARAYANA
RAMANUJA JEEAR SWAMI
JEEAR EDUCATION AL TRUST,
SITANAGARAM - 522 501,
GUNTUR DISTRICT,
PHONE : 426929

శ్రీమతే రామానుజాయ నమః

ప్రియ శ్రీమాన్ M. T. ఆళ్వార్ జీ !

శ్రీమతే నారాయణాయ నమః

అనేకమంగళాశాసనములు

మీ లేఖ చేరినది. అక్కడి కార్యక్రమములు నవనవోన్మేషముగ అభివృద్ధిదిశలో సాగడం ఆనందాన్ని ఇస్తోంది. విషయాలు ఎప్పటికప్పుడు చక్కగా తెలుస్తున్నాయి. వర్ధతామ్.

మీసిద్ధాంతవ్యాసము శ్రీపరాశరభట్టార్యకృత శ్రీరంగరాజ స్తవస్య సమీక్షాత్మకమ్ అధ్యయనమ్ పూర్తి అయి ఉంటుందని భావిస్తున్నాము. మరిన్ని ఇట్లాంటి సత్సంప్రదాయపరిరక్షణాత్మక స్తోత్రాదులను మీకు వెలికి అందించే శక్తి ఆచార్యశ్రీచరణులు అనుగ్రహించు గాక!

సం ||

చిన్న శ్రీమన్నారాయణ రామానుజ జీయర్

11-3-1997

शुभाशसनम्

उ. वे. श्रीमान् मरिङ्गण्टि श्रीनिवासाचार्यः
सहायकार्यदर्शी,
श्रीविशिष्टाद्वैतसिद्धान्तप्रवर्तकसङ्घः,
मचिलीपट्टणम् । (आ.प्र)

आयुष्मान् तिरुमडिशै आळ्वार् नामा मत्तनूजः तिरुमलशैलेषु विद्यामभ्यस्य पूर्वाचार्याणां परमानुग्रहेण श्रियःपतेः करुणाकटाक्षेण च श्रीपराशरभट्टार्यैः प्रणीतस्य श्रीरङ्गराजस्तवस्य समीक्षारूपग्रन्थं श्रीवेङ्कटेश्वर-चरणाविन्दयोः समर्पयतीति मोमुद्यते नश्चेतः ।

श्रीरङ्गनाथस्य सप्तप्राकाराः यथाविराजन्ते तद्वदत्रापि सप्तप्राकारनिर्माणेन ग्रन्थरचनं शोभावहमेव । द्वयमन्त्रस्य विवरणाय द्राविडग्रन्थानां परिशीलनं पूर्वाचार्याणां श्रीसूक्तिविवरणं ग्रन्थकर्तुः श्रीवैष्णवसम्प्रदायनिष्ठां प्रकाशयति । आधुनिके काले श्रीवैष्णव-सम्प्रदायजिज्ञासूनां महते उपकाराय ग्रन्थोऽयं प्रकल्पत इति विश्वसिमि । दिव्यसूरिबृन्दसमेतः श्रीश्रीनिवासः सम्प्रदायग्रन्थ-रचनाकैङ्कर्ये चिरञ्जीविनमिममनुगृह्णात्विति पल्लाण्डु पल्लाण्डु इति चाशासे ।

इत्थम्,
म. श्रीनिवासाचार्यः ।

९-९-१९९९
मचिलीपट्टणम् ।

विषयानुक्रमणिका

	पुटसङ्ख्या
मङ्गळाशासनम्	iii
शुभाशंसनम्	iv
विषयसूचिका	v
कृतज्ञतानिवेदनम्	xiv
प्रास्ताविकं किञ्चित्	xvi

प्रथमः प्राकारः

१. भूमिका - विज्ञप्तिः	१
२. उपक्रमः	५
३. श्रीपराशरभट्टार्याणां जन्मप्रकारः	७
४. श्रीपराशरभट्टार्याणां बाल्योदन्तः	१४
५. श्रीपराशरभट्टार्याणां विवाहोदान्तः	२२
६. तीर्थवासिपरिचयः	२४
७. यदुशैलसन्दर्शनम्	२८
८. श्रीपराशरार्यैः वेदान्तिनः सकाशे वादभिक्षायाचनम्	३०
९. श्रीपराशरभट्टार्यैः वेदान्तिने नञ्जीयरिति नामानुग्रहणम्	३५
१०. नञ्जीयर्महाशयानां परिप्रश्नः	३७
११. नञ्जीयर्महाशयानां धर्मसूक्ष्मता	३७
१२. नञ्जीयर्महाशयानां गुरुभक्तिः	३८
१३. श्रीपराशरार्येभ्यः किरातजनसपर्या	३८
१४. श्रीपराशरभट्टार्यैः श्रीरङ्गक्षेत्रविसर्जनम्	४०
१५. श्रीपराशरार्याणां श्रीरङ्गविरहावस्था	४१
१६. श्रीपराशरभट्टार्यैः श्रीरङ्गक्षेत्रे श्रीवैष्णवदर्शननिर्वाहः	४२

१७. श्रीपरशरभट्टार्याणां श्रीसूक्तयः ४३
१८. श्रीपराशरार्यैः वीरशिखामणेः पल्लवरायस्योपदेशः ४५
१९. श्रीभट्टार्याणां (तिरुवाराधनम्) देवपूजाक्रमः ४६
२०. श्रीपराशरार्याणामाराधनपद्धतिः ४७
२१. भक्तजनसमाधानम् ४८
२२. श्रीपराशरभट्टार्याणां जनन्याः भागवतनिष्ठा ४९
२३. श्रीशैलानन्तार्यसन्निधिं प्रति भट्टार्यैः शिष्यप्रेषणम् ५०
२४. श्रीपराशरभट्टार्याणां वात्सल्यम् ५१
२५. श्रीपराशरार्यसन्निधौ शिरियाच्चान्विषयः ५२
२६. श्रीपराशरार्याणां कैङ्कर्यनिष्ठा ५३
२७. श्रीपराशरभट्टार्यैः प्रदर्शितं विजयचिह्नं श्वेतातपत्रम् ५४
२८. श्रीपराशरार्याणां कैशिकपुराणपठनम् ५५
२९. श्रीपराशरभट्टार्यान् प्रति श्रीरङ्गनाथोक्तिः ५६
३०. श्रीपराशरार्यविषये भागवतजनविलापः ५७
३१. श्रीरङ्गनाथेन ब्रह्मरथप्रेषणम् ५९
३२. श्रीरङ्गनाथदेवस्य दिव्याज्ञा ६१
३३. श्रीरङ्गनाथेन श्रीवेदव्यासभट्टारकेभ्यः ब्रह्मरथानुग्रहणम् ६३
३४. चतुस्सप्ततिसिंहासनेषु भट्टार्याणां स्थानम् ६५

द्वितीयः प्राकारः

१. श्रीपराशरभट्टार्याणां कृतिपरिचयः ६७
२. अष्टश्लोकी - विषयपरिशीलनम् ७१
३. क्रियादीपः ८१
४. भगवद्गुणदर्पणम् - (श्रीविष्णुसहस्रनामस्तोत्रभाष्यम्) ८२
५. श्रीविष्णुसहस्रनाम्नां व्याख्यापद्धतिः ८६
६. श्रीविष्णुसहस्रनामस्तोत्रभाष्योपवर्णितविशेषविषयसूची ८८
७. श्रीगुणरत्नकोशः ९३
८. श्रीरङ्गनाथस्तोत्रम् ९८

९. श्रीरङ्गराजस्तवः - पूर्वशतकविशेषाः १०२
१०. श्रीरङ्गराजस्तवः - उत्तरशतकविशेषाः १०४
११. श्रीपराशरभट्टार्याणामनुपलब्धाः कृतयः १०५
१२. अध्यात्मखण्डद्वयविवरणम् १०५
१३. तत्त्वरत्नाकरः १०६
१४. लक्ष्मीकल्याणम् १०६
१५. सुबालोपनिषद्व्याख्या १०७
१६. संस्कृते मुक्तकाः १०८

तृतीयः प्राकारः

१. वेदस्वरूपम् ११०
२. वेदवेद्यः नारायणः ११४
३. द्रविडवेदस्वरूपम् - श्रीमन्नारायणः ११८
४. द्रविडवेदविभागः १२२
५. श्रीभट्टार्यैः दिव्यसूरिविषये रचितश्लोकः(प्रार्थनारूपः)१२३
६. द्रविडवेदसारः १२५
७. विशिष्टाद्वैतसिद्धान्तस्वरूपम् १२५
८. विशिष्टाद्वैतसिद्धान्तप्रवर्तकाः - भगवद्रामानुजाचार्यमुनयः १२७
९. तत्त्वत्रयम् १३०
१०. चित्तत्त्वम् १३१
११. अचित्तत्त्वम् १३२
१२. त्रिगुणम् १३२
१३. कालः १३३
१४. शुद्धसत्त्वम् १३३
१५. ईश्वरतत्त्वम् १३३
१६. हितस्वरूपम् - परमात्मा १३४
१७. प्रपत्तिः १३४
१८. शठारेः प्रपत्तिः १३७

१९. श्रीवैष्णवस्तोत्राणि १४१
२०. श्रीरङ्गराजस्तवः १४१

चतुर्थः प्राकारः

१. श्रीरङ्गक्षेत्रम् - १४३
२. पुराणेषु श्रीरङ्गमहाक्षेत्रम् - १४५
३. दिव्यसूरिचरिते श्रीरङ्गनाथवैभवम् - १४६
४. स्कन्दपुराणोक्तदिशा श्रीरङ्गमहिमा- १५३
५. विश्वगुणादर्शे श्रीरङ्गक्षेत्रवर्णनम्- १५४
६. श्रीरङ्गम् - पेरियाळ्वार् १५५
७. श्रीरङ्गम् - तोण्डरडिप्पोडियाळ्वार् १५६
८. श्रीरङ्गविषयप्रस्तावे कुलशेखरसूरिणां प्रस्तावः १५९
९. मुनिवाहनसूरिणां श्रीरङ्गानुभवः १६१
१०. श्रीरङ्गराजस्तवे परिकीर्तिताः परकालदिव्यसूरयः १६१
११. सप्तप्राकारनिर्माणे व्ययीकृतः कालः १६३
१२. प्रथमदिव्यसूरित्रयम् - श्रीरङ्गक्षेत्रम् १६६
१३. भक्तिसारयोगिनः श्रीरङ्गानुभवः १६८
१४. श्रीशठारेः श्रीरङ्गानुभवः १७४
१५. गोदादेव्याः श्रीरङ्गानुभवः १७९
१६. श्रीमद्यामुनमुनेः श्रीरङ्गानुभवः (९५३A.D.) १८३
१७. भगवद्रामानुजाचार्याणां श्रीरङ्गानुभवः - १८८
१८. श्रीपराशरार्याणां श्रीरङ्गानुभवः - १९८
१९. श्रीमद्वेदान्तदेशिकानां श्रीरङ्गानुभवः - २०२



श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ॥

ॐ अस्मद्गुरुभ्यो नमः।

श्रीश्रीनिवासगुरुमन्वहमाश्रयामि।

(माता-पितरौ)

प्रथमः प्राकारः

सप्तप्राकारमध्ये सरसिजमुकुलोद्भासमाने विमाने
कावेरीमध्यदेशे मृदुतफह्मफणिराट् भोगपर्यङ्कभागे।
निद्रामुद्राभिरामं कटिनिकटशिरः पार्श्वविन्यस्त हस्तं
पद्माधात्रीकराभ्यां परिचित चरणं रङ्गराजं भजेऽहम्।

श्रीमते रामानुजाय नमः ।

" श्रीपराशरभट्टैः प्रणीतस्य श्रीरङ्गराजस्तवस्य समीक्षात्मकम् अध्ययनम् "

भूमिका -- विज्ञप्तिः -

श्रीवेङ्कटाचलाधीशस्य निर्हेतुकदयाविशेषमहिमानं को नाम ज्ञातुमीष्टे। अणुं ब्रह्माण्डं, ब्रह्माण्डं चाणुं, मूकं वाचालं, वाचालं मूकं यथेच्छं कर्तुं समर्थः खलु। यदाहं बाल्ये तिरुमलशैलेषु वेदपाठशालायां छात्रत्वेनासं तस्मिन्नेव समये मदीयं कुलधनं श्रीनिवासं भगवद्रामानुज-ग्रन्थपठनयोग्यतां देहीति वारं वारमयाचम्। स च कल्पद्रुमः किमर्थं मामुपेक्षतीति भगवति काप्यतृप्तिरपि मे सञ्जाता। गच्छति काले जीवनक्षेत्रे तस्यैव प्रसादात् प्रभुत्वकळाशालायां संस्कृताध्यापनवृत्तिः उपलब्धा। उद्योगक्षेत्रेऽवकाशाभावात् सहजसिद्धालसत्वाच्च विशिष्टा-द्वैतग्रन्थावलोकनभाग्यविरहो मे सञ्जातः। तूष्णीमासम् । कालो गच्छत्येव। गच्छति काले गते वर्षे श्रीतिप्पाभट्लरामकृष्णमहोदयानां सूचनानुसारेण साहित्यविषये शोधः करणीयः इति सङ्कल्पः उदियाय। तिरुपतिक्षेत्रमागच्छम् । साहित्यविभागे शोधकर्मण्यभिरक्तोऽहं श्रीनिवासस्य दयाविशेषात् विशिष्टाद्वैतविभागे शोधकर्म कर्तुमवकाश-मुपालभम्। तत्रैव राष्ट्रियसंस्कृतविद्यापीठे विशिष्टाद्वैतविभागाध्यक्षाणां श्रीमतां वात्सल्यगुणवतां तट्टाविजयराघवाचार्यवर्याणां परिचयभाग्यं भगवता प्रसादितम्। तेषां सौजन्येन विशिष्टाद्वैतविभागे श्रीपराशर-भट्टार्याणां श्रीरङ्गराजस्तवस्य समीक्षात्मकमध्ययनं शोधविषयत्वेन स्वीकर्तुं विद्यापीठकुलपतिभिः अधिकारिभिः अभ्युपगमो मे उपलब्धः। आश्चर्यावहः श्रीनिवाससङ्कल्पः। कुत्र वा पराशरभट्टार्याः? क्व चाहं? शोधकर्म मे कथं सञ्जातं स्यात्? भीतिः, आशा, जिज्ञासा, सन्तोषः, स्वरूपलाभश्च एकदैव मयि उपलब्धाः। श्रीनिवास एव मम

संकल्पः, स एव मार्गनिर्देशकः, स एव कर्म कारयतीति महाविश्वासः मयि प्रादुरासीत्। झटिति प्रभाववतां पुंभावसरस्वतीनां श्रीवेङ्कटाचल-पादसेवारसिकानां श्रीवेङ्कटाचलप्राच्यकळाशालायां कृतसाहित्य-विभागाध्यक्षाणां श्रीमतां N. C. V. नरसिंहाचार्याणां शरणमयाशिषम्। ते च श्रुत्वा मदीयं साहसं, नितरां संतुष्टाः, तात! श्रीनिवाससंकल्पः तथा जागर्ति। स एव तुभ्यं सर्वं प्रसादयति। धैर्येण जागरूकतया च शोधकर्मणि निमग्नो भवेति मङ्गळाशासनमनुगृहीतवन्तः। अहो आचार्याणां वात्सल्यम्।।

तेभ्य इदप्रथमतया तेषां पत्राणि श्रीपराशरभट्टार्य-महिमदर्पणप्रकाशकानि स्वीकृतवान्। तानि च पत्राणि मम शोधकर्मणि सर्वत्र मार्गदर्शकानि सञ्जातानीति तेषां दयाभावे मदीयं शोधकर्म एव नास्ति इति वचनं न सत्यदूरम्।।

शोधसामग्री कथं सम्पादनीया? केषां सविधे के के ग्रन्थाः सम्पादनीयाः? श्रीपराशरभट्टार्यजीवितविशेषाः कुत्र वा उपलभ्यन्ते? संस्कृततेलुगुद्रमिडआङ्ग्लभाषासु कैः कैः विरचिताः? इत्यमुं विषयं ज्ञातुमनेकान् आचार्यपुरुषान् तत्तद्दिव्यदेशेषु मिलितवान्। आन्ध्रप्रदेशे श्रीरामानुजकीर्तिकौमुदीनाम्ना श्रीवैष्णवार्षधर्मप्रचारकाः श्रीमन्तः धनकुधरं वरदाचार्याः श्रीरङ्गराजस्तवस्य प्रतिपदार्थतात्पर्ययुक्तं ग्रन्थप्रतिकृतिम् अनुगृहीतवन्तः । व्याख्यानग्रन्थाय बहुषु स्थलेषु विकल्पप्रयत्नः ग्रन्थानामनुपलब्धिं वीक्ष्य निराशाविद्धबुद्धिरभवम् । अत्रान्तरे मदीयपितृपादाः निरन्तरशठकोपवाक्सुधैकप्राणाः मामाशीर्भिरेधयन्तः पूर्वाचार्यश्रीसूक्तीः श्रीशठकोपमहामुनेः दिव्यप्रबन्धसारं चानुगृहीतवन्तः कदाचित् स्वामीदेवानन्दमहाराजानां षष्ठिपूर्त्युत्सवकार्यनिर्वहणाय विशाखपट्टणस्य नातिदूरस्थितां कोत्तपेन्टनामपल्लीं गच्छन् मार्गे स्थितं श्रीसिंहाचलेश्वरस्य महाक्षेत्रं सेवितवान् । तत्रोभयवेदान्तिनः श्रीमन्तः शान्तलूरि गोपालकृष्णमाचार्याः मदीयां बाधां श्रुत्वा निर्हेतुकतया

श्रीरङ्गराजस्तवव्याख्यापुस्तकम् अनुगृहीतवन्तः। आश्चर्यम् अप्रयत्नेनानायासेन ग्रन्थोऽयमुपलब्धः। तदनु श्रीरङ्गात् मदीयश्रेयोभिलाषिणः पुत्रः श्रीरङ्गे अध्ययनसौभाग्यमुपगतः सौमित्रिनामकः श्रीपराशरभट्टार्याणां जीवनविशेषपरिशीलनोपयुक्तानि पत्राणि श्रीरङ्गक्षेत्रचरित्राधारयुतानि प्रेषितवान्। तदानीं मे कापि भावना समागता। श्रीरङ्गनाथः सप्तप्राकारमध्यगः खलु, तथैव श्रीरङ्गराजस्तवस्य शोधकर्मणि सप्तप्राकाराः यदि आरचयामः, तदा शोभावह इति मत्वा शोधकर्मणि सप्तप्राकारनिर्माणाय महान्तं श्रममन्वभवम् । दाक्षिणात्यपण्डिताः महान्तं सहाय्यमकुर्वन्। श्रीश्रीश्रीत्रिदण्डिश्रीमन्नारायणरामानुजचिन्नजीयरस्वामिपादाः मङ्गळाशासनानि प्रेषितवन्तः । तिरुमलतिरुपतिदेवस्थानचिन्नजीयरस्वामिपादाः परमां कृपां मयि प्रादर्शयन् । श्रीमन्तौ उभयवेदान्तप्रवर्तकौ स्वाचार्याज्ञया श्रीवेङ्कटाचलपतेः सन्निधौ दिव्यसूरिप्रबन्धपारायणकैङ्कर्यं कुर्वन्तौ भ्रातरौ T.A. गोपालकृष्णमाचार्यनामकौ महाभागवतौ, श्रीभाष्यम् अप्पलाचार्याः, श्रीमन्तः उभयवेदान्तप्रवर्तकाः के. वरदरामानुजाचार्याः, समुद्राल रङ्गरामानुजाचार्याश्च कृपाकटाक्षाणि वर्षितवन्तः। तदनु सप्तप्राकाररूपेण शोधकर्मगोपुररचनायै महान्तं साहसं क्रियमाणाय मह्यं पुरुषकारं कल्पयेति श्रीपद्मावतीं शरणमभजम्। श्रीरङ्गराजस्य महाप्राकारनिर्माणे चिक्रोडायमानं मां भगवान् श्रीसीतासमेतः श्रीरामचन्द्रः रक्षतु । श्रीरघुकुलधनस्याराध्यदेवः श्रीरङ्गनायकः खलु। अतः हनुमविभीषणादयः मामवश्यमनुगृण्हन्त्विति सर्वान् श्रीरामदासान् शरणमुपैमि।।

अस्मिन् शोधकर्मणि सप्तप्राकाररूपेण सप्ताध्यायाः वर्तन्ते। तत्र -

१. प्रथमप्राकारे श्रीपराशरार्याणां चरित्रम्,

२. द्वितीयप्राकारे श्रीपराशरार्याणां ग्रन्थपरिचयः,

३. तृतीयप्राकारे वेदः, वेदवेद्यः, विशिष्टाद्वैततत्त्वं च,

४.चतुर्थप्राकारे श्रीरङ्गक्षेत्रम्, श्रीरङ्गनाथे दिव्यसूरिणां वैष्णवाचार्याणामनुभवः,

५. पञ्चमप्राकारे श्रीरङ्गराजस्तवपूर्वशतकपरिचयः,

६. षष्ठे प्राकारे श्रीरङ्गराजस्तवस्योत्तरशतकपरिचयः,

७. सप्तमप्राकारे श्रीरङ्गराजस्तवस्य समीक्षात्मकमध्ययनमित्यस्मिन् शोधप्रबन्धे उक्तानां विषयाणां सङ्ग्रहेणोपसंहारः क्रियते ।

एवंप्रकारेण श्रीरङ्गराजगोपुरसदृशस्य श्रीरङ्गराजस्तवस्य सप्तप्राकाराः निर्मीयन्ते। अत्रानेके विषयाः चर्चिताः भवन्ति । पराशरभट्टार्याणां महाप्राभवं वैदुष्यं विशिष्टाद्वैतसिद्धान्ते तेषामनुदानं चात्र अध्येतुं महानवकाशो मे प्राप्तः। दासजनं मां धन्यं कर्तुं बद्धादरान् भगवद्भागवतान् प्रणमन् अध्ययनेऽत्र दोषज्ञापनाय प्रार्थयन् एतत्सर्वं कर्म श्रीरङ्गनाथरूपेण स्वीक्रियमाणाय श्रीश्रीनिवासाय समर्पयामि।

हरिः ओम् तत् सत्।।

श्रीमते रामानुजाय नमः ।

उपक्रमः -

"श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः ।
श्रीवत्साङ्कसुतश्श्रीमान् श्रेयसे मेऽस्तु भूयसे ।।"

श्रियःपतेः भगवतो नारायणस्य चिदचिद्विशिष्टस्य कल्याण-गुणगणकीर्तनमेव यदा निखिलवेदपुराणादिषु प्रतिपादितम्, तद्वत् निखिलवेदवेदान्तपुराणशास्त्रविषयान् अल्पमेधसां जनानामपि ज्ञापनाय अत्यन्तोपकाराय च परमकारुणिकया दयया शास्त्ररूपेणैव ज्ञानिनः तत्त्वदर्शिनः अनुगृहीतवन्तः, ते च स्तोत्रसाहित्ये न केवलं स्तोत्र-रूपशब्दजालपदगुम्फनं कृतवन्तः, अपि तु तत्तच्छास्त्रमर्यादाम् अनुसरन्तः वेदधर्मः, उपनिषद्रहस्यं, श्रीरामायण-महाभारत-भागवतादिग्रन्थविषयाः भगवतः नारायणस्य तत्त्वं सुलभेन मार्गेणाविष्कृतवन्तः। भगवान् महाविष्णुः "स्तव्यः स्तवः प्रियः स्तोत्रं स्तुतिस्स्तोतारणप्रियः"[१] इति तत्र भगवता भीष्मपितामहेनाविष्कृते श्रीविष्णुसहस्रनामस्तोत्रे प्रतिपादितः। अतः सर्वदैव कायेन वाचा मनसा भगवतः स्मरणमेव भागवतजनानां परमः धर्मः इति परमात्मा च भागवतजनप्रियः इति च ज्ञायते।।

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"[२] इति स्वयं कण्ठोक्त्या वेद एव व्यनक्ति। अतः महाभक्ताः तत्वदर्शिनः भागवताः भगवतः दयया स्ववाङ्माधुर्येण कीर्तितवन्तः। अष्टाङ्गयोगसिद्ध-

1 श्रीवि.स.श्लो. ७३
2 तैत्ति.४. आनन्दवल्ली

मानसिकं प्रत्यक्षं तु न सर्वजनसाध्यम्। न वा लौकिककार्यक्षेत्र-सन्तप्तजनजीवानां सुलभसाध्यम्। वेदाध्ययनम्, तत्वसारावगमनञ्च न सर्वजनसुलभम्। अतः स्तोत्रमार्ग एक एव शरणम् भवति। स एव वेदमार्गः कदाचित् वेदपठनात्, कदाचित् शास्त्राध्ययनात्, कदाचित् पुराणप्रवचनात्, कदाचित् सङ्गीतनादोपासनात् सम्भवति। तेषामधिकारिणामेव तत्तन्मार्गः सुगमः। आबालवृद्धाः तत्तद्देशीयासु भाषासु विनैव स्वरादिनियममनुपदमेव भक्तिप्रवाहे कमप्यनिर्वचनीय-मानन्दं लभन्त इति प्रत्यक्षं प्रमाणम्। निरन्तराज्ञानाबोधोपहतमन्दचित्तेषु वात्सल्यभूयिष्ठाः महात्मानः अनेकानि स्तोत्राणि जगदुः। सर्वजनयोग्यः भक्तिमार्गः खलु। सर्वप्राणिसुलभः नारायणः खलु। सर्ववेदप्रतिपादनपरः स एव। अतः भारतीयसाहित्ये भक्तिसाहित्यं परांकोटिमगमत्। आत्मविदां मार्गः आत्मविदग्रगण्यानामेव योगिनां मार्गः, योगिभ्यः वैदिकानां मार्गः वेदविद्भ्यः भवति, भक्तिमार्गस्तु सर्वजनेभ्यः इति कृत्वा श्रीविष्णोः तत्वं वैष्णवं साहित्यं विशिष्टाद्वैतमार्गेण श्रीरामानुजदर्शनमिति नाम्ना सर्वत्र भूमण्डले राराजते। इह लोके वेदपुरुषस्य श्रियःपतेः नारायणस्यैव कीर्तनं कुर्वतां भागवतानां कामपि परम्परां वयं जानीमः। सा च परम्परा वेदोच्चारणकालादारभ्य प्रवहति एव।

> ‘प्रह्लादनारदपराशरपुण्डरीक-
> व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ।
> रुक्माङ्गदार्जुनवशिष्टविभीषणादीन्
> पुण्यानिमान् परमभागवतान् स्मरामि।।’

इति हि भागवतपरम्परा श्रूयते। श्रीशङ्कराचार्याणामद्वैतमार्गस्तावत् आध्यात्मिके मार्गे निरुपहतं स्थानं भजते। एवमेव श्रीमद्भिः रामानुजाचार्यवर्यैः प्रतिपादितः मार्गः विशिष्टाद्वैतयुक्तः नितरां राराजते।

> "लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम्।

अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्।।"[1]

इति हि अस्याः परम्परायाः महत्त्वम्। लक्ष्मीनाथात् साक्षात् श्रीमन्नारायणादारभ्य नाथयामुनमुनिभ्यां परिपुष्टं प्रणीतं रामानुजमुनिना सर्वजननयनदृग्गोचरतां च नीयमानमिदं श्रीमन्नारायणतत्त्वं श्रीवैष्णव-मिति नाम्ना अधुना कीर्त्यते। श्रीवैष्णवगुरुपरम्परायाम् अनेके भागवतोत्तमाः स्वस्वहृदयान्तराळेषु बाह्ये च प्रपञ्चे नारायणं वारं वारं पश्यन्तः तदनुभूतिं स्ववदनारविन्दात् गङ्गाप्रवाहसदृशश्रीसूक्तिभिः परमपुरुषस्य स्वामित्वसौशील्यत्ववात्सल्यादिकल्यणगुणगणानाविष्कृत-वन्तः इमां च प्रकृतिं परमां च पदवीमकुर्वन्। एवं भूतेषु महापुरुषेषु भगवद्रामानुजाचार्याणां प्रियतमाः अन्तरङ्गशिष्योत्तमाः कूरकुलोत्तमाः मधुरकविपुङ्गवाः प्रपन्नजनेष्वग्रगण्याः श्रीवैष्णवसम्प्रदायसंरक्षणाय तृणीकृतजीवनाः श्रीमन्तः कूरेशमिश्राः निरुपमां च पदवीमन्वतिष्ठन्। अयमेव महात्मा भगवद्रामानुजाचार्यैः क्रियमाणायां श्रीभाष्यरचनायां महान्तमुपकारभूतं कैङ्कर्यमकुर्वन्। एते एव पञ्चस्तवानां निर्मातारः। एतेषामेव पुत्रप्रवराः श्रीरङ्गनाथप्रसादलब्धदिव्यावताराः। श्रियःपतिना श्रीरङ्गनाथेनैव पुत्रकृतकीकृताः दिगन्तयशोविशालाः कुमतिमतनिरसन-सहस्रमरीचिमालिनः सप्तप्राकारयुतस्य भूलोकवैकुण्ठस्य श्रीरङ्ग-महाक्षेत्रस्य पुरोहिताः श्रीपराशरभट्टार्याः श्रीरङ्गनाथस्य भोग्यभूताः। एतेषां प्रतिभां वर्णयितुं न कोऽपि समर्थो भवति। वेदोपनिषत्पुराणादिषु समस्तासु च विद्यासु स्थितानि रहस्यानि स्वमधुरफणितिभिः बहुचमत्कारमाविष्कृर्वन्तः श्रीविष्णोः पारम्यमुदघोषयन्। एतेषां पवित्रं जीवनं श्रीरङ्गेशपुरोहितत्वं रामानुजदर्शनरक्षार्थं परिश्रमं पाण्डितीप्रकर्षं च श्रीरङ्गराजस्तवाध्ययनमुखात् यथाशक्ति ज्ञास्यामः।

श्रीपराशरभट्टार्याणां जन्मप्रकारः -

अथ श्रीमन्नारायणस्याद्भुतलीलाविनोदक्रीडायां स एव पुण्डरीकाक्षः -

---

1 नित्यानुसन्धानश्लोकः

"जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्विकस्स हि विज्ञेयः स वै मोक्षार्थचिन्तकः ।।"[1]

इत्युक्तरीत्या यं जीवात्मानं निर्व्याजकरुणया ईक्षते स एव जीवः मोक्षार्थचिन्तकः भवत्येव। तादृशा एव मुमुक्षवो भवन्ति। ते च सात्विकं जीवनं यापयन्ति। सर्वसुलभाश्च भवन्ति। अन्तर्बहिश्च तमेव श्रीमन्नारायणं भावयन्ति, दर्शयन्ति। स्वयं तीर्त्वा, परान् तारयन्ति च। संसृतिचक्रभ्राम्यमाणजन्तुसन्ततरक्षणविचक्षणाश्च भवन्ति।

"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।"[2]

इति गीताशास्त्रवचनात् कालानुगुणं उताहो धर्मस्य ग्लानेः कारणाद्वा अधर्मस्याभ्युत्थानवेलायां वा भगवान्नारायणः आत्मानं स्वयमवताररूपेण सृजति। आत्मानमित्यत्र ज्ञानिनः इत्यर्थोऽप्यवगन्तुं शक्यते। यतो हि "ज्ञानी त्वात्मैव मे मतम्" इति भगवतः वचनसामर्थ्यात्। एवं भूताः ज्ञानिनः तत्कालेषु तत्तद्देशेषु भूमाववतीर्य ज्ञानदीपं प्रज्वलन्ति। ज्ञान-गम्यं ज्ञापयन्ति।

एवं भूतेषु नारायणपरेषु
"कलौ खलु भविष्यन्ति नारायणपरायणाः।।"
"क्वचित् क्वचित् महाभाग द्रमिडेषु च भूरिशः।
ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी।।"[3]

इत्युक्तदिशा दक्षिणे च भारते नैके स्वजन्मनालञ्चक्रुः। तत्रापि पवित्रायाः नद्यः ताम्रपर्ण्यास्तीरे स्वजन्मनालञ्चकृः। तान् "दिव्यसूरयः" इति संस्कृते, "आळ्वार" इति द्रमिडभाषायां चामनन्ति। ते च निरन्तरं तमेवाशरण्यशरण्यं नारायणमन्वभवन्।

"भूतं सरश्च महदाह्वभट्टनाथ-

---

1 महा. भा. शा.३५८-७३, ७४

2 भ.गी. ४ - ७

3 श्रीमद्भागवतम्,२२ स्कन्धम्

श्रीभक्तिसारकुलशेखरयोगिवाहान्।
भक्ताङ्घ्रिरेणुपरकालयतीन्द्रमिश्रान्
श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम्।।"
(श्रीपराशरा:)

इत्यादिना आचार्यपरम्परा प्रसृता। तत्र नाथमुनिमारभ्य, यामुनमुनिपर्यन्तं महान्तं स्थानमापु:। एवमेव अप्रमाणिकषड्दर्शननिरसननिपुणा एते भगवत: गुणान् सुष्ठु प्रकाशितवर्ती द्रमिडोपनिषत्सूक्तिं आविष्कृतवन्त: ।। श्रीशठकोपमुनीन्द्रस्य दिव्यपादरविन्दसेवया लब्धसत्ताका: श्रीमन्त; कूरनाथा: वाचामगोचरदिव्यकीर्तय: अभिजनविद्याधनमदविदूराश्चासन्। एनं महापुरुषं प्रति श्रीरङ्गामृतकवीन्द्रा: --

"मोळियैक्कडक्कुम् पेरूम्पुहळान् वजमुक्कुरुम्बाम्
कुळियैक्कडक्कुम् नम् कूरत्ताळ्वान् शरणूकूडियपिन्।
पळियैक्कडुत्तमिरामानुशन् पुहळ् पाडि अल्ला
वळियैक्कडत्तळ् एनक्किनि यादुम् वरुत्तमन्रे।।"[1]

इति इरामानुशनूत्तन्दादिमहाप्रबन्धे कीर्तितवन्त:। भगवान् श्रीरामभद्र एव पुन: भूमौ कूरेशमिश्रावतारं स्वीकृतवान् इति कापि सम्प्रदायकथा श्रूयते। रामभद्रस्यावतारकाले त्रेतायां लक्ष्मण: अहं सर्वं करिष्यामि जाग्रतस्वपतश्च ते" इति वदन् कैङ्कर्यनिर्वाहकोऽभूत्। "कृते च प्रतिकर्तव्यम्"[2] इति रघूणामपि नियम: स्वानुजस्य शेषांशावतीर्णस्य कार्तज्ञमाविष्करणाय श्रीकृष्णावतारे भगवान् वासुदेव: बलरामस्य स्वाग्रजस्यैवानुजो बभूव। तदनन्त कलौ लक्ष्माणाशत्वनाद्भूतस्य स्वशेषाहे: स्वरूपस्य रामानुजस्य कापि सेवां कार्तज्ञपूर्विकां कर्तुं कूरेशमुखेनावततार। रामानुजाचार्याणां ग्रन्थरचनादिकैङ्कर्येषु श्रद्धावन्त: तेषां सिद्धान्तस्थापनाय तृणीकृतदिव्यनेत्राश्चाभवन्।· अर्थपञ्चकानुगुणं पञ्चस्तवनिर्माणमारचयन्। यमकरत्नाकरं नाम महत्काव्यमपि भगवन्तं

---

1 इरामानुशनूत्तन्दादि, ७

2 रामायणम्, सुन्दरकाण्डम्

श्रीकृष्णमुद्दिश्य व्यरचयन्, यन्नाधुना लभ्यते। वैकुण्ठस्तवे परव्यूहविषयाः, अतिमानुषस्तवे व्यूहविभवावतारविषयाः, सुन्दरबाहुस्तवे अर्चावतार-विषयाः, वरदराजश्रीस्तवयोः अन्तर्यामित्वविषयाः स्तोत्ररूपेणैव बहुचमत्कारं, रसस्फोरकं, शब्दार्थालङ्कारगुणमण्डितं, ध्वनिप्राधान्यं विशदीकृताः। एतेषां स्तावानां व्याख्याः[१] अतिमनोहरा दृश्यन्ते। भगवद्रामानुजाचार्याणां श्रीभाष्यमहाग्रन्थमहायज्ञे प्रधानभूमिकां निर्वर्तयामासुः। श्रीरामचन्द्र इव दयापरिपूर्णचित्ताः जीवकारुण्यैकव्रताश्च आसन्। भगवति अत्यन्तभक्ताः भगवद्विरहं वोढुमशक्ताः वारं वारं तस्यानन्तकल्याणगुणान् संकीर्तयन्तः स्वाचार्याराधनमेव परमपुरुषार्थममन्यन्त। एतेषां नैच्यानुसन्धानमनन्यसाध्यम्। अत एवाचार्यपरंपरायां विशिष्टं स्थानं भजन्ते। तत्रभवान् सुन्दरजामातृमुनिः स्वविरचित-यतिराजविंशत्यां -

"कूरादिनाथकुरुकेशमुखाद्यपुंसाम्।
पादानुचिन्तनपरस्सततं भवेयम्।।" इति

इमं भक्ताग्रगण्यं स्तौति। भगवतो रामचन्द्रस्येव एतेषामपि कुशीलवाविव यमलौ व्यासपराशराख्यौ श्रीरङ्गप्रसादलब्धौ सञ्जातौ। तत्रास्माकं श्रीरङ्गराजस्तवस्य प्रणेता तत्रभवान् पराशरभट्टार्याः प्रातस्स्मरणीयाः भवन्ति। अत्र श्रीकाञ्चीजगदाचार्यसिंहासनाधिपतीनां महाविदुषां तत्रभवतां श्री P. B. अण्णङ्गराचार्याणां वाक्यानि यथातथं स्मर्तव्यानि भवन्ति।

भगवन्तो हि रामानुजाचार्याः स्वसमकालिकविद्वत्परिवृढ-श्रेण्यां दीपादुत्पन्नप्रदीपप्रथाभाजः श्रीवत्सचिह्नात्मजमणीन् श्रीपराशर-भट्टार्यानेव कनिष्ठिकाधिष्ठानयोग्यानमन्यन्त। अतो ह्यमी आबाल्या-देवाप्रतिमप्रतिभाप्रभावभासुराः सर्वतोमुखविज्ञानसाम्राज्यसन्धुक्षितविपुल-

---

[1] शेषाचलनिवासरसिकश्रीनिवासाचार्यकृतव्याख्यानपुस्तकं १९७३मध्ये बृन्दावन-धामनि मुद्रितमासीत् ।

विमलयशसः भगवद्गुणविद्धविमलयशसः भगवद्गुणविद्धहृदयतां[1] न भूतो न भविष्यतीत्यशेषरसिकविद्वज्जनोद्घोषितप्रभावा असमाभ्यधिक-वैदुष्यविलासविहारमण्डपायितारःकालिदास-भवभूति-भारवि-भट्टमुरारि-बाण-दण्डिप्रभृतिभ्योऽप्यतिशयितकविता चातुरीधुरीणा विरेजिरे। विशिष्य कुशाग्रधियः कस्यापि कोविदस्य बुद्धेरगोचराणां स्वादिष्टा-नामर्थविशेषाणामवलीलया समुद्घाटने सीमातीतं सामर्थ्यमनितर-साधारणमासादयामासुः। एतावतामप्यतिशयानामवतंसभूतं श्रीपराङ्कुश-परकालादिदिव्यसूक्तिसुधार्णवकर्णधारत्वमेतेषु व्यभ्राजदत्यद्भुतम्। एतावतोऽप्यतिशयान् अतिबाल्य एव समेधितानवेक्षमाणा भगवन्तो भाष्यकारा असावेव सहस्रनामभाष्यमवतारयितुमर्हति" इत्यवधारयन्त-स्तथा नाम दिव्याज्ञां अनुजगृहुः। प्रतीच्यां दिशि माधवाचार्यनाम्ना वेदान्तिसमाख्यया च विराजमानानामप्रतिमविद्वद्वराणामद्वैतपरिवृढानां विनयमधिकृत्य प्राथमिकी दिव्याज्ञा अथ चेयं द्वैतीयिकी दिव्याज्ञा सहस्रनामभाष्यप्रणयनविषयिणी। उभेऽप्येते दिव्याज्ञे भगवद्रामानुज-जीवितकालं यावन्निर्वर्तयितुमवकाशमलभमाना भट्टपादाः परस्तादेव प्राप्तावसराः कृतकृत्यास्समभवन्। एतानि वाक्यानि अक्षरशः यथार्थतां भजन्ते। तत्रभवानानन्दवर्धनाचार्याः -

"सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम्।
आलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्।।"[2]

वस्तुतत्त्वं निष्यन्दमाणा महतां कवीनामालोकसामान्यं प्रतिभाविशेषं परिस्फुरन्तमभिव्यनक्ति। दिव्यमानन्दरसं स्वयमेव प्रस्नुवाणा भवति इति महाकवीन् बहुधा स्तौति। "एतादृशगुणमण्डिताः चेतनोज्जीवनार्थं वेदान्तरहस्यान् विशिष्टाद्वैतसिद्धान्तपूर्वकान् स्वस्तोत्रेषु (अत्यन्त-

---

1 श्रीकाञ्चीप्रतिवादिभयङ्कर-अण्णङ्गराचार्याणां संस्करणेषु द्वितीयावृत्तिं गते श्रीविष्णुसहस्रनामभाष्ये श्रीपरीशरभट्टार्यानुगृहीते उपोद्घाते प्रस्तावितानि श्रीभट्टार्यप्रशंसावाक्यानि"। (१९६४. भगवद्गुणदर्पणाख्यम् भाष्यम्)

2 ध्वन्या. १-७.

सुलभतया) अनुगृहीताः। अतः एतादृशविशेषयुक्तानां महापुरुषाणां जीवनमपि विशेषयुक्तं भवत्येव।

"वैशाखमास्यनूराधाजातं भट्टार्यदेशिकम्।
गोविन्दयतिपादब्जचञ्चरीकमहं भजे ।।"[१]

इति । अस्य महापुरुषस्य जननं कस्मिन् वत्सरे सञ्जातमित्यत्र न निश्चयात्मको निर्णयः।" अधुनापि विदुषां बाधामुपज़नयति। यदि वा भवतु भगवतो रामानुजस्य समकालीनः इत्यत्र तु नास्ति संशयलेशः[२]। तत्र भवतां श्रीरामानुजाचार्याणां अवतारसमयस्तु १०१७-११३७ A.D. पिङ्गळाख्ये वत्सरे श्रीभूतपुर्या दक्षिणे भारते समभूत्। श्रीपराशर-भट्टार्याः रामानुजार्याणाम् अनुपदमेव श्रीविशिष्टाद्वैतनिर्वाहकाः, श्रीरङ्गराजपुरोहिताश्चासन् इत्यनेन रामानुजसमकालीन इति निर्णीयते। वैशाखे अनूराधा नक्षत्रे अवततारेति उपर्युक्त तनियन् श्लोकादवगम्यते। परन्तु वत्सरः नात्र सूचितः। प्रायशः भारतीयानां महापुरुषाणां कवीनां च जन्मविषये यावाननिश्चितः विवादास्पदो निर्णयः तावानेवाभूत् भट्टार्याणामपि जन्मविषये। गुरुपरम्परादि महाग्रन्थेषु वत्सरः न सूचितः। भिन्नाभिप्रायाश्च प्रकटयन्ति।[३]

तथापि परिशोधकाः १०६२ A.D. इति तृतीयब्रह्मतन्त्र-स्वतन्त्रस्वामिविरचितगुरुपरम्पराग्रन्थाधारेण मन्यन्ते। केचन[४] १०७३-७८ A.D. मध्ये सञ्जात इति वदन्ति। तृतीयब्रह्मतन्त्रस्वामिनामभिप्रायस्तु

---

1 नित्यानुसन्धानश्लोकः

2 पिळ्ळलोकान् जीयरनुगृहीते रामानुजाचार्यदिव्यचरितम्

3 १. १८७७तमे वत्सरे प्रकाशितायां श्रीमत्तृतीयब्रह्मतन्त्रस्वतन्त्रस्वामि-शेय्दरुळिन मुव्वायिरप्पडिगुरुपरम्पराप्रभावम्।
२. वळुकनम्बियरळिशेय्द यतिराजवैभवेऽपि कडल्मङ्गळं वीरराघवाचार्यैः परिशोधितम् सरस्वतीनिलयमुद्राक्षशालायां चेन्नपट्टणे ।

4 See History of Indian Philosophy, Vol. III. ; See Dr. V.K.S.N. Raghavan : History of Visistadvaita Literature, p. 17.

४१६३ कल्यब्दाः शुभकृत्वत्सर इति[1] । नाम १०६२ A.D.काले मे इति आङ्ग्लमासे शुक्रवासरे २४ तारीखायां स्वजन्मनालञ्चक्रुरिति ज्ञापयन्ति। केचन सम्प्रदायिनः अत्र ११२३ इति विवदन्ते । श्रीपराशरार्याः कार्तीकशुक्लद्वादश्यां जयनामवत्सरे १११४ A.D. नवम्बर्मासे बुधवासरे परमपदस्थानमलञ्चक्रुः इति विश्वसन्ति। परन्तु सम्प्रदायमर्मज्ञाः श्रीपराशराः त्रिंशद्वर्षपर्यन्तमेव भूमण्डलमलञ्चक्रुरिति वदन्ति। अपरे[2] पञ्चत्रिंशद्वर्षं यावत् स्वजन्मना अलञ्चक्रुरस्मिन् भूमण्डले इति उट्टङ्किताः। श्रीरामानुजपराशरभट्टार्याणां जीवन-चरित्रमाधारीकृत्यैव भट्टपादानां जननकालनिर्णयः करणीयः भवति। प्रथमचोळकुलोत्तुङ्गः यदा शासति स्म तदा रामानुजाचार्याणां कापि मानसिकी बाधा सञ्जाता। तदनु यतिवराः श्रीरङ्गमहाक्षेत्रं विहाय मेलुकोटनामकयादवाद्रिं प्रस्थिताः। तस्मिन् समये कर्णाकटप्रान्ते बिट्टिदेवो नाम शासकः पालयति स्म। स तु जैनावलम्बी बभूव। तं च रामानुजाचार्याः श्रीवैष्णवभक्ताग्रगण्यमिवाकुर्वन्। तस्य नामापि परिवर्तितवन्तः। विष्णुवर्धनः इति दिव्यं नाम चानुगृहीतवन्तः। गुरुपरम्पराप्रभावग्रन्थात् ज्ञायते यत् तस्मिन्नेव समये पराशरभट्टार्याणां विवाहसंस्कारः सञ्जातः इति। चोळकृतहिंसायाः समयः १०९८ A. D. तस्मिन् समये रामानुजाचार्याः अज्ञातरूपेण आसन्। १११६ प्रान्ते होयसलराजा समागतवान् । द्वादशशतके प्रारम्भे रामानुजाचार्याः मेलुकोटेग्रामे स्थिताः । गुरुपरम्पराग्रन्थाधारेण पराशरभट्टार्याणाम् उपनयनसंस्कारः गर्भाष्टमे सञ्जातः। अक्कच्चि नाम धारिण्या कन्यया विवाहोऽपि युक्ते वयसि सम्पन्नः, नाम १५ वर्षायवः भवेयुरिति ऊह्यते। तेन कारणेन एतेषां जन्मवत्सरः १०८५तः १०९०पर्यन्तं वक्तुं शक्यते। परन्तु अत्र प्रमाणिकाधाराः नोपलभ्यन्ते। केचन सम्प्रदायिनां अभिप्रायस्तु वीरसुन्दरो नाम भूपालः श्रीरङ्गक्षेत्रस्यापि राजासीत् । स

[1] Rajamahendracola period.

[2] A.V. Gopalacharya's introduction to Sriranga-rajastava, 1934.

तु श्रीरङ्गप्राकारभित्तिनिर्माणार्थं महाभागवतस्य पिळ्ळैपिळ्ळसूरिणः गृहस्योन्मूलनाय प्रायतत। पराशरभट्टार्याः तदनुचितमित्यूचुः। स राजा न श्रद्दधे। तेन खिन्नाः भट्टर्महाशयाः श्रीरङ्गं त्यक्त्वा गोष्ठीपुरं प्रययुः। पुनः वीरसुन्दरभूपमरणानन्तरमेव श्रीरङ्गं प्रत्यागताः इति, अत्रापि चारित्रकं प्रमाणं नोपलभ्यते। अयं द्वितीय राजराजो वा द्वितीयचोळो वा भवेत्। तावत्पर्यन्तं नञ्जीयर्सकाशे अवसन्। एतैः भिन्नभिन्नदन्तकथाप्रसङ्गैः चारित्रप्रमाणैश्च पराशराः कति वर्षाणि स्वजन्मना अलञ्चक्रुः इति स्पष्टं वक्तुं न पारयामः। अत्र केचन शोधकाः पराशरार्याः षष्ठितः सप्ततिवर्षपर्यन्तं उषित्वा रामानुजाचार्य-दिव्याज्ञां निर्वर्तितवन्त इति ज्ञापयन्ति।

अस्मिन विषये नैतावत्पर्यन्तं निश्चयरूपेण कालनिर्णयः निरूपितः, तथापि अल्पीयसि वयसि एव श्रीरङ्गनाथब्रह्मरथमारूढाः इत्यत्र न विमतः दृश्यते। यदि पूर्णायवः इतोऽप्यनेके ग्रन्थाः भूमण्डले अवतरिष्यन्तीत्यत्र नास्ति संशीतिः। इत्थं भगवद्रामानुजमुनेः परिपूर्ण-कटाक्षवीक्षणान् बाल्ये एवोपलब्ध्वा रामानुजार्याणामनन्तरं विशिष्टाद्वैत-सिद्धान्तस्य निर्वाहकाः अभवन् । श्रीवैष्णवसम्प्रदायस्य प्रधानभूतस्य केन्द्रस्य श्रीरङ्गमहाक्षेत्रस्य पुरोहिताः एते सश्रद्धं बहुप्रेमपुरस्सरं श्रीरङ्गनाथस्य सकलविधकैङ्कर्यदुरन्धराः भूत्वा, आचार्यपरम्परायाम् अत्युज्वलं स्थानमापुः इत्ययमेव विषयः एतेषां महच्चारित्रं विभूतिं च ज्ञापयति।

श्रीपराशरभट्टार्याणां बाल्योदन्तः -

श्रीरङ्गमहाक्षेत्रे परमनिष्ठागरिष्ठाः आचार्यदेवताः निखिल-जनसुहृदः द्वयार्थनिष्ठाः श्रीकूरेशाः सपत्नीकाः निवसन्तिस्म। ते च एकदा वर्षासु बहिरागन्तुमक्षमाः विनैव भोजनं उपवासव्रतं स्वीचक्रुः। गृहेऽपि भगवतः अर्चनां कर्तुं तुलसीदळं विना किमपि वस्तु नासीत्।

किंकर्तव्यतामूढाः कूरेशाः तत्कालं सम्भवता द्रव्येण जगत्कुटिम्बिनं आर्तत्राणपरायणं पूजयामासुः। भगवतो नारायणस्य तत्प्रसादमेव स्वदेहधारणार्थं स्वीकृत्य तृप्ताश्चाभवन्। श्रीवैष्णवप्रपन्नजनकूटस्थाः नारायणपरायणाः श्रीमन्तः शठकोपमुनयः स्वकीय "तिरिवाय् मोळि" नामनि दिव्यप्रबन्धे "उण्णुम् शोरुम्" इत्यस्मिन् ६-७-२ दशके स्वकीयमन्नं, पानीयं, ताम्बूलम् इत्येतत्सर्वं श्रीकृष्णः एवेति जगदुः। तेषां श्रीसूक्तिमनुसरन्तः श्रीकूरेशमिश्राः महाविश्वासपूर्वकं वारं वारं श्रीरङ्गशायिनं प्रार्थयित्वा, शनैः निद्रावशमुपेताः। तदा श्रीरङ्गमन्दिरे देवदेवस्य रात्रिनिवेदनकालः श्रीचिह्नध्वनिना गम्भीरेण संसूचितः । तद्ध्वनिं श्रुत्वा श्रीकूरेशानां धर्मपत्नी आण्डाळ्देवी उत्थाय पार्श्वेशयानं प्राणनाथं दृष्ट्वा श्रीरङ्गनाथं प्रति मनसि एवमचिन्तयत्। अत्र मदीय जीवितेशाः कूरेशाः विनैवाहारं भूमौ शेरते, तत्र तु रङ्गमन्दिरे श्रीशः तत्तत्कालेषु रुचिकराणि रसमयानि मधूनि बह्वन्नानि कथं वा स्वीकरोति? भक्तजनक्षुद्बाधां कथं सहते? एतद्युक्तं वेति अमन्यत। आपद्बान्धवः श्रीरङ्गशायी सर्वगुहाशयस्थः खलु। अस्याः मानसिकीं व्यथां कर्णावाशाः इति स्तुतः स भगवान् श्रुत्वाऽनुपदमेव स्वकीयकार्यनिर्वाहकाणाम् उत्तमनम्बिनां स्वप्ने आत्मानं प्रदर्श्य "हे पूर्णार्य! शृणुष्व मदीयं वाक्यम् - मद्भक्ताग्रगण्याः श्रीकूरेशमिश्राः विनैव मत्प्रसादं उपवासं स्वीकृताः निद्रामुपागमन्। तेषां समीपं गत्वा इदं मदीयं पायसान्नं झटिति मदीयया आज्ञया समर्पय। मा विलम्बं कुरुष्व।" इत्यादिदेश। पूर्णार्याः साश्चर्यं झटिति उत्थाय भगवद्वचनानुसारं पायसान्नादिकं शिरसि निक्षिप्य कूरेशमिश्राणां पावनं गृहं सानन्दमीयुः। तत्र तौ दम्पती दृष्ट्वा श्रीरङ्गनाथस्य दिव्याज्ञां व्यजिज्ञिपुः। श्रीकूरेशाः भगवतः कारुण्यं वारं वारं भावयन्तः हर्षबाष्पाकुललोचनाः "अहो! सकलाघनिदानभूते मयि श्रीरङ्गभर्तृः दयाप्रवाहः पङ्गोरुपरि गङ्गा प्रवाह इव निसृतः। महापराधिने मह्यं पायसान्नं ददाति श्रीरङ्गराजः। कोऽहं? कुत्र वा अखिलभुवनजन्मस्थेमभङ्गादिलीलः श्रीनिवासः। अत एव आर्तत्राणपरायणः नारायणः सर्वैः वन्दितचरणारविन्दो भवति इति

कीर्तयन्तः परमानन्दमभजन्। क्रेयप्रसादोऽपि इदं शर्करान्नम् श्रीरङ्गनाथस्य प्रसाद एवेति मत्वा स्वस्मै स्वपत्न्यै च प्रसादगोलकौ द्वौ तस्मात्कनकमयपात्रात् स्वीकृवन्तः। अवशिष्टानि प्रसादगोलकानि तेभ्य एव समर्पितवन्तः। उत्तमपूर्णाः दम्पत्योः परमां भक्तिं दृष्ट्वा नितरां तुतुषुवुः। निष्क्रान्ते पूर्णार्ये तदनु गृहाभ्यन्तरं प्रविष्टाः कूरेशाः स्वधर्मपत्नीमाहूय "अयि ! त्वं किमप्यचिन्तयः नो उपवासविषये" इति पप्रच्छुः। सा तु "हे नाथ ! पाददास्या मया न किञ्चिदपि प्रार्थितम्। परन्तु रात्रौ प्रसादवेलाकाहलीध्वनिं श्रुत्वा मन्मनसि एवं चिन्तितम्। मदीये प्राणवल्लभे निराहारे कथं वा भवान् रुचिमयपदार्थान् स्वीकरोषि? हे जगत्पितः नैतन्याय्यम् इत्येवाहं चिन्तितवती। क्षमध्वं मदीयमहापराधम् इति प्रणनाम। कूरेशास्तु तामकुप्यन्। इतःपरं एवं मा काङ्क्षीः इत्यादिशन्। श्रीरङ्गनाथस्य प्रसादगोळकौ सानन्दं तौदम्पती स्वीचक्रतुः। एतावेव प्रसादगोळकौ अस्माकं श्रीरङ्गराजस्तवकर्तुः श्रीरङ्गेशपुरोहितस्य श्रीपराशरभट्टार्यस्य वेदव्यासभट्टार्यस्य च जन्मदायिनावभवताम्। मधुरान्नप्रभावात् मधुरसुधासूक्तयः एतयोः मुखारविन्दात् निसृता इति महतां वचनं सत्ययुक्तमेव।

अथ शुभकृन्नामवत्सरे अनूराधानक्षत्रे वृषभमासे १०६२ A.D. तमे वर्षे श्रीपराशरभट्टार्याः स्वजन्मना भुवमलञ्चक्रुः। पितृपादाः कूरेशाः वैराग्यचक्रवर्तिनश्चासन्। स्वशिशोः नामकरणाद्युज्जीवनविषये भगवन्तः श्रीरामानुजाचार्या एव स्वतन्त्रा इति उदासाञ्चक्रिरे। श्रियःपतेः सत्सङ्कल्पस्य प्रतिरूपश्चायं पोत इति मन्वानाः रामानुजयतयः स्वमठात् गोविन्दार्यश्रीकूरेशदिव्यावासं प्रति प्रेषयमामसुः। स भागवतोत्तमः रामानुजाज्ञया कूरेशदम्पतीः नत्वा तत्रस्थकूरेशनन्दनं दिव्यलक्षणोपेतं बालमुकुन्दायमानं सबहुमानमद्राक्षुः। तं च पोतं स्वहस्तान्दोलिकायां निक्षिप्य, वारं वारं मूर्ध्नि सानन्दमाघ्राणयामासुः। स्ववक्षसा चाश्लिष्य शिशोः दृष्टिदोषापनुत्यै, भूयसे श्रेयसे च मङ्गळानि प्रयुञ्जानाः बालगण्डादिसकलारिष्टपरिहाराय व्याधिनिवारणाय च

शिशुश्रेयसे मङ्गळानाञ्च मङ्गळं, परमं पवित्रं, पुण्डरीकाक्षस्य नारायणस्य द्वयमन्त्रमनुसन्धधाना: मङ्गळाशासनं प्रयुञ्जानाश्चासन्। तदनु दम्पत्योः अनुज्ञया तं शिशुं कृपामात्रप्रसन्नानां शेषांशभूतानां भगवद्रामानुजाचार्याणां सन्निधिमानीतवन्त:, यतिवरा: तं शिशुं अद्भुत-बालकमिव वसुदेवनन्दन एवेति परमानन्देन श्रीरङ्गनाथपायसान्नप्रसाद एवेति, संतुष्टधिया आगामिनि काले श्रीविशिष्टाद्वैतसिद्धान्तस्य जयकेतना इति प्रेमातिशयेन च स्वकरुणापूरितजीमूतदृग्भि: शीतल-कटाक्षैः दिव्यमङ्गळाशासनपरम्परादिभि: आशीर्वचनैश्च आश्लिष्टा: परमानन्दं अन्वभजन्। अथ समीपस्थान् गोविन्दभट्टार्यान् विलोक्य, हे गोविन्द आश्चर्यं किल पश्यतु शिशोरस्य अप्रमेयं तेज:, यच्चासाधारणरूपेण सार्वासु दिक्षु विजृम्भते। किमकार्षी:? किमिदं भागवतकरस्पर्शाया: माहात्म्यं, उत हो भगवत: सङ्कल्पस्य प्रभावो वा? अत्र द्वयमन्त्रसौरभं दिव्यपरीमळायते। भगवानेवात्र निदानार्ह: इति संभावयामि इति व्याहृतवन्त:। तदनु महाभागवता गोविन्दार्या: हे कृपामात्रप्रसन्नार्य महाप्रभावशालिन् नाहं महान् परन्तु यदहर्निशं भवद्भि: प्रेम्णा च अर्थानुसन्धानपूर्वकं उच्चरते तदेव द्वयमन्त्रमनुसन्दधदेवात्र शिशुमिमं भवत: श्रीचरणमूलमानैषम् इति सविनयं अञ्जलिबद्धा: प्रत्यूचु:। तदनु यतिसार्वभौमा: लक्ष्मणमुनय: महदानन्दमनुभवन्त: हे भागवत ! करुणापूरितहृदयाय भवते नितरां स्वस्ति। डिम्बस्यास्य रक्षारूपे कर्तव्यांशे भवानेव जागरूकोऽभव:। इत: परं महाप्रभावशालिन: न: सिद्धान्तजयकेतनस्यास्योज्जीवनकृत्येऽपि भवन्त एव श्रद्धामाधत्ताम् इत्याज्ञाप्य शिशो: पञ्चायुधाकाराण्याभरणानि[1] स्वामृतहस्ताभ्यामेव अपिनह्यन्ति स्म। तदनु नामकरणवेलायां श्रीगोविन्दभट्टार्यश्रीहस्ताभ्यामेव तस्य कण्ठे तुलसीमालिकां बाहुमूले

---

[1] सुदर्शन (चक्र)-पाञ्चजन्य (शङ्ख)-कौमोदकी (गंदा)-नन्दक(खड्ग)-शार्ङ्गानि (धनु:) । प्रायश: श्रीवैष्णवजना: कुण्डलाद्याभरणानि पञ्चायुधरूपेण प्रकल्पयन्ति ।

शङ्ख-चक्राङ्कनमप्यचीकरन्। भगवतः बादरायणस्य वेदव्यासस्य पितृपादानां नाम्ना श्रीपराशरभट्टार्य इति तमाजुहुवुः। परान् बाह्य-कुदृष्टीन् प्रमाणतर्कशरैराश्रुणातीति पराशरः इति वेदान्ताचार्यस्याभि-प्रायश्च अत्रानुसन्धेयः भवति। एवं स्तोत्ररत्ननिर्मातृणां विशिष्टाद्वैत-सिद्धान्तमूलपुरुषेष्वन्यतमानां महाप्रभावयुतानां श्रीयामुनाचार्याणां द्वितीयां मानसिकीमतृप्तिं पर्यहार्षुः। तदनु भगवद्रामामुजाचार्याः गोविन्दार्याणां भ्रातुः कनिष्ठगोविन्दार्यस्य [शिरिय गोविन्दप्पेरुमाळ्] एकः पुत्रः सञ्जातः इति श्रुत्वा मोमुद्यमानः तत्र भवतो यामुनाचार्यस्याद्भुत-सङ्कल्पस्सफलो जायते इति वारं वारं भावयन्तः, तेषां गृहं प्रस्थाय, तमप्यर्भकं स्वदयामृतमृदुशीतलकटाक्षपात्रं विधाय, तस्य श्रीपराङ्कुश-पूर्णाः इति पराङ्कुशमुनि नाम्ना[1] नामधेयं विरच्य, तं मङ्गळाशासनैः एधयित्वा यामुनाचार्याणां तृतीयं वैमनस्यं दूरीकृतवन्तः। गच्छता कालेन सर्वत्रापि श्रीवैष्णवप्रपञ्चे पराशरभट्टार्याणां नाम देवदुन्दुभिरिव श्रूयते स्म। आश्चर्यम् ! अहो भाग्यमहो भाग्यमिति प्रपन्नजनकण्ठोक्तिः भागवतजनदिव्याभिप्रायः 'कर्णावाशा' इति स्तूयमानस्य श्रीरङ्गशायिनः कर्णमूलमपि संप्राप्त इवाभवत्। तदनु महावैराग्यशीलवतां श्रीकूरेश-मिश्राणां दिव्याद्भुततनयस्य पोषणभारं जगत्पितुः चतुर्मुखेश्वरमुखैः पुत्रपौत्रादिशालिनः श्रीरङ्गभर्तृरुपरि समापतत्। ततः प्रभृति तमद्भुतशिशुं श्रीरङ्गदेवालये एव स्थापयित्वा तदेव स्थानं क्रीडाङ्गणमिव पर्यकल्पयन्। भगवान् श्रीरङ्गनाथः श्रीपराशरभट्टार्यकं पुत्रकृतकं सानुग्रहमङ्गीकृत्य स्वगर्भालये एव आमोदस्तम्भोपकण्ठे दोलामपि पर्यकल्पयत्।[2] स्वपत्नीभिः श्रीभूनीळादेविभिः वात्सल्य-गुणोज्वलाभिः पोषयामासुः। भट्टार्याः बालक्रीडाविनोदमनुभवतः

---

[1] प्रपन्नजनकूटस्थाः, शठकोपमुनयः, श्रीनम्माळ्वार्

[2] श्रीरङ्गनाथदिव्यमङ्गळमूर्तेः पुरतः द्वौ स्तम्भौ विद्यमानौ स्तः। तयोः आमोदेति नाम ।

देवदेवस्य दिव्यान्ताराळगेहलीं "कुलशेखरप्पडि"[1] चक्रम्यमाणाः भगवतः निवेदनात्पूर्वमेव निवेदनान्नानि प्रसादानि स्वहस्ताभ्यां शिशुतनसुलभया स्वीकुर्वन्तः ववृधिरे। श्रीरङ्गनाथालयसन्दर्शकानां भक्तजनानाञ्चायं शिशुः भगवतः प्रियसूनुः नितरामानन्दमाश्चर्यं जनयामास। केचन भक्ताः अयमेव श्रीरङ्गनाथान्तरङ्ग इति, अपरे महाभाग्यशालीति, अन्ये केचन सम्प्रदायरक्षार्थं रामानुजाचार्यवर्यैरुपलाल्यमानः तेजोमयः बालकः इति, केचनायं महाभाग्यशालिनां कूरेशमिश्राणां तपःफलरूप इति नानाप्रकारैः सम्भावयन्ति स्म। शिशुरयं कदाचित् श्रीरङ्गनाथेन सम्भाषणं कुरुते। कदाचित् आमोदस्तम्भयोः पार्श्वे निगीर्य श्रीभूनीळादेविभिस्साकं लीलाक्रीडादयः निर्वर्तयतिस्म। कदाचित् भगवतः दिव्यान्नानि स्वयमेव हस्तमुद्यम्य स्वीकुर्वन्, श्रीरङ्गनाथस्य एकान्तकैङ्कर्यसेवासु यथेच्छं विहरति स्म। एते बाल्यात्प्रभृति सुस्निग्धाः पूर्वाचार्यैः अनुगृहीतानि स्तोत्रपाठानि शुकवत् मधुरेण स्वरेण उच्चरन्ति स्म। श्रीकूरेशानां प्रियतनूजाः भट्टरमहाशयाः क्रमशः तिरुवाय्मोळिं श्रीशठकोपवाक्सुधां श्रीवैष्णवगोष्ठीषु श्रद्धया शृणोति स्म। श्रीकूरेशास्तु मधुरस्वराः रागभावयुक्तेन तन्मयहृदयेन च तं महाप्रबन्धं श्रीमते रङ्गनाथाय सभक्तिं श्रावयन्ति स्म। एवंरीत्या प्राचाल्यमानायां दिव्यगोष्ठ्यां कदाचित् जिज्ञासुरयं बालपराशराः "शिरुमामनिशर"[2] इति पदं श्रुत्वा महाप्रभावशालिनं स्वपितरं प्रति अयि पितृदैवताः ! सहस्रगीते दिव्यप्रबन्धे परिदृश्यमानस्य शिरुमामनिशर इति पदस्य को वार्थः? अल्पमहामनुष्याः इति तस्य पदस्य सामान्यार्थः परिदृश्यते? परन्तु अल्पत्वमहत्वधर्मौ परस्परविरुद्धौ किल? तयोरैकाधिकरणं कथं वा संगच्छते? कुतो वा (श्रीनम्माळ्वार्) श्रीशठकोपदिव्यसूरिः शिरुमामनिशर इति एकत्रितौ विधाय जगदुः? इति परिप्रश्नं सविनयं

[1] कुलशेखरदिव्यसूरिः स्वं गेहलीस्थानं भगवतः दिव्यालयस्याऽवृणोत्। एते मुकुन्दमाला, पेरुमाळ् तिरुमोळि नाम संस्कृत-द्रमिडस्तोत्रप्रबन्धान् विरचयामसुः।

[2] तिरुवाय्मोळि ८-१०-६-१

कृतवन्तः। तदा श्रीवत्सलाञ्छनाः "वत्स ! त्वं कुशलोऽसि ! प्रश्नोऽपि बहुरमणीयः, युक्तरूपः प्रतिभाति। वेदवाक्यैः ऋषिवाक्यैः समाधातुं नोत्साहे। तथापि शिरुमामनिशर व्यपदेशार्हान् महापुरुषान् सन्दर्शयामि। एते च महात्मानः शरीरेणाल्पाः भवन्ति । ज्ञानेन तु महान्तस्सन्तः विराजन्ते। शिरियाच्चान्, अरुळाळप्पेरुमाळ्, एम्बेरुमानार् (दयापाल-देशिकाः) सदृशान् विलोकय। तादृशाः प्रपन्नाः। अल्पमहापुरुषाः इति व्यपदिशन्ते इति स्वबालकाय अल्पमहापुरुषार्थः सुलभमार्गेण विशदीकृतवन्तः। अथ कदाचित् श्रीरङ्गे पराशराः पञ्चवर्षदेशीयाः क्रीडाविनोदं रथ्यासु बालकैस्सहानुभवन्तः भगवते श्रीमन्नारायणाय नितरामानन्दं जनयति स्म। तदनु कश्चन वेषधारी "सर्वज्ञभट्टाः समागताः उत्सरत उत्सरतेति वदन् महता कोलाहलेन काहलं धमन् बालगोष्ठीमपि भर्त्सयामास। तदनु श्रीपराशरशिशुः क्रीडां च परित्यज्य, एवं चिन्तयन्नास्ते। कोऽयं सर्वज्ञभट्टः? यत्र परमभागवताः भगवद्रामानुजाचार्याः जगद्गुरवः विराजन्ते, यत्र वा परमवैराग्यधनिनः स्वपितृपादाः श्रीरङ्गनाथम् उपासनां कुर्वन्ति, यत्र वा दाशरथिः (मोदलियाण्डान्) दयापालमुनिः (अरुळकप्पेरुमाळ् एम्बेरुमानार्) भगवन्तमनुभवन्तौ स्तः, यत्र वा गुरुचरणाः गोविन्दभट्टाः (एम्बार्) महाशयाः निरन्तरं द्वयैकनिष्ठाः सञ्चरन्ति, यत्र वा ईदृशाः परमभागवतोत्तमाः निरन्तरं कावेरीमवगाहन्ते, परमपुरुषं सहस्रगीत्या स्तुवन्ति च तत्र स्थानमुपेत्य "अहं सर्वज्ञः" इति काहलध्वनिं करोति ! अहो ! अज्ञानस्य महिमा ! अयं कीदृशः? इति मनसि बाधामनुभवन् सर्वज्ञभट्टर् समीपमुपगम्य परीक्ष्यमाणेषु जनेषु स्वाञ्जलिं मृत्तिकयाऽऽपूर्य, "अयि! त्वं सर्वज्ञोऽसि तर्हि इयं कियती ब्रूहि?" इत्यपृच्छत्। स च सर्वज्ञः झटिति समाधातुमशक्तः नताननः स्तब्धः तूष्णीं बभूव । यत इयं कियती इति प्रश्नस्य स सर्वज्ञः मृत्तिकायां रेणवः कियत्सङ्ख्याका इति भावं परिकल्प्य "को वा गणयितुमीष्टे?" इति मूकभावं प्रपन्नः। बालपराशराः मृत्तिका कियत् परिमाणिका (न अणूनां संख्या) इति भावमभिव्यञ्जयन्तः, "मुष्टिका परिमिता" (अञ्जलि

परिमिता मृत्तिका) इति चमत्कारमूचुः। सर्वे जनाः अमुं बालपराशरं जयजयशब्दबहुमानैः श्लाघितवन्तः। तदा पराशराः सर्वज्ञाय, अज्ञाय सर्वज्ञः भगवान् एक एवेति, त्वम् अहमेव सर्वज्ञ इति मिथ्याहङ्कारेण भगवद्भागवतसन्निधिं कलाहध्वानेन ज्ञापयन् स्वाज्ञानं प्रकटीकरोषि। अद्य अज्ञोऽभवः।. बिरुदमाडम्बरञ्च मुञ्च इति उपदिशन्तः शिशुजनसुलभया गिरा तत्रस्थान् अस्य काहलमाच्छिन्दन्तु इत्युक्तवन्तः। ततः सर्वज्ञः तत्रस्थान् दृष्ट्वा कोऽयं किशेरः? कस्य वा नयनानन्दकरः? कस्मिन् कुले शोभामावहति? इत्यपृच्छत्। ते च एष कुमारः दिव्यशिशुरिति श्रीरङ्गनाथस्य पुत्रकृतक इति श्रीमतां वैराग्ययशोभूषणानां महाविद्वद्वराणां रामानुजैकपरायणानां श्रीकूरेश-मिश्राणां प्रियतनूज इति पराशरभट्टाख्यः सर्वजनप्रियंः इति समादधुः। झटिति तमर्भकं स्वभुजाभ्यामुदुह्य श्रीकूरेशमिश्रगृहं प्रविवेश। तस्मिन्नेव समये श्रीकूरेशान् नमितुमागता धनुर्दासस्य प्रेयसी कनकाङ्गी भट्टार्य-प्रदर्शितामद्भुतचर्यां श्रुत्वा, महता संभ्रमेण तं बाहुभ्यां वहन्ती, द्वयमन्त्रानुसन्धानेन रक्षां कल्पितवती। चेलाञ्चनेन तानवगुण्ट्य गृहान्तर्नीत्वा भट्टार्यमातरं चुक्रोध। कथं वा लीलाविभूत्यां चिरं जीवेयुरिति तं भट्टार्यं प्रति स्वकीयां मानसिकीं बाधामाविश्यचकार। श्रीपराशरभट्टार्याः बाल्यात्प्रभृति एकसन्धाग्राहिणश्चासन्। गर्भाष्टमे उपनयनाख्ये कर्मणि संवृत्ते वेदाध्ययनायाचार्यसन्निधिं प्रापितेषु भट्टार्येषु तेषां प्रतिभाऽप्रतिहतेति गुरुजनैरङ्गीकृतपूर्वा चासीत्। यत्र वा भट्टार्याः वेदाध्ययनं कर्तुमुद्युक्ताः तत्र प्रतिदिनं चर्वितचर्वणमिव पञ्चदशाधिकदिनपर्यन्तं एकमेव पाठं पाठयन्ति स्म। तच्च भट्टार्याणां न रोचतेस्म। अतः पाठशालां विहाय बालकैस्सह कीडन्नास्ते। कूरेशाः तद्विज्ञाय कुमारं भर्त्सिताः। कुतो वा पाठालयं विहायागतोऽसि? इति पप्रच्छुः। भट्टार्याः- "अयि जनक ! अत्र पाठशालायां पठितपाठमेव पाठयन्ति। अतः मह्यं न रोचते" इति समादधिरे। तदनु कूरेशाः पूर्वेद्युः पठितविषये पञ्चाशत् पदीं ब्रूहि इति आज्ञापयामासुः। भट्टार्याः स्वरवर्णमात्रासहितं अर्थयुक्तं च तत्तद्वेदभागं दोषादिकं विना

निवेदयामासुः । तदनु भट्टार्याणां जननीजनकौ परां विस्मयपदवीमवापतुः। परन्तु किमपि परिशङ्कमानौ अद्य नायमध्ययनोचितः इति कश्चित्कालः प्रतीक्षणीयः इति वेदाध्ययनात् कुमारं विरमयतः। नाम भट्टार्याः एकसन्धावरभूषिताश्च अभवन्। एवं विशिष्टा बालकाः अतिविरलाः भवन्ति। जगन्नाथपण्डितरायादयः [रसगङ्गाधरकर्ता] अपि एवमासन्निति ज्ञायते। श्रीकूरेशगोविन्दभट्टार्यौ च · पराशरभट्टार्याय अर्थशिक्षां तत्वविद्यां च कटाक्षितवन्तौ बभूवतुः। गच्छता कालेन तत्रभवान् पराशरार्यः अधीतसकलविद्याप्रपञ्चः पूर्वाचार्य श्रीसूक्तिसारग्रहणचणाः समस्तासु विद्यासु हंसायमानाः श्रीहयग्रीवदिव्यकरुणाकटाक्षलब्धदिव्यवाग्वैभव महामहिमयुक्ताः सन्ततश्रीनारायणचरणकमलस्फुरिताधरोष्ठाःभगवद्रामानुजदिव्यानुग्रहलब्धविशिष्टाद्वैतमहाभाष्याः दिव्यसूरिबोधितदिव्यगन्धपरिमळेन घुमघुमायमाणाष्टाक्षरमन्त्रविवरणविद्यारहस्याः कदाचित् उत्तानपादबालध्रुव इव, कदाचित् नारायणैकजीवनबालप्रह्लाद इव श्रीशठारिनाथमुनि-यामुन-देशिक-रामानुजमुनि-श्रीसूक्तिदिव्यमन्दाकिनीभगीरथायमानाः भागवतश्रीपादतीर्थाभिलाषिणः अम्बरीषादिमहाभागवतानुष्ठितव्रतधारिणाः निखिलवेदवेदान्तवेदाङ्गपुराणसम्प्रदायविद्यापयोधिराकासुधाकरा नितरां शोभन्ते स्म।

"प्रमाणनखनिर्भिन्नवादिमत्तेभमस्तकः।
राजते निगमान् गर्जन् श्रीपराशर केसरी।।"·

इति सर्वैः पण्डितप्रकाण्डैः संस्तूयमानसारतमविद्यायशोभूषिताः श्रीरङ्गनायक्याः श्रीरङ्गनाथस्य च नितान्तं सुतनिर्विशेषमानन्दममन्दं जनयामासुः।

श्रीपराशरभट्टार्याणां विवाहोदन्तः -

गोविन्दभट्टार्यपरमानुग्रहविशेषादधिगतनानाविद्याप्रपञ्चाः श्रीपराशरभट्टार्याः परिणयोचितां दशाम् अधिजग्मुरिति एतेषां समानशीलवयोवृत्तां कन्यां कथं जानीयामिति स्वाशक्ततां निवेद्यमानेषु

वैराग्यधनेषु पितृषु श्रीकूरेशमिश्रेषु भगवान् भष्यकार: श्रीरामानुजयतिचन्द्रमा: श्रीपराशरभट्टार्येभ्य: यदि वयं महापूर्ण [पेरियनन्बि] महोदयानां देहसम्बन्धिनां विलक्षणभागवतोत्तमवंशात् कन्यां ग्रहीष्याम:, तदा ब्राह्मणत्वश्रीवैष्णवत्वयोश्च न प्रत्यवायो भविता इत्यादिशु:। श्रीरामानुजार्यदिव्याज्ञया कूरेशदम्पती भगवद्रामानुजार्यान् पुरोधाय महापूर्णभागवतकुलमुपेत्य कन्यार्थं मयाचेताम्। परन्तु महापूर्णा: भट्टार्याणां महोत्कृष्ट्यं, दिव्यमाभिजात्यं महाकुलीनतां आत्मन: स्वरूपयोग्यतादीश्च विचिन्त्य अपचारो भवेदिति महासंस्कारेण नाङ्गीचक्रु:। कूरेशदम्पती कमप्यनिर्वचनीयां बाधामनुभवन्त: प्रत्याजग्मतु:। कदाचित् आण्डाल्देवी स्वदयितं प्रणम्य एवमवादीत्। "अयि प्राणवल्लभ ! तनयावमू विवाहमङ्गळ-योग्यावभूताम्। युक्तवयस्कौ विराजेते। भवन्त: किमर्थं तूष्णीका: भवन्ति? एतदयुक्तम्" इति हि जगाद। तदनु कूरेशा: स्वदयितां वीक्ष्य "पवित्रे ! जगतां नाथ: न: श्रीरङ्गनाथ:। वयं पारतन्त्र्ये स्म:। स तु यजमानी, जगत्कुटुम्बी। एतौ कुमारौ भगवत: प्रसादरूपौ खलु। नवविधसम्बन्धयुक्त: जीवलोक इति नाश्रावि? अतो मास्म प्रतीपं गम:" इति समाधाय, जगदेकबन्धो: श्रीरङ्गशायिन: मन्दिरमुपेत्य पुत्रयो: उद्वाहविषये स्वाशक्ततां निवेदयामास। तच्छ्रुत्वा दीनबन्धु:, दयासिन्धु: शुचिस्मित: एवमुक्तवान् हे भक्ताग्रणी:! मा चिन्तय स्मराम्यहं मदीयां प्रतिज्ञाम्। मद्भक्तस्य योगक्षेमं वहाम्यहम्। पराशरभट्टारका: मदीया पुत्रप्रवरा:। तेषां जीवनरेखां स्वसङ्कल्पविधानेनैव विरचयामि। भवन्त: निमित्तमात्रा: भवन्तु।" इत्युपदिश्य प्राहिणुवन्। तस्मिन्नेव रात्रौ महापूर्णबन्धुजनेभ्य: स्वदिव्यमङ्गळविग्रहसौन्दर्यं प्रदर्श्य "अस्मत् प्रियपुत्राय पराशरार्याय कन्यादानं विधेहि। इमां मदीयामाज्ञां पालय। श्रेयो भविता।" इत्याज्ञप्तवान्। परेद्यवि ब्रह्ममुहूर्ते उत्थाय हरिं चिन्तयन्त: गुरुपरम्परां चानुसन्दधाना: परमानन्दतुन्दिला: ते महापूर्णबन्धुजाना: भक्तिपुरस्सरं कूरेशमिश्रदिव्यगेहं प्रस्थाय "श्रीमतां कूरेशात्मजानां दिव्यमहिमानं बहुवारं प्राशंसन्। रङ्गबन्धो: दिव्याज्ञामपि निवेदयामासु:।

श्रीपराशरभट्टार्याः श्रीरङ्गराजस्य प्रियतनूजाः इति स्वयमेव रङ्गपतिः प्रकटीचकारेति परमाश्चर्य एव। अतः वयं कन्यके समर्पयामः इति वदन्तः श्रीकूरेशतनयेभ्यः भट्टपादेभ्यः अक्कच्चि, मन्नि नाम्न्यौ द्वे अपि कन्यारत्ने धारापुरस्सरं समर्पितवन्तः। कृतकृत्या भवाम इति धन्या भवाम इति तृप्ताः सञ्जाताः। अहो भगवतः सङ्कल्पः इति सर्वेऽप्यानन्दमभजन्। अत्र विवाहसमये श्रीपराशरभट्टार्याणां वयः प्रायशः षोडश अथवा सप्तदश वर्षाः वा भवेयुः। तस्मिन्नेव समये श्रीरङ्गदेवालयोपरि राज्ञामन्धशासनं समापतितम्। रामानुजार्याः वैमनस्यमनुभूताः। श्रीरङ्गाद्बहिरागत्य [मेल्कोटे] कुत्रापि विजययात्रायामवसन्निति चारित्रकवचनम्। इत्थं श्रीपराशराः वेदोक्त-प्रकारेण गार्हस्थधर्मं परिपालयन्तः श्रीवैष्णवश्रद्धां, भागवतनिष्ठां, परमां च भक्तिं प्रदर्शयन्तः भगवद्रामानुजसंयमीन्द्रहृदयाविष्करणैकदीक्षाः विविधासु महासभासु अशेषविद्वज्जनगोष्ठीषु स्वाश्रितान् अनुगृह्णन्तः कालक्षेपं कुर्वन्तः श्रीरङ्गनाथस्य दिव्यानुग्रहपात्राः सञ्जाताः।

तीर्थवासिपरिचयः -

कदाचित् गोविन्दपादचञ्चरीकेषु श्रीपराशरार्येषु वैष्णवदर्शननिर्वहत्सु तीर्थयात्रापरो कश्चनविप्रः दर्शनसार्वभौमान् भट्टार्यान् पण्डितभक्ताग्रगण्यविद्वद्भिः परिवृतान् साक्षात् विष्णोस्तत्त्वं व्याकुर्वाणान् पराशरमिव स्थितान् श्रीपराशरान् दृष्ट्वा परमं विस्मयं प्राप्तवान् । भट्टार्याणां व्याख्यानपद्धतिं गोष्ठीवैभवं शिष्याणां पारवश्यस्थितिं, सकलकल्याणगुणगणगरिष्ठस्य श्रीमन्नारायणस्य शास्त्रयोनित्वजगत्कारणत्वादिविशेषान् संस्कृतद्रविडीभिः संहिताभिः निरूप्यमाणवैखरीं वेदवेदाङ्गतर्कव्याकरणादिकौशलं च दृष्ट्वा, श्रुत्वा, साष्टाङ्गं भूमौ निपत्य प्रणनाम । स्वप्रवरां निवेदयन् एवं विज्ञापयामास। अयि पराशरार्य ! विजयी भव ! वेदान्त्यभिधानः कश्चित् महाविद्वान् अप्रतिहतप्रभावो राराजते। ये च भवन्तमिव शिष्यपरिवृढाः

सरस्वतीकटाक्षलब्धनिखिलशात्ररहस्यज्ञा: सर्वोत्कृष्टेन पण्डितान् पराजयते। भवन्तमिदानीं दृष्ट्वा स्मरामि तं वेदान्तिनम् इति साश्चर्यमुवाच। भट्टार्यस्तु आश्चर्यपरवशस्य तस्य भूसुरस्य वचनानि श्रुत्वा स्मिताननाः एवमूचुः। अयि तीर्थवासिन् ! विप्रोत्तम ! स्वस्ति तेऽस्तु। भवन्तः कावेरीमवगाह्य श्रीरङ्गनाथं दर्शयित्वा धन्याः सञ्जाताः इति महान् मे प्रमोदः। भवन्तः वार्तालापवेलायां वेदान्तिनः विद्यावैभवं प्रशशंसुः। आश्चर्यम् किं तादृशो विपश्चित् कश्चित् तिष्ठति? कदा वास्माकं सम्मेलनं रङ्गशायी कल्पयिष्यति? तस्मै शास्त्रचर्चां कदा वा निर्वहामि, कदा वा तत्समयो मय्यापततीति निरीक्षां करोमि? इति विज्ञापयेति, तस्मै विप्राय प्रोवाचुः। तीर्थवासी[1] सविपश्चित् स्वकीयं पश्चिमं देशं मेल्नाडु गत्वा नगरस्थान् वेदान्तिमहोदयान् दृष्ट्वा एवं निवेदयामासुः। श्रीमन् वेदान्तिदिव्यनामधेय ! जयीभव ! श्रीरङ्गराज-कृपा त्वयि विलसतु। इदं चोच्यमानं पराशरोदन्तं शृणुष्व"। यथा भवन्तः सकलविद्यासु विनीताः तेऽपि सर्वमहान्तः भवन्तमपि सर्वधातिशेरत इति सविनयमुक्तवान् । वेदान्तिनः साश्चर्यं तमूचुः। "हे बाडब ! भणतु कोऽयं पराशरार्यः? स तु कथं कालं यापयति? कस्य वा नयनानन्दः? क्व वा पूर्वमुषितम्? कियद्वा वयः? कथं शास्त्राणां परिचयः? पितरौ किमभिधानौ? शास्त्रेषु कियान् वा परिचयः? गुरवः कथं भूताः? तेषां तपः कीदृक्? किं योगपुरुषाः वा? कथमस्ति तेषां आध्यात्मिकं जीवनम्? उपास्यमानं दैवतं किम्? उपास्यमानः मन्त्रः कः? तेषां निष्ठा कीदृशी? इत्यादिप्रश्नान् पप्रच्छुः शरपरम्परासदृशान्। तदनु तीर्थवासी सविनयमेव प्रत्यवादीत्। हे ! वेदान्तिन् ! भगवतः श्रीरङ्गनाथस्य महिमानं दिव्यसूरिगाथालोलुपो भवति। सर्वे जानन्त्येव। निरन्तरं स भगवान् तत्र अष्टाक्षरप्रवणाः महाभागवतोत्तमाः लसदूर्ध्वपुण्ड्राः विष्णुसारूप्याः सात्विकजनाः पवित्रीकुर्वन्ति। नित्यसूरिणः वैकुण्ठाख्ये दिव्यलोके सञ्चरन्तीति शृणुमः। तत् प्रत्यक्षेण

---

[1] तीर्थवासी कः इति तस्य नाम ग्रन्थेषु नोपलभ्यते

अत्र दर्शयामः। सर्वेऽपि भगवद्रामानुजभक्तिसिद्धान्तं शरणागतितत्त्वम् अनुष्ठानपर्यन्तं कुर्वन्तः नितरां शोभन्ते । तीर्थवासी जनोऽयं यदा गतवान् तदैव श्रीमद्रामानुजाचार्याणामनन्तरं कश्चन युवा आशिष्ठो द्रढिष्ठो बलिष्ठः भगवद्भक्तिभूयिष्ठः रराजते। ते च परमवैराग्यवतां भगवद्रामानुजसंयमीन्द्राणामनुग्रहपात्रेष्वग्रगण्यानां · विद्वत्तल्लजानां श्रीकूरेशमिश्राणां प्रियतनूजाः इति, तानेव श्रीरङ्गनाथः स्वदत्तपुत्रानिव स्वीचकारेति शृणुमः। बालोऽपि ज्ञानवृद्धाः, स्वतन्त्रोऽपि रामानुजसिद्धान्तपारतन्त्र्याः, मूर्तीभूतब्रह्मवर्चापि दासोऽस्मीति विनयं प्रकटयन्ति। सर्वदा पूर्वाचार्यश्रीसूक्तिसुधां विकिरन्तः भगवते श्रीरङ्गनाथायापि परमानन्दमुपजनयन्ति। ते च श्रीरङ्गमहाक्षेत्रे भगवतः दिव्यमहिषीभिः दिव्यायतने मण्डपे उपलालिताः दिव्यशिशवः श्रीरङ्गनाथस्य दत्तपुत्रास्सन्तः इति, भगवतः प्रसादान् स्वीकृत्यैव देहधारणं कृतवन्तः इति, शास्त्रेष्वप्रतिहतमगाधं पाण्डित्यं स्वपितृ-पादेभ्यः एवं श्रीगोविन्दभट्टर्नामधेयेभ्यः गुरुजनेभ्यः अधिगतवन्त इति ते न केवलं ज्ञानसम्पन्नाः अपि तु अनुष्ठानेऽपि महाश्रद्धाळवः, नारायणमन्त्रोपासकाः श्रीवैष्णवसिंहासने भगवता रामानुजाचार्यवर्येणैव निर्वाहकपदव्यां नियुक्ताः इति ते च मधुरमधुरफणतयः सर्वदा सर्वत्र तमेव श्रीरङ्गराजं चराचरभूतेषु पश्यन्तीति जनोक्तिः। तादृशान् महाभागवतोत्तमान् विद्याविनयसम्पन्नान् तपोयुक्तान् दृष्ट्वा मदीयं जन्म साफल्यमभवदिति भाग्यवानभवमिति धन्यत्वमभजमिति सदृढं विश्वसिमि। ते च श्रीचरणाः भवन्तं दिदृक्षवः प्रतीक्षन्ते" इत्युक्त्वा विरमाम। वेदान्तिनः सर्वमिदं वृत्तान्तं श्रुत्वा अङ्कुशाहतमदगज इवाखिद्यत। विशाले भारते मामभिरोद्धुं न कश्चिदस्तीति मदीयः दृढतरविश्वासः। अत एव षण्णामपि दर्शनानां प्रतिनिधिरूपेण षट्पीठानि कल्पयित्वा तेषामुपरि समासीनः निर्भयत्वेन सुखं वसामि। अधुना तु कश्चित् विष्णुपरायणः श्रीपराशरभट्टाख्यः मत्तोऽपि विद्वानिति भूसुरः विनासूयां व्यनक्ति, इति मनसि भावयामास। ततः प्रभृति वेदान्तिहृदये कापि चिन्ता उदियाय। कदाचित् स तीर्थवासी पुनः

श्रीरङ्गमहाक्षेत्रमागत्य भागवतगोष्ठ्यां विराजमानं हयग्रीवावतारमिव नयनयोः भ्राजमानं भट्टार्यमहाशयं प्राप्य प्रणिपत्य सविनयं तस्थौ। तदनु भट्टार्याः तं परिज्ञाय, सुचिस्मितेन प्रसन्नवदनेन च "अयि तीर्थवासिन् ! अपि कुशली भवान्। किं परवासुदेवदर्शन भाग्यमभजः? अपि भवतां वेदान्तिनः कुशलिनः। सर्वदेश विद्वज्जनान् भवान् जानाति किल। विदुषां विशेषान् श्रावयेति प्रार्थमानेषु भट्टार्येषु स महीसुरः एवं जगाद - "स्वामिन् ! श्रीरङ्गराजमानसपुत्र ! विजयी भव! स्वस्ति तेऽस्तु। भवतां दर्शनमेवास्माकं श्रेयसे भूयसे भवेदित्यत्र नास्ति संशयः। यदा वेदान्तिनः सन्निधिमुपागमम्, ते च श्रीरङ्ग-विशेषान् भवतां पाण्डित्यवैखरीं विश्वतोमुखां च श्रुत्वा मोहमवापुः" इति, तदनु भट्टार्याः तं भूदेवमेवममोचन्। "हे विप्र! भवान् मदीयं शास्त्रविपश्चित्त्वमेव कथितवान्। परन्तु किम् अस्मत्कुलधनायमानां[1] श्रीमहादण्डकरूपां महाविद्यां प्रति नावादीः? इति दरकोपं प्रादर्शयन्। तदनु भूसुरः प्रणम्य स्वपुरं ययौ।

अथ कदाचित् स तीर्थवासी विप्रेन्द्रः वेदान्तिसकाशमेत्य सर्वशास्त्रेषु भवद्भिः तुल्याः अपि श्रीमहादण्डकविद्याभूषिताः श्रीपराशरभट्टार्या इति निवेदयामास। तच्छ्रुत्वा वेदान्ति महाभागाः किमेतत् श्रीमहादण्डकम्? अस्य शब्दस्यैवार्थो न ज्ञायते। तस्यां महाविद्यायां भट्टार्याः निष्णाताः इति विप्रो वदति। नाहमद्यावधि तन्महादण्डकम् जानामि। अम्हो! श्रीपराशरभट्टार्याणां वैदुष्यम् इति मनस्यचिन्तयन्। तत्र श्रीरङ्गे श्रीपराशरार्याः भगवतः भगवद्रामानुजाचार्यवर्याज्ञां, वेदान्तिनं विविधतन्त्रपारगम् अस्मद्दर्शनानुकूलं परिवर्तयेति वाचमवश्यं परिपालयितुमुद्युक्ताः, शेषशायिनः श्रीरङ्ग-भर्तुः सन्निधिमुपेत्य अञ्जलिबद्धाः - "हे सर्वभूतहृद्देशवास! विश्वरूप! वेदान्तिनं विशिष्टाद्वैतमतप्रवर्तकाग्रगण्यं कर्तुमनुगृहाण। तद्देशं गन्तुं

---

1 तिरुनेडुन्दाण्डकम्

मह्यमनुज्ञां प्रसादयेति भक्त्या प्रार्थयामासुः। तत्प्रार्थनमङ्गीकृत्य श्रीरङ्गेन्दुः "तथाऽस्तु" इत्यनुज्ञां शीघ्रगमनाय च प्रसादयामास। यथा सर्वे लोकाः श्रीपराशभट्टार्याः श्रीरङ्गेन्दोः दत्तपुत्राः इति जानीयुः तथा दिव्याभरणदिव्यच्छत्रदिव्यतौर्यत्रिकपरिजनपरिच्छदादिसंविधानेन जैत्र-यात्रां कर्तुं च व्यवस्थां प्राकल्पयत्। भट्टार्याः श्रीरङ्गनाथस्य तीर्थशेषांशुकश्रीशठारिमाल्यादिकं महता सन्तोषेण स्वीकृताः स्वस्ति-वाचकमन्त्रान् पठन्तः श्रीरङ्गनाथस्य जयोस्त्विति उच्चैः घोषयन्तः परमभागवतानां श्रीशठारिनाथमुनि-यामुनमुनि-रामानुजमुनि-गोविन्दार्य-कूरेशानां जयोऽस्तु विजयोस्तु इति, विशिष्टाद्वैतसिद्धान्तः विजयते-तरामिति मङ्गळध्वनिभिः पौरजानपदैश्च संस्तूयमान दिव्यकीर्तयः दिव्यां च शिबिकामारुह्य हृत्पुण्डरीके पुण्डरीकाक्षं पश्यन्तः प्रतस्थिरे।

यदुशैलसन्दर्शनम् -

श्रीमन्तः पराशरार्याः भगवतो नारायणस्य दिव्यप्रबन्धानु-सन्धानेन गिरिगह्वरनदीनदकाननानि तीर्त्वा रमणीयां च प्रकृतिं हर्षोत्फुल्ललोचनाभ्यां पश्यन्तः सर्वलोकाय मङ्गळमाशंसमानाः पश्चिमे देशे कावेरीतरङ्गिणीतीरग्रामं शिरिपुत्तूर्नामकं प्राविशन्। यत्र च महाभक्तावतंसाः भागवतनिष्ठाविशिष्ठाः श्रीशैलानन्तार्याः (अनन्ताळ्वान् नान्मा प्रसिद्धाः) तं च ग्राममलङ्कुर्वन्ति स्म। श्रीपराशराः मेलुकोटं प्रति गच्छन्तः अनेन पथा समागता इति श्रीशैलान्तार्याणां कर्णपथं कापि वार्ता समागता। ते च ससम्भ्रमं कावेरीतीरं पवित्रीकुर्वतः तान् संसेव्य "अयि श्रीरङ्गराजदत्तपुत्र ! विजयीभव। ननु भवन्तः अतिसुकुमाराः खलु। कथं वा अरण्यानि नद्यः, गिरिशिखराणि च तीर्त्वा आयासपरिश्रान्ताः समागताः? न युक्तं किल भवादृशां राजाधिराजतनयानाम्। अहो कालस्य कुटिला गतिरिति बाधामनुभवन्तः कुशलादिकम् अपृच्छन्। श्रीपराशराश्च झटिति शिबिकां परित्यज्य महायोग्यानां निरन्तरं श्रियःपतिपादपद्मसमाराधनसमासादितशमदमादि-

सत्त्वगुणसम्पन्नानां श्रीशैलानन्तार्याणां श्रीपादयोः साष्टाङ्गं प्रणम्य, "अयि भागवतोत्तमाः श्रीशैलानन्तार्याः महापुरुषाः ! मयि कृपां कुर्वन्तु। रामानुजदासजनोऽयं अस्मद्गुरुदेवानां दिव्यादेशानुसारं तत्रभवन्तं वेदान्तिनं भगवद्रामानुजसिद्धान्तप्रवणं कर्तुं तान् चास्मात्सम्प्रदाये स्थापयितुं चात्र समागतोऽस्मीति, अस्याः जैत्रयात्रायाः निर्देशकाः अस्माकं श्रीरङ्गमन्दिरसुन्दरः नः कुलदैवतं श्रीरङ्गपतिरेव। नाहं कर्ता" इति सविनयं विज्ञापयामासुः। तदनु श्रीशैलानन्तार्याः "अहो! विकसितानि श्रीवैष्णवजनभागधेयानि। अस्मत्प्रपन्नपरिवृढास्समागताः" इति तान् गाढमाश्लिष्टाः एवमूचुः। "अयि श्रीकूरेशवंशप्रदीप ! भगवद्रामानुजसंयमीन्द्र ज्ञानपुत्र ! इमं मूर्तीभूतवेदराशिं दयाप्रवाहझरीविलसितं सन्ततलक्ष्मीनारायणश्रीचरणाङ्कितशिखरदेशं यादवाद्रिं प्रणमतु भवान्। यतो हि श्रीविष्वक्सेनादिनित्यसूरिणः श्रीवैकुण्ठलोकं त्यक्त्वा तिर्यक्स्थावररूपाणि धारयन्तः दिव्यार्चामूर्तिणं श्रीमन्नारायणदिव्यमङ्गळविग्रहसौन्दर्यं च सदानुभवन्ति। शिखरोऽयं सहस्रफणसदृशः साक्षात् शेषावतारः, ये चात्रागन्तुं मनसि कृतसङ्कल्पा भवन्ति तेषां पार्श्वमपि यमभटाः न भ्रमन्तीति महात्मनां वचनं न मिथ्यात्मकम्। अत एव भक्तजनाः अर्चावतारसौलभ्यमत्रानुभवन्ति। सम्प्रति भवन्तोऽपि भगवते संपत्कुमाराय मङ्गळाशासनं कृत्वा धन्या भवन्तु। भगवद्रामानुजार्याणां प्रीतिपात्रमिदं स्थानमित्युक्त्वा भट्टार्यान् सगौरवं यादवाद्रिं नीतवन्तः। तत्र भट्टार्याः कल्याणसरसि स्नानपूर्वक-पौर्वाह्णिकीं क्रियां कृतवन्तः। दिव्यमष्टाक्षरमन्त्रानुष्ठानं प्रेम्णा भक्त्या यदुगिरिनाथश्रीचरणयोः समर्पितचित्तेन कृतवन्तः। आलयपरिपालकाः अर्चकप्रमुखाश्च भट्टार्येभ्यः श्रीशठारिं समर्पितवन्तः। तदनु सर्वेभ्यो भागवतवर्येभ्यो साष्ठाङ्गं प्रणम्य लसदूर्ध्वपुण्ड्राः भट्टशेखराः दिव्यनगरीं प्राविशन्। तत्र बहुरमणीयं चतुर्मुखगोपुरं बलिपीठञ्च नमस्कृत्य सकलविद्यावाहिनीजन्मशैलं चराचरहितैषिणं गुरुरिति पदस्यैकभाजनं भगवन्तं श्रीभाष्यकारं गुरुतल्लजं रामानुजदिवाकरं प्रणिपत्य तेभ्यः

मङ्गळाशासनं सविनयं समर्पितवन्तः। तेषां पुरुषकारेण महाप्रदक्षिणं कुर्वन्तः श्रीमन्तं सहस्रारं सुदर्शनं हेतिराजं भगवतीं सर्वलोकजननीं यदुगिरिनाथदिव्यमहिषीं महालक्ष्मीञ्च पादाभिवन्दनेनाभिगम्य आनन्दमयं दिव्यविमानं च पूजयित्वा सहस्रशाखोपनिषत्समागमां द्राविडीं ब्रह्मसंहितां यो वाद्राक्षीत् तं च वकुळाभरणमुनिं तथैव चतुष्कवि-शिखमाणिं परकालदिव्यसूरिणं नमस्कृत्य, अतिसौकुमार्यशोभाविलसितं ललितं वसुदेवकुमारं सम्पत्कुमारम् आनन्दबाष्पलोचनैः पिबन्तः वारं वारं प्रणेमुः। दिव्यसूरिभिः प्रणीतान् "तिरुप्पल्लाण्डु" मङ्गळाशासन-प्रबन्धान् प्रेम्णानुसन्दधानाः पुनः तमेव भगवन्तम् आपादचूडमनुभूय शेषांशुकमाल्यादीः स्वीकृत्य सर्वेभ्यः स्वीकृतमङ्ळकामनाः वेदान्तिसमीपं (प्रापुः) प्रतस्थिरे। यत्र चाखण्डपाण्डित्यविद्यावैभवेनावधीरितसमस्त-विद्वज्जनः, यत्र च पाण्डित्यवीर्येण च महाट्टहासं परिभवं च सर्वमतानुयायिनः भजन्ते, यत्र चाहमेव ब्रह्मेति प्रगल्भ्य वचांसि ढक्कानिनादरूपेण ढमढमायमाणानि सात्त्विकजनाक्षमाणि भवन्ति, यत्र च यदा वा भगवान् वेदान्तिदन्तभङ्गः करिष्यामीति प्रतीक्षन्ते।

श्रीपराशरार्यैः वेदान्तिनः सकाशे वादभिक्षायाचनम् -

अथ श्रीपराशरार्येषु शिबिकायां साक्षात् हयग्रीवमूर्तिरिव प्रकाशमानेषु सत्सु, जयीभव! कूरेशनन्दन! सकलशास्त्रपारंगत! विजयीभव! वैष्णवदिव्यतेजोविशाल! जय जय श्रीरङ्गनाथदत्तपुत्र! हयग्रीवावतार! जय भगवद्रामानुजशरणागतिदिव्यतत्त्वप्रचारैकलक्ष्य! जङ्गमशास्त्रनिकुरुम्बरूप! जय कुकविमदध्वान्तनिरासवासरपते! जय द्वयमन्त्रानुष्ठाननिरत! जयीभव! दिग्विजयिभवेति जयजयारावाः मार्ताण्डमण्डलविस्तृताः प्रतिध्वनिताः। छत्रचामरतालवृन्तादिभि-रलङ्कृताः भट्टार्याः राजाधिराजवत् सकलदिव्याभरणभूषिताः रङ्गबन्धोः पुत्रा इमे दर्शनीयाः इति पण्डितप्रकाण्डाः अहमहमिक-योत्पत्योत्पत्य तानद्राक्षुः। तदनु द्वौ ब्रह्माणौ तेषामभिमुखमेत्य के वा

भवन्तः? इयताडम्बरेण क्व नु गच्छन्ति? इति पप्रच्छतुः। श्रीभट्टार्यस्तु "अयि भूसुरौ! अहं श्रीरङ्गराजचरणपादसेवकः, श्रीपराशरभट्ट इति मामाह्वयन्ति। अत्र स्थितान् तत्रभवतः श्रीवेदान्तिनं तर्कशास्त्रादिषु प्रतिरोद्धुं जिगीषया श्रीरङ्गनाम महाक्षेत्रात् आगतोऽस्मि इति प्रत्यवदन्। विप्रौ च विहस्य 'अयि श्रीरङ्गपण्डिताः! अनेन प्रकारेण भवतां वेदान्तिदर्शनं न कदापि लभेत। यतो हि ते सदैव स्वगृहाभ्यन्तर एव स्थित्वा व्यवहारमाचरन्ति। बहिः तेषां प्रियशिष्याः उद्दण्डपाण्डित्य-भूयिष्ठाः तिष्ठन्तः सर्वानपि पण्डितान् द्वार एव पराजयन्ते। अन्तः प्रवेशाय न कदापि अनुज्ञां दास्यन्तीति विशेषः इति प्रोवाचतुः। तदनु भट्टार्याः तानेव कमपि उपायं वदतामिति सविनयं प्रोवाचुः । तावेवं पुनः समादधताम्। "अयि वैष्णवोत्तमाः। वेदान्तिनः लक्ष्मीसम्पन्नाः। महाधनिनश्च सन्ति। प्रत्यहं वेदविद्भ्यो ब्राह्मणेभ्यः अन्नदानेन सन्तर्पणं विधास्यन्ति। भवन्त अपि यदि परिवर्तितवेषाः भोजनार्थं गच्छेयुः, तदनु अवश्यमन्तःपुरे स्थितान् तान् द्रष्टुं पारयेयुः इति निवेदितवन्तौ स्तः। आवामपि तत्रैव गच्छाव इति, भवन्तः स्वयमेतत् सन्नाहादिकं विहाय भोजनशालायामागच्छन्तु। तत्रैव प्रतीक्षमाणास्तिष्ठन्तु। अवश्यं भवतां वाञ्छा सम्पूर्णा भविष्यतीति स्पष्टमुक्त्वा गतवन्तौ । तदनु श्रीकूरेशतनयाः ब्राह्मणाभ्यामुपदिष्टमार्ग एव सुलभतम इति भावयन्तः, स्वपरिच्छदं नगराद्बहिरेव निवेश्य स्वाभरणजालानि विहाय अश्वत्थ-पत्रभाजनं स्वीकृत्य, काषायवसनं परिधाय, शैलूषवत् अनन्तार्यद्वितीयाः सत्राशनैस्साकं भोजनशालाभ्यन्तरं प्राविक्षन्। वेदान्तिनः समाराधन-पर्यवेक्षणं कृतवन्तः कस्मिंश्चित् महामण्टपे षट्पीठयुतं प्रोन्नतमासन-मध्यतिष्ठन्। सर्वेऽपि भोजनार्थमुपाविशन् । परन्तु भट्टार्याः वेदान्तपीठसमीपमुपगच्छन्ति स्म। वेदान्तिनः तान् दृष्ट्वा "अयि परिव्राट्! भवानपि भोजनं तत्रोपविश्य स्वीकुर्वन्तु। किमर्थं मत्समीप-मागमनम्?" इति साश्चर्यमुक्तवन्तः। तदा भट्टार्याः "अयि भाग्यवन्! स्वस्ति तेऽस्तु। नाहमन्नभिक्षुः। वादभिक्षां याचे। कृपयाऽनुगृण्हन्तु" इति समादधुः। तस्य वाक्यं श्रुत्वा, यतिवरान् दृष्ट्वा वेदान्ती किञ्चित्

बिभाय। कदाचित् श्रीरङ्गमहाक्षेत्रादागत्य कश्चन तीर्थवासी मह्यमबोधयत् पराशरभट्टार्यान् प्रति प्रायशः एते युवानः भट्टार्या भवेयुः। नो चेत् मत्समीपमागत्य वादभिक्षां धैर्येण कथं पृच्छति? इति मन्वानः, अस्तु नाम! एवं पृच्छामि, इति मत्वा "अयि! काषायवसन! किं भवान् श्रीरङ्गक्षेत्रवासिनः श्रीपराशरभट्टार्यः भवथ?" इति संशयपूर्वकमप्राष्टुः। ते च "ओम्" इति वदन्तः पर्णपात्रं काषाय-कमण्डलं दूरतः तत्यजुः। "भो वेदान्ति महाशया! वयमेव श्रीरङ्ग-क्षेत्रवासिनः। श्रीमतां भगवद्रामानुजाचार्याणां पाददासाः, भवन्तं वादार्थं याचामहे।" इति प्रोवाचुः। वेदान्तिनः अपि भट्टार्यचातुरीं प्रत्यक्षेण दृष्ट्वा मुमुदिरे। भट्टार्याणां निखिलशास्त्रपाण्डित्यगरिमाणं विद्यावैशद्यं च प्रत्यक्षीकर्तुं सन्नद्धाऽऽभवन्। तयोः विद्वद्वन्तिनोः कलहायमानयोः नव दिनानि क्षणानीव व्यतीतानि । तथापि तयोर्वादो न समाप्तः। अथ दशमे दिने [आन्वीक्षकीसचिवाः] भट्टार्याः मायावादिसिद्धान्तं शतधा खण्डयित्वा विशिष्टाद्वैतसिद्धान्तध्वजस्थापनमकुर्वन्। वादनवेलायां श्रीपराशराः तर्कप्रमाणसहकृतग्रन्थसहस्रैः महावातसमुद्भूततुङ्गतरङ्ग-पूर्णचन्द्रोदयवेलाविजृम्भितमहासागरायमाणाः नवनवयुक्तिभिः वेदप्रमाणैः परंब्रह्मणः कल्याणगुणगणवैविध्यं, तत्त्वमस्यादिमहावाक्यानि विशिष्टा-द्वैतसिद्धान्तविवरणात्मकान्येवेति, प्रत्यक्षानुमानोपमानशब्दप्रमाणानि विशिष्टबोधकजनकान्येवेति न कदापि निर्विशेषचिन्मात्रब्रह्मबोधक-जनकानि भवन्तीति, निर्गुणश्रुतयः हेयगुणराहित्यमेव कथयन्तीति, अतः अनन्तकल्याणगुणगणविशिष्टः परमात्मा श्रीमन्नारायण एक एवेति उच्चैः सिंहकिशोर इव जगर्जुः। एवं मायावादभुजङ्गगारुडायमाना प्रमाणनखनिर्भिन्नवादिमत्तेभमस्तकाः पराशरकेसरिणः निगमागमप्रमाण-सिद्धान्तान् गर्जन्तः कदाचित् यामुनमुनिः इव, कदाचित् नाथमनिः इव, कदाचित् साक्षात् श्रीभगवद्रामानुजाचार्य इव सिद्धान्तस्थापनं महता वैभवेणाकार्षुः। श्रियःपतेः तत्त्वं सप्रमाणं व्याख्यातॄन् श्रीपराशरान् साश्चर्यं पश्यन्तः, श्रीवेदान्तिनः मूकाः अनिमेषाः चित्रार्पिता इव प्रतिमायमाणा स्तब्धाश्चाभवन्। तत्र भवतां श्रीभट्टार्याणामपार-

पाण्डित्यमाकलयन्तः वेदान्तिनः झटिति ससम्भ्रमुत्थाय वेपमानाः, "अयि! विशिष्टाद्वैतसिद्धान्तसिंहकिशोर! क्षमध्वम्। भवन्तं मानवमात्र इत्येव भावयन् वादस्पर्धायां महान्तं साहसमकरवम्। वस्तुतः श्रीरङ्गनाथ परब्रह्मणः भवताञ्च नान्तरमस्ति। भगवान् श्रीरङ्गराजः शयानाः देवताः भवन्तस्तु जङ्गमदेवता, इत्येकमेव वाक्यमुक्त्वा दण्डवत्साष्टांगं श्रीपराशरार्यश्रीचरणयोः पपात। शनैः उत्थाय श्रीपराशरान् दृष्ट्वा "अयि! नारायणतत्त्वज्ञ! श्रीरङ्गराजसाम्राज्ययुवराज! पण्डितराज! कृपया दीनं दासजनं मां भवत्कटाक्षपात्रयोग्यं कुरुध्वम्। इतः प्रभृति गर्वमपहाय श्रीमतां पादार्चको भवामि" इति निवेदयामासुः। भगवतः श्रीरङ्गनाथस्य कृपया स्वागमनप्रयोजनं साधितमिति परमानन्दं भजन्तः भट्टार्याः वेदान्तिनां प्रार्थनामङ्गीकृत्य तेभ्यः पञ्च-संस्कारान्[1] विकीर्य श्रीवैष्णवत्वमनुजगृः। तदनु वेदान्तिनः भुजयोः शङ्खचक्रलाञ्छनं, द्वादशोर्ध्वपुण्ड्रधारणं, श्रीरामानुजदास इति विशिष्टं नाम, श्रीमदष्टाक्षर-महामन्त्रस्वीकरणं, श्रीमन्नारायणदिव्यमङ्गळार्चनमिति पञ्चविधान् संस्कारान् श्रीपराशरभट्टार्यगुरुभिरुपदिष्टमार्गेण स्वीकृतवन्तः आत्मानं धन्यतमं प्रकटयामासुः। तदनु श्रीपराशरभट्टार्याः हारीतसंहितोक्त-प्रकारेण -

"प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः ।
प्राप्त्युपायं फलं प्राप्तेः तथा प्राप्तिविरोधि च ।।
वदन्ति सकला वेदाः सेतिहासपुराणकाः ।
मुनयश्च महात्मानो वेदवेदार्थवेदिनः।।"

इति अर्थपञ्चकज्ञानम्, अनन्यार्हशेषत्वम्, अनन्यशरणत्वम्, अनन्य-भोग्यत्वं चेति आकारत्रयज्ञानमनुगृहीतवन्तः। एवमेव -

"अर्थपञ्चकतत्त्वज्ञाः पञ्चसंस्कारसंस्कृताः।
आकारत्रयसम्पन्नाः महाभागवताः स्मृताः।।"

---

[1] "संस्काराः पञ्च कर्तव्याः उपनीतद्विजन्मनाम्।
तापःपुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः.." {काश्यपसंहिता}

इति पराशरोक्तिः विशदयित्वा तेभ्यः महाभागवतलक्षणमपि उपादिशन्। पुनः स्वमधुरवाग्भिः अयि! रामानुजदास! भागवत! शृणुत - यूयं स्वत एव शास्त्रमर्मज्ञाः । अतो नोपदेष्टव्यमिति विश्वसिमि। विशिष्टाद्वैतमेव सत्यमिति विश्वसिहि। मायावादकुतर्कान् दूरतः परित्यजत। अशरण्यशरण्यं श्रीमन्नारायणं शरणं प्रपद्य जगद्गुरूणां कृपामात्रप्रसन्नार्याणां भगवद्रामानुजार्यसंयमीन्द्राणां सिद्धान्तमेव निर्वहन्तः सन्मार्गे वर्तध्वम्।" इत्याज्ञाप्य तेभ्यः परमभागवतानां दिव्यसूरिणां चरितं दिव्यप्रबन्धाध्ययनाय चानुज्ञां दत्वा, श्रीरङ्गप्रयाणाय सन्नद्धाश्चाभवन्। अथ वेदान्तिनः स्वाचार्याय श्रीपराशरार्याय अमूल्यरत्नाभरणानि, स्रक्चन्दनादीनि धनानि च सविनयं समर्पितवन्तः। तदनु भट्टार्याः तेभ्यः वेदान्तिभ्यः "सदैव भवन्तः श्रीपराङ्कुश-परकालादि-दिव्यसूरिप्रणीतान् दिव्यप्रबन्धादीन् अध्ययनं कुरुतेति, एवमेव श्रीवैष्णवतदीयाराधनं च विधेहि" इति पुनराज्ञापयामासुः। अनन्तार्यैस्साकं प्रयान्तं तं देशिकमनुसरन्तः वेदान्तिनः नगराद्-बहिस्थितां श्रीपराशरभट्टार्याणां छत्रचामरादिमहावैभवयुक्तां दिव्यचमूं च दृष्ट्वा सानन्दमश्रुविमुञ्चन्तः। अहो! महाश्चर्यम्! एते मय्यनुकम्पया सर्वक्लेशमगणयित्वा नदीनदगिरिकाननानि चातिक्रम्य इमां दासजना-नधिष्ठितां भूमिमागतवन्तः । अहो! श्रीरङ्गनाथस्यानुकम्प्या कस्मिन् कदा वा पततीति को वा जानीयात्। अनादिकालप्रवृत्तां विपरीतज्ञान-जननीं कर्मवसनां च दूरीकर्तुं कृपणवेषमपि स्वीकृत्य, सत्र-भोजिभिस्साकम् अमर्यादं मामुपस्थितवन्तः। इमां बाधां कथं वा सहे इति भट्टार्यदेशिकानां विरहमनुभवितुमक्षमाः यथा भरतः रामपादयोः आत्मानं समर्पयामास, तद्वत् तेषां श्रीचरणयोः शरणमभजत्। भट्टार्याः तान् बहुप्रकारमाश्वासयामासुः भागवततदीयाराधनया भगवदाराधनं कुर्वन्तः सुखेनाध्वम्' इत्युपदिश्य जयजयरवैः यदुगिरिक्षेत्रं दिदृक्षवः पुनः तं दिव्यं धाम जग्मुः । अनन्तार्यैस्साकमनवरतविराजमानश्रीनारसिंह-वराहसीताकारुण्यज्ञानाश्वत्थपञ्चमहाभागवतश्वेतमृत्तिका परिधानशिला इति च प्रतीतानि सप्तक्षेत्राणि वेदपुष्करिणी, दर्भतीर्थं, पलाशतीर्थम्,

पद्मतीर्थम्, यादवमहानदी, वैकुण्ठगङ्गातीर्थम्, नारायणतीर्थम्, मैत्रेयकुण्डलीतीर्थञ्चेति एतानि संसेव्य अवगाह्य च कल्याणीतीर्थे च स्नात्वा, द्वादशोर्ध्वपुण्ड्रांश्च धृत्वा, सेवापरिपटीमनुसरन् तीर्थप्रसादादिकं स्वीकृत्य, भगवते समस्तवृत्तान्तमिमं निवेद्य, शिरिपुत्तूरंनगरे तत्रभवन्तमनन्तर्यं स्थापयित्वा श्रीरङ्गचन्द्रमसः स्मरणाज्जात-तापमसहमानाः झटिति श्रीरङ्गं प्रतस्थिरे। तत्र कवेरदुहितुरङ्के दिव्यावगाहनां कृत्वा सप्तप्राकारानतिक्रम्य गुरुपरम्परावन्दनपूर्वकं जगज्जन्मादिकारणं देवदेवोत्तमं श्रीमदनन्तभोगिनिशयानं श्रीरङ्गनाथं श्रीभूनीळासमेतं सिषेविरे। श्रीरङ्गभक्तजनाः कैङ्कर्यरताः अर्चकपरिचारकवन्दिवृन्दाः श्रीरङ्गराजतनयाः निर्भिन्नपरवादि-मत्तेभमस्तकाः श्रीविशिष्टाद्वैतसिद्धान्तडिण्ढीरवाः, श्रीरङ्गजयकेतनाः समागताः इति महानन्देन मङ्गळाशासनानि प्रयुञ्जानाः मुमुदिरे। भगवता श्रीरङ्गनाथेनानुगृहीतदिव्यमहामाल्यशेषांशुकतीर्थप्रसादाः स्वमातरं आण्डाळ्देवीं सेवितुं सविनयमुपाजग्मुः। सा च दिव्यजननी स्वगर्भजनितं मुक्ताफलं शिरसि आघ्रायाशिषा अनुगृहीतवती। श्रीपराशराः विजयलक्ष्मीसमेताः भागवतगोष्ठीं यथापूर्वं निर्वहन्तः सुखमधितस्थुः।

श्रीपराशरभट्टार्यैः वेदान्तिने नञ्जीयर् इति नामानुग्रहणम् -

गच्छता कालेन कदाचित् वेदान्तिनः गृहे कल्लोलमेवमुदभूत् - "द्वौ श्रीवैष्णवौ वेदान्तिभवनमागत्य अयि मातः! क्षुधा बाधेते नौ। अतः भगवत्प्रसादं प्रददतुः" इति प्रार्थयामासतुः। तदानीं वेदान्तिनः पत्न्यौ "अयि ! श्रीवैष्णवभागवतोत्तमौ! गृहेऽस्माकं किमपि नास्ति भवद्भ्यां प्रदातुमन्नपानीयादिकम् इत्यनृतं वदन्त्यौ, तौ स्वभर्तुः समीपं प्रेषयामासतुः। वेदान्तिनः नदीस्नानं कुर्वन्तः आगताभ्यां श्रीवैष्णवाभ्यां सर्वमिदं वृत्तान्तं विदितवन्तः। स्वपत्नीभ्यामुक्तानि वचनानि अनृतपूर्वाणीति विश्वस्य, खिन्नाः ताभ्यां संकृद्ध्य महान्तं

मानसिकक्लेशमनुबभूवुः। तदनु स्वयेव ताभ्यां भगवत्प्रसादेन सरसभोजनं समर्प्य तौ बहुमानपुरस्सरं प्रेषयामासुः। ततः प्रभृति वेदान्तिनां हृदये किमपि वैराग्यमुदियाय। अहो! कालो मां कबलयति। धनयौवनमदेन कामान्धो भूत्वा रमणीयाभ्यां द्वाभ्यां भार्याभ्यां मदनतन्त्रचर्चामेव कुर्वन् महाकूपेऽवातरम्। निवृत्तिमार्गं च नास्मरम्। श्रीपराशरार्यमहानुग्रहेण किमपि नूतनं जीवनं मे भविष्यति। यतो हि

'साक्षत् नारायणो देवः कृत्वा मर्त्यमयीं तनुम्।
मग्नानुद्दरते जन्तून् कारुण्यात् शास्त्रपाणिना।।
आचार्यस्सहरिस्साक्षात् चररूपी न संशयः।' (जयाख्यसंहिता)

इति,

'समित्पाणिं श्रोत्रियं ब्रह्मनिष्ठं स गुरुमेवाभिगच्छेत्।।'

इति च वचनमनुसरन् स्वनैच्यं भावयन्तः, विरक्ताश्चाभवन्। तदनु झटिति सर्वमपि वसु त्रेधा विभज्य द्वौ भागौ पत्नीभ्यां प्रदाय अवशिष्टमेकं भागं स्वाचार्याय समर्पयितुकामाः स्वगृहं, जाये, शुभारामक्षेत्रं, धनधान्यादिकं मनसापि विहाय, सप्तप्राकारहर्म्याभ्यन्तरे शयानं श्रीरङ्गशायिनं द्रष्टुं श्रीरङ्गाभिमुखं वज्रन्तः मध्ये शिरुपुत्तूर-निवसिनो तत्र भवन्तमनन्तार्यगुरुं प्रणम्य स्वाभिप्रायं निवेदयामासुः। ते च वेदान्तिनां भक्तिं, श्रद्धाम्, अनसूयामतिं, शौचं, ज्ञानमक्रोधं, आचार्यनिष्ठां च विलोक्य अयि ! भागवत! भवन्तः अत्यन्तसुकुमाराः किमिदं रूपं युक्तम्? सन्यासाश्रमस्तु सकलापदानां निलयः, असिधाराव्रतसदृशः एव। अहो! रङ्गबन्धोः सङ्कल्पः। शरीरस्वेद-वेळायां स्नात्वा बुभुक्षुवेळायामशित्वा श्रीपराशरभट्टार्यश्रीचरणावेव शरणं प्रपद्ये इति भावयन्तं भवन्तं श्रीवैकुण्ठात् केऽपि किं च्यावयेयुः? इति बहुधा प्रशंसमानाः मूलमन्त्रे [तिरुमन्त्रे] जनित्वा द्वयमन्त्रे एधित्वा, द्वयैकनिष्ठाः भवेत इति मङ्गळाशासनमकार्षुः। भगवता आशिषं च स्वीकृत्य यतिवराः वेदान्तिनः श्रीरङ्गे कावेरी विमलोदके स्नात्वा श्रीपराशरार्यश्रीचरणौ साष्ठाङ्गं प्रणम्य स्वाभिमानरहिताः सर्वमप्यानीतं धनं यथेष्ठविनियोगार्हरूपं सविनयं समर्पितवन्तः। श्रीभट्टार्यास्तु तान्

विमत्सरान् द्वयमन्त्रस्मरणस्फुरिताधरोष्ठान् वेदान्तिमहाभागान् दृष्ट्वा प्रणम्य हर्षोत्फुल्ललोचनाः अमन्दानन्दसन्दोहतुन्दिलाः अस्मदीयाः उत्तमाश्रमिणः आगताः इति उच्चैर्वदन्तः [नम् जीयर्] गाढालिङ्गनमकुर्वन्। अतः आरभ्य वेदान्तिनां नञ्जीयर् [अस्मदीयाः यतिवराः] इति मङ्गळं नाम श्रीवैष्णवकुले प्रसिद्धिमाप। श्रीपराशर-भट्टार्यानुगृहीतदिव्यनाम्ना नञजीयर् महाशयाः विशिष्टं स्थानं च प्रापुः।

नञ्जीयर्महाशयानां परिप्रश्नः -

> तद्विद्धि पर्णिपातेन परिप्रशनेन सेवया ।
> उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।। (भ.गी. ४-३४)

इति श्रीगीताचार्यश्रीसूक्तिमनुसरन्तः नञ्जीयर्महाशयाः श्रीरङ्गराज-मानसपुत्रं साष्ठाङ्गं प्रणम्य "श्रीमन्तः श्रीरङ्गराजदत्तपुत्राः, भगवान् श्रीरङ्गराजः चन्द्रपुष्करिणीतीरे अनन्तपर्यङ्के शयानो विराजते। तत्राभिसन्धिः कश्चन विद्यते वा इति सविनयमप्राक्षुः। तदनु श्रीकूरेशनन्दनाः अयि भगवद्भक्त! नञ्जीयर् महाभाग! शृण्वन्तु। पुरा गजेन्द्रः हे नारायण पाहि पाहीति आक्रन्दनमकरोत्। तच्छ्रुत्वा अनन्तरमेव रमाजानिः त्यक्तपरिजनदिव्यायुधविशेषः तत्सरस्तीरे प्रादुरभूत् किल। अत्र तु मदाक्रन्दनात् पूर्वमेव मां कृपया परिपालयितुं यत्राहममज्जं अस्य सरसस्समीपे शयानोऽनुगृण्हाति। प्रश्नोऽयं न भवदीयबुद्धिप्रकल्पितः, किन्तु मन्मनसि गूढं स्थितं भावं भवन्मुखेनैव प्रकाशयामास। आश्चर्यं परमाश्चर्यं यत् भगवतः सर्वज्ञत्वं किमपि तत्त्वम्। भगवतः अद्भुतचर्याः सर्वाः अपि सरहस्याः भवन्तीति अस्मदर्था एवेति ज्ञानाधिका मन्यन्ते।

नञ्जीयर्महाशयानां धर्मसूक्ष्मता -

कदाचित् श्रीपराशगुरुवर्याणां पर्यङ्किकादण्डं स्वभुजे दधत्सु नञ्जीयर् महोदयेषु सत्सु, तद्विज्ञाय श्रीपराशरार्याः आः कष्टमिदम्! भवन्तः तुरीयाश्रमस्थाः यतिशिखामणयः एषा तु सपर्या सन्यासिजनविरुद्धा, न कदापि करणीयेति जगदुः। तदनु नञ्जीयर् महाशयाः "भो आचार्यदैवताः! भगवद्भागवतकैङ्कर्याभिवृध्यर्थमेव सन्यासः मया स्वीकृतः। यद्ययं वेषः मदीयाचार्यकैङ्कर्यविरोधिरूपः स्यात्तर्हि सन्यासस्यापि सन्यासं कृत्वा श्वेतवस्त्रमपि स्वीकरोमि" इति गुरुजनेभ्यः विनम्रपूर्वं विज्ञापयामासुः। आचार्यकैङ्कर्यस्य प्रतिकूलाः वर्णाश्रमधर्माः सर्वेऽपि परित्याज्याः इति एतेषामनुष्ठानैन ज्ञायते।

नञ्जीयर्महाशयानां गुरुभक्तिः -

कदाचित् श्रीरङ्गेशपुरोहिताः श्रीपराशरभट्टार्याः सेतु स्नानार्थं गच्छन्तः अध्वश्रमेणायासमुपगताः क्वचित् तिरोरधस्तात् विश्रान्तिमभिलषन्तः समीपस्थितानां नञ्जीयर् महाशयानामङ्के स्वमुत्तमाङ्गं न्यस्य शयितवन्तः।. स्वगुरुदेवानां निद्राभङ्गे न भवेदिति भक्त्या सकलामपि निशामूरुपरिवर्तनं विना स्थाणुवदचला एवातिष्ठन्त। आचार्याणां विषये दास्यानुष्ठानमेव शिष्याणां स्वरूपसिद्धिरिति ।

"निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः।
शारीरभेदैस्तव शेषतां गतैः यथोऽचितं शेष इतीरिते जनैः।।"
[स्तोत्ररत्नम्]

इति श्लोकेनोक्तशेषत्वं स्वानुष्ठानेन ज्ञापितवन्तः । अहो आचार्यविषये नञ्जीयर् माहाशयानां कैङ्कर्यनिष्ठा। इमामेव निष्ठां शिष्याः आचरणीया इति सर्वेऽपि भावयन्तः नञ्जीयर् महाशयो जीयादि-

श्रीपराशरार्येभ्यः किरातजनसपर्या:-

श्रीरङ्गराजपुरोहिताः भट्टार्याः धनुष्कोटिस्नानं भगवद्रामानुजाचार्यस्मरणपूर्वकं कृत्वा प्रतिनिवर्तमानाः सायङ्कालवेळायां कस्मिन्श्चित् कानने स्थितां किरातपल्लीमधिजग्मुः। तस्मिन् पादिरि नामके ग्रामे कस्यचित् व्याधस्य वेश्म प्रविष्टाः। वेश्मनः यजमानी किरातः, महता सन्तोषेणात्मनः आसनादुत्थाय "आः! अतिथयः समागताः। विकसितानि नो भागधेयानि" इति मत्वा भक्तियुक्तेन चेतसा मञ्चं ददौ। तदनु खट्वारूढाः श्रीपराशराः स्वशिष्यान् एवमूचुः। "भाग्यशाली अयं किरातः। अयं न जानाति अस्मद्वैभवादिकम्। तथापि सेवा निमग्नः निष्काममेवमुपचरति। उपकारस्य प्रत्युपकारः कर्तव्यः, इति धिया वा न सेवते। किन्तु अस्मद्गेहं एते अतिथयो समागताः इत्येव महाभिमानेनास्माकं परिचर्या करोति । एवं स्थिते जगतां निवासः श्रीरङ्गबन्धुः परमात्मा आत्मनोभिमानान्तरङ्गभूतं जीवं कथं वा भावयमानो भवेत्? इति। तदनु तं मृगयुमाहूय "भद्र! दिनेस्मिन् का वा वार्ताः।" इति पर्यपृच्छन्। स वनेचरः तान् प्रणम्य "अयि! सज्जनाः शृणुत अहं जीवनयात्रानिर्वहणाय प्रतिदिनमरण्यानि यथा प्रविशामि तद्वत् अद्याप्यगच्छम्। कानने च कश्चन शशशाबकमग्रहिषम्। आत्राभ्यन्तरे शशपोतस्य माता समागत्य साश्रुपातं मत्पादसमीपे पपात। अश्मह्रदया वयं तमवश्यं हन्म इति सा जननी विललाप इति संभावयन्नहं करुणाद्रचित्तस्समभवम्। तदनु जनन्याः वात्सल्यं दृष्ट्वा तं शशशाबकमुमुञ्चम्" इयमेवस्मिन् दिने प्रमुखवार्ता इति गद्गदस्वरेण वदन् विरराम। तदनु भट्टार्याः - आश्चर्यम्। "मामेकं शरणं व्रज" इति शशमात्रे को वा उपादिशत्? अरिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मना" इति कोवाऽस्ति अत्रोपदेष्टा? शशकिरातविषयेऽपि शरणागतिः सद्यः सफला बभूव। शरणागतिः क्षिप्रानुग्रहकारुणी इति वक्तुं इदमेव वृत्तं प्रत्यक्षं प्रमाणम्।" इति नञ्जीयरादि महाभागवतानुद्दिश्य उपादिशन्। ते च नितरां तुष्टिमापुः। भट्टार्याः तं किरातकमालिङ्ग्य तं श्रीरङ्गनाथकरुणाकटाक्षपात्रमकुर्वन्।

श्रीपराशरभट्टार्यैः श्रीरङ्गक्षेत्रविसर्जनम् -

श्रीपराशरभट्टार्याणां जीवनकाले [दशमशतकालान्ते][1] वीरसुन्दरब्रह्मरायो नाम राजा तस्मिन् काले श्रीरङ्गमन्दिरस्य प्राकारनिर्माणं कारयति स्म। तदा प्राकारनिर्माणावरोधो माभूदिति मत्वा महाभागवतस्य पिळ्ळै पिळ्ळै याळ्वान् महोदयस्य निकेतनोन्मूलनं कुर्वन्त्विति कर्मकारान् आज्ञापयामास। इमं च वृत्तान्तं श्रीपराशरेभ्यः तत्रस्थाः निवेदयामासुः। श्रीपराशरभट्टार्याः झटिति तं भूपमेत्य "अयि क्ष्मापाल! स्वस्ति तेऽस्तु। भवतां प्राकारः भगवन्तं रक्षति वा? उताहो भागवतानां मङ्गळाशासनं वेति वदन्तः पूर्वकालिकीं श्रीपरकालदिव्य-सूरिप्राकारनिर्माणकथामुदाहृतवन्तो एवमूचुः। कदाचित् महाभागवतः चतुष्कविः परकालदिव्यसूरिः भगवते श्रीरङ्गनाथाय प्राकारनिर्माणं कारयति स्म। मध्ये प्राकारस्यावरोधेन महाभागवतोत्तमस्य विप्रनारायणाख्यस्य [तोण्डरडिप्पोडि याळ्वार्] पुष्पमालाग्रथनोपवेशस्थलं समागतमिति ज्ञात्वा तच्च पुण्यस्थलं विहाय प्राकारनिर्माणमकुर्वन्। प्राकारस्यावरोध इति नोत्पाटनं कृतवन्तः खलु । तद्वत् भवन्तः अपि महाभागवतानुष्ठानम् आचरन्तु। पिळ्ळैपिळ्ळैयाळ्वान् महोदयस्य भवनोत्पाटनं मा कुरुध्वम्। तच्च महतेऽपराधाय भवेत्। भगवतः अपचारादपि भागवतापचारः दोषावहो भवेदिति संसूचितवन्तः। तच्च हितं राज्ञः न रोचते स्म। श्रीपराशराः स्वाचार्य-तनया इत्यप्यनालोच्य तेषां वचनमवधीरयन् महाभागवतस्य पिळ्ळैपिळ्ळैयाळ्वान्

[1] There is historical evidence to show that there existed a King by name Veerasundara during this period. Yet this Veerasundara may be one of the several titles of the contemporary King Rajaraja II or he might have been a vassal of Cola King Rajaraja II.
- Sri Parasara Bhatta, His contribution to Visistadvaita., written by Dr. S. Padmanabhan, Madras, 1995.

भवनोत्पाटनायादिदेश। राज्ञः मम शासनमनुसृत्यैव प्राकारनिर्माणः समजनि। भट्टार्याः राज्ञः समीपमागत्य मद्वचनविरोधं कृतवन्त इति दुरभिमानेन तेभ्यः श्रीरङ्गविसर्जनपूर्वकमुपप्लवं पर्यकल्पयत्। तत्र स्थिताः सर्वे वैष्णवजनाः हाहाकारमकुर्वन्। अहो · राज्ञामन्धशासनम् इति, इमां बाधां स भगवान् श्रीरङ्गनाथोऽपि कथं सहतेति च शोकाप्लुताऽभवन्।

श्रीपराशरभट्टार्याणां श्रीरङ्गविरहावस्था -

श्रीपराशरार्याः भागवतापचारमसहमानाः श्रीरङ्गं, श्रीरङ्गशायिनं च तत्यजुः। भगवद्रामानुजाचार्याणां प्रीतिपात्रं दिव्यदेशं गोष्ठीपुरं नामकं प्रविविशुः। प्रयाणवेलायां नञ्जीयरमहाभागकृताम् अन्नपानीयादिपूर्वकां सपर्यां बहुधा प्राशंसयन्। नञ्जीयर् महाभागकृता सपर्या सर्वैः अभ्यसनीया खल्विति महान्तः अपि प्राशंसुः। गोष्ठीपुरीमधिवसन्तः श्रीपराशरार्याः श्रीरङ्गदिव्यमन्दिरं श्रीरङ्गमन्दिरसुन्दरं च प्रतिक्षणं स्मरन्तः श्रीरङ्गशायिनः विरहमसहमानाः कामपि मानसिकीं व्यथामनुभवन्तः एवं प्रार्थयामासुः "श्रीरङ्गराजदिव्यराजधान्यै नमः।

पूगीकण्ठद्वयससरसस्निग्धनीरोपकण्ठा
माविर्मोदस्तिमितशकुनानूदितब्रह्मघोषाम्।
मार्गे मार्गे पथितनिवहैरुञ्छमानापवर्गा
पश्येयं तां पुनरपि पुरीं श्रीमतीं रङ्गधाम्नः।।

इत्थं मनसि भावयन्तः,

कस्तूरी कलितोर्ध्वपुण्ड्रतिलकं कर्णान्तलोलेक्षणं
मुग्धस्मेरमनोहराधरदलं मुक्ताकिरीटोज्वलम्।
पश्यन्मानसपश्यतो हररुचिं पर्यायपङ्केरुहं
श्रीरङ्गाधिपतेः कदानुवदनं सेवेय भूयोप्यहम्।।

[श्रीरङ्गनाथस्तोत्रम्, २]

इति कांश्चनश्लोकान् शोकपूर्णान् भगवते रङ्गनिवासाय समर्पितवन्तः इति महतां वचनम्। ते च श्लोकाः श्रीरङ्गनाथ-स्तोत्रमिति नाम्ना प्रतिदिनं महाभागवतैः अनुसन्धानरूपेण भगवतः सन्निधौ निवेद्यन्ते। मुक्तकरूपेण तानि पद्यानि सरसानि हृद्यानि च मधुराणि भवन्ति । भट्टार्याणां विरहावस्था असाधारणा भवति । प्रायशः श्रीशठकोपसूरिणः स्वदिव्यतिरुवाय्मोळिप्रबन्धे यथा नायिका-वस्थामनुभूय विरहमसहमानाः करुणं विलपन्ति, तद्वदेतेऽपि विलपन्ति। इमे श्लोकाः भगवति श्रीरङ्गनाथे भट्टार्याणां प्रगाढां भक्तिमाविष्कुर्वन्ति। कदा वा श्रीमतीं रङ्गपुरीं, श्रीभूनीळायुक्तं श्रीरङ्गनाथं कावेरीविमलसलिले दिव्यस्नानम्, अनुभवामीति प्रार्थयन्ति। सहृदयपाठकानामेषा प्रार्थना झटिति आर्द्रीकरोतीत्यत्र न सन्देहः। दयार्द्रहृदयाय भगवते किमु वा वक्तव्यम्" इति।

श्रीपराशरभट्टार्यैः श्रीरङ्गक्षेत्रे श्रीवैष्णवदर्शननिर्वाहः -

श्रीपराशरभट्टार्याः श्रीरङ्गनाथविरहमनुभवत्सु गच्छत्सु तिथिवारनक्षत्रमासायनसंवत्सरेषु कदाचित् वीरसुन्दरब्रह्मरायः मरणमवापेति वार्ता समागता। तच्छ्रुत्वा श्रीपराशरशिष्याः महान्त-मानन्दमनुभवन्तः स्वोत्तरीयाणि अम्बरवीथिषु निक्षिपन्तः ननृतुः। जयजयरावाश्च उच्चैः जगर्जुः। वीरसुन्दरब्रह्मरायमरण वार्ता श्रीरङ्गनिवसिन्यै आण्डाल् नामधारिण्यै निवेदयामासुः। अमुं वृत्तान्तमाकर्णितवती सा जननी शीघ्रमन्तर्गृहं प्रविश्य कवाटे पिधाय उदरं निपीड्य उच्चैराक्रन्दितुमारेभे। शिष्याः साश्चर्यं पश्यन्तः तां शिष्यवत्सलामेवमूचुः। "हे जननि! किमर्थमारोदनम्? समयस्त्वयं सन्तोषदायकः। योऽस्मान् सर्वदा द्वेष्टि यश्चाहङ्कारेण प्रियतनूजेभ्यः श्रीपराशरेभ्यः प्रवासबाधामकल्पयत्, यो वा भागवतगृहोन्मूलनमकार्षीत् स दुष्टात्मा पापी परलोकमगात् किल। इतःपरं नः श्रीरङ्गवासं भविष्यति" इति सोल्लासं प्रत्यबोधयन्। तेषां वचनानि श्रुत्वा

परमविलक्षणभावयुक्ता श्रीकूरेशमहामिश्राणां धर्मपत्नी एवं बभाषे। "हे प्रपन्ना:! नायं सन्तोषजनक: काल: यतो हि स राजा श्रीकूरेशमिश्रपादसम्बन्धी खलु। स च भट्टार्येषु महान्तमपचारं विधाय पश्चात्तापमपि नाध्यगच्छन् मरणमुपागमत्। देहत्यागसमनन्तरं कालकिङ्करपाशाकर्षणतर्जनताडनादिभि: पीड्यमान: नूनं रौरवादिषु पतत्येव। स च मोक्षविहीन: । यदि किञ्चित्कालमत्रैवभूलोके जीवेत्, दृष्टफलं सुखं वा प्राप्नुयात्। आचार्यानुग्रहेण सर्वं सुसाध्यं भवेत् तच्च न कृतं तेन । अम्हो अयं जीवात्मा कथं वा यमलोकबाधामनुभवेत् इति मया चिन्त्यते। राजा तु उभयभ्रष्टो बभूव। अत एव खिन्नास्मि इति । श्रीवत्सलाञ्छनश्रीपादसम्बन्धी कश्चिदात्मा क्लिश्यतीति चिन्त्यमानायां मयि कुतो वा भवन्त: मामिकां बाधां न जानीयुरिति न कदापि कूरेशसम्बन्धिन: परदु:खं सहन्त इति, परदु:खदुखित्वं दयेति कथ्यते खल्विति प्राबोधितवती । शिष्यास्तु तद्देवताया: पादयो: पतित्वा आत्मनामपराधस्य क्षमां ययाचिरे। अथ कदाचित् श्रीरङ्गवासिन: पिळ्ळैपिळ्ळैयाळ्वान् दिव्यसूरय: वृत्तान्तममुं श्रुत्वा यत्र च श्रीपराशरभट्टार्या: श्रीरङ्गविरहक्लेशमनुभवन्त: कालं यापयन्ति, । तत् गोष्ठीपुरनामकं दिव्यक्षेत्रमुपगम्य सर्वं राज्ञ: मरणवृत्तान्तादिक-मनिवेदयन्। श्रीपराशरार्या: वृत्तान्तममुं श्रुत्वा स्वनयनयो: पुन: श्रीरङ्गमन्दिरसुन्दरस्य साक्षात्कार: भागवतगोष्ठीवैभवं चाचिरेणैव भवतीति महानन्दसन्दोहा: वार्ताहरेभ्य: आळ्वान् महोदयेभ्य: वारं वारं साष्टाङ्गवन्दनं समर्पितवन्त:। तदनु उभावपि मिलित्वा श्रीगोष्ठीपुरात् प्रस्थाय श्रीरङ्गनगरं प्राप्य यथापूर्वं भगवद्रामानुजदर्शननिर्वाहक-तत्पराश्चासन्।

श्रीपराशरभट्टार्याणां श्रीसूक्तय: -

श्रीरङ्गदिव्यायतने श्रीपराशरार्यै: कालक्षेपगोष्ठीं प्रचाल्य-मानसमये कदाचित् अम्मणिआळ्वान् नाम कश्चित् श्रीवैष्णव:

योजनद्विशतमितदूरादागत्य श्रीभट्टार्याणां श्रीपादयोः पतित्वा स्वामिन् श्रीरङ्गराजदत्तपुत्र! जयीभव! मह्यमेकमुज्जीवनमुपदिश्यानुग्रहः क्रियतामिति प्रार्थनामकरोत्। तदनु श्रीपराशरार्याः तस्य प्रपत्तिमभिवीक्ष्य श्रीशठकोपमुनेः दिव्यगाथाः [तिरुवाय्मोळि महाप्रबन्धात्] स्वीकृत्य व्याख्यामेवं अनुगृहीतवन्तः।

'नेडुमार्कडिमैशेय्वेन् पोल, ववनैक्करुदवञ्जित्तु
तडुमात्ततीकदिगल् मुत्तत्तुम् तविरिन्दशदिरनिनैन्दाळ्।
कोडुमाविनैयेनवनडियारडिये कूडुमिदुवल्लाल्
विडुमारेन्देन्नन्दो वियन् मूवुलगुपेरिनुमे।।'

[तिरुवाय्मोळि ८-१०-१]

अस्याः दिव्यगाथायाः दशसंख्याकाः गाथाः भागवतवैभवं ज्ञापयन्तीति तासां सारस्तु भगवन्तं यो जानाति स भक्तः अर्थज्ञः एव भवति। तदीयान् भागवतान् जानीते स एव पूर्णभगवत्स्वरूपज्ञो भवतीति भगवद्वैभवादपि भागवतवैभवं नितरां विजयते। इति । किं बहुना असमर्थोऽस्मि धारयितुम्। इयदेवालं नः। अतो भागवतान् सम्यगाराधनं कुर्विति गाथासारांशं कृपयाऽनुगृहीतवन्तः। स वैष्णवः परमानन्देन तमेवोपदेशं धारकतया भोग्यत्वेन स्वीकृत्य यथागतमगच्छत्। सः वैष्णवः मणियाळ्वान् स्वमनसि "अहो ! पराशरार्याणां व्याख्यानपद्धतिः। मह्यमत्यद्भुतमनुगृहीतवन्तः। नोचेत् को वा विजानाति भक्तामृतं विश्वजनानुमोदनं सर्वार्थदं श्रीशठकोपवाङ्मयं, सहस्रशाखोपनिषत्समागमं द्रमिडवेदान्तसागरम् इति वारं वारं चिन्तयामास।

न्यग्रोधबीजे वटवत् प्रणवे शब्दजालवत्।
सिद्धे तदीयशेषत्वे सर्वार्थास्संभवन्ति हि।।

इति परां तृप्तिमध्यगच्छत्। गुणवान् शिष्यः स्वाचार्यश्रीपादमाश्रित्य तेषां सदुपदेशः एकः एवात्मोज्जीवनमिति विश्वस्य तिष्ठेदिति श्रीसूक्तिसारांशः।

श्रीपराशरार्यैः वीरशिखामणेः पल्लवरायस्योपदेशः -

वीरशिखामणिः पल्लवरायः कदाचित् श्रीरङ्गेशपुरोहितान् श्रीपराशरार्यान् प्रणम्य "अयि! श्रीवैष्णवसिंहासनसार्वभौम! राजकार्याण्यसंख्याकानि मां बाधन्ते। निमेषार्धमपि नावकाशो मे विद्यते। राज्यसंरक्षणमेव कर्तव्यं भवति। अतो मयि कृपया मह्यमुज्जीवयितुमुपयुक्तं कञ्चनोपदेशमनुगृण्हन्तु" इति प्रार्थयामास। भट्टार्यस्तु राज्ञां भक्तिं प्रपत्तिमाकलय्य "हे राजन्! श्रीरङ्गनाथस्य कृपा त्वयि लसतु। भो पल्लवराय! सागरतीरविस्तरं स्मरन्तश्च तिष्ठन्तु" इति भावगर्भं वचनमूचुः। पल्लवरायस्तु तस्य वचनस्यान्तरार्थं नाजानन् पुनः तानेवाचार्यान् प्रार्थयामस। तदनु श्रीभट्टार्याः "अयि! राजन्! सप्ततिकोटिपरिमितप्लवगगोलाङ्गूलभल्लकयूथाधिपैः संसेवितदिव्यपादारविन्दे करुणावरुणालये सभ्रातरि भगवति श्रीरामचन्द्रे स्कन्धावारे विराजमाने एवमेव पारतीरे पिशिताशने रक्षसेन्द्रे रावणे वर्तमाने वानरास्तु अहमहमिकया वयं रामं रक्षामः, वयं रामं रक्षामः इति, रावणं हनिष्यामः इति कुम्भकर्णं च हन्मः इति वदन्तः श्रान्ताः रात्रौ निद्रापरवशामुपागताः। तदात्वे 'रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता' इति यो रामभद्रः भगवता वाल्मीकिना संस्तुतः स एव धनुष्पाणिः भूत्वा लक्ष्मणानुचरः कुटरटदटनिटङ्कृतिचटुलकठोरकार्मुकविनिर्गतकङ्कपत्रवृष्टिभिः यथा स्वाण्डानि पक्षाभ्यामाच्छिद्य गरुडो रक्षति तद्वत् तां वानरकोटीं अशेषामपि निशां चक्रवद्भ्राम्यन् जङ्गमप्राकारवत् रक्षितवान्। अतः रघुनायकस्य सीतासमेतस्य पादयोः शरणमुपगम्य, शरणागतिरेव प्रपन्नजनानां स्वरूपमिति महाविश्वासेन भावयित्वा सुखमवाप्नुहि" इति श्रीसूक्तिमनुगृहीतवन्तः। अनया श्रीसूक्त्या ज्ञायते यत् निद्रावशमुपागतान् [अज्ञानदशायुक्तान्] अपि अस्मान् सर्वदा यो नारायणः रक्षति स एव जागरूकान् अपि [ज्ञानिनः भागवतान् भक्तादीन्] रक्षिष्यतीत्यत्र न विप्रतिपत्तिः इति। एकस्मिन् दिने त्रिभुवनवीररायः श्रीपराशरभट्टार्याणां महिमानमाकर्ण्य श्रीपराशरार्यश्रीपाददर्शनं कृत्वा "हे! भट्टार्याः! कृपया अस्माननु-

ग्रहीतुमायान्तु" इति सविनयं प्रार्थयामास। तदा श्रीपराशरार्याः कुलशेखरदिव्यसूरिणः मुकुन्दमालावचनमनुसरन्तः[१] - "हे! राजन्! श्रीरङ्गनाथोऽपि स्वाभयहस्तमुपसंहरतु नाम नाहं कदापि इमां भूमिं त्यजामि। अत्रैव द्वारदेशे तिष्ठामि। नान्यस्य द्वारभूमिमाश्रयेयम्" इति स्वाभिप्रायं भगवति विश्वासं च निवेदितवन्तः। "एतद्व्रतं मम" (रा. ६-१९-३३) इति स्वाश्रितरक्षणे प्रतिज्ञा-दीक्षितवन्तं भगवन्तं पुरषोत्तमं त्यक्त्वा कथं वा कतिपयग्रामेशं कञ्चित्पुरुषाधमं नश्वरशरीरयात्रार्थं सेवामहे? प्रपन्नजनानामनुचितकार्यं इति समादधुः किल। अनया श्रीसूक्त्या भगवति महाविश्वासः कर्तव्यः इति ज्ञायते। अथ कदाचित् श्रीपराशराः पद्माधात्रीकराभ्यां परिचितचरणं सप्तप्राकारे विमानेऽधि-वसन्तं वासुदेवं सन्दर्शयितुं सन्निधिमुपागमन्। तत्र स्थितः कश्चनार्चकस्त्वविज्ञाय श्रीपराशरार्यान् परुषवाक्यैः दूषयामास। आचार्यदूषणेन कृद्धाः शिष्याः तस्मै देवार्चकाय प्रतिसमाधातुं कलहार्थं सन्नद्धाः भवन्ति स्म। तदनु भट्टार्याः तान् शिष्यान् वीक्ष्य "अयि! भगवतः सन्निधौ न कदापि कलुषचित्ताः भवेत! अर्चकाभिप्रायवचनेषु को वा दोषः? किं वयं प्रतिदिनं पूर्वाचार्यानुगृहीतस्तोत्रैः नैच्यानुसन्धानं न कुर्मः। प्रतिदिनं विज्ञाप्यमाने नैच्यानुसन्धाने को वाऽस्माकं वचनस्य साक्षी अलभत! अहो अस्माकं नैच्यानुसन्धानं सत्यमभजत्। वयं अस्मत्साक्षिणे अर्चकाय आधमर्ण्यं भजामः। महानुपकारोऽयम्। तस्मै मा कृद्ध्यत इति समादधुः । श्रीसूक्त्या अनया ज्ञायते यत् भगवतस्सन्निधौ स्वापराधनिवेदनं तस्य स्वामित्ववात्सल्यजनकत्वकारणं भवेत्। ततोऽपि भगवतः अङ्गीकारकारणमपि भवेदेव इति।

श्रीभट्टार्याणां [तिरुवाराधनम्] देवपूजाक्रमः -

---

[1] नाथे नः पुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति।
यं कञ्चित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहो नरमहो मूका वराका वयम्।। ।(मुकुन्दमाला, श्लो. २९)

कदाचित् श्रीपराशरभट्टार्याणां शिष्यरत्नं कश्चित् सोमयाजी वैष्णवः समागत्य गुरुचरणारविन्दे साष्टाङ्गं प्रणम्य "स्वामिन् ! गुरूत्तम! दासजनाय भगवतः आराधनक्रमपद्धतिं अनुगृण्हन्तु इति प्रार्थयामास। तस्मै शिष्यप्रमुखाय आचार्याः परमगुरूणां भगवद्रामानुजाचार्ययतिवराणां नित्यग्रन्थं कृपया अनुगृहीतवन्तः[1]। स वैष्णवः तत् स्वीकृत्य आनन्दसमायुक्तः स्वगृहमियाय। नित्यग्रन्थोक्तप्रकारेण भगवदाराधनं कुर्वन् सः नितरां मुमुदे। गच्छतिकाले सः श्रीवैष्णवः कदाचित् पुनः श्रीपराशरगुरुचरणसन्निधिं उपेयिवान्। दिनद्वये गुरूत्तमानां श्रीपराशरभट्टार्याणां दिव्यानुष्ठानमाराधनापद्धतिं च अद्राक्षीत्। तत्र यदा आचार्यैः स्वोज्जीवनाय उपदिष्टं तत्किमपि नादृश्यत। भट्टार्याणां भगवदाराधनक्रमं दृष्ट्वा आश्चर्यचकितोऽभूत्।

पराशरार्याणामाराधनपद्धतिः -

श्रीपराशरार्याः भगवन्तं प्रार्थयन्तः स्नानं कुर्वन्ति। धौतवाससी परिधाय केशवादि द्वादशनामभिः ऊर्ध्वपुण्ड्रान् तत्तस्थानेषु धारयन्ति। तदनु पूर्वाचार्यान् स्मरन्तः तत्कालकृत्यादिकं परिसमाप्य झटिति भगवते अन्नपानीयादिकं निवेद्य तत् प्रसादं तु भागवतैस्साकं बुभुजिरे। एतावन्मात्रं दैवार्चनं कुर्वन्ति स्म। आगन्तुकः स सोमयाजी वैष्णवः इमामाराधनपद्धतिमवलोक्य आश्चर्यचकितः स्वाचार्यवर्यान् श्रीपराशरान् "अयि! गुरुदेव! भवदन्तिके विज्ञापनामेकां करिष्ये। बिभेमि च विज्ञापयितुम्" इति सविनयमुवाच। श्रीपराशरार्याः निर्भयेन चेतसा "ब्रूहि" इत्यादिशन्। श्रीमन् भगवदाराधनक्रमः मह्यं अन्यथैव उपदिष्टवन्तः, भवदाराधनक्रमस्तु भिन्नो दृश्यते। अत्र को हेतुः? कृपया अपनयन्तु मे कुतूहलं जिज्ञासां च इत्यपृच्छत्। श्रीपराशराः "अयि सोमयाजिन्!

[1] नित्यग्रन्थे भगवद्रामानुजाचार्याः भगवदाराधनाविधिं उल्लिखितवन्तः ।

भवदर्थं शास्त्राणि सर्वाणि परिशोधितानि। भवन्तः तथैवाराधनं कुर्वन्तु। नान्यपन्थाः विद्यते। मदर्थमपि शास्त्राणि गवेषितानि। एवमेव मया कर्तव्या इति नियमितं भवति। अन्यथा भगवदाराधनं कर्तुं उपाय एव नास्ति इति प्रोचुः। अनया श्रीसूक्त्या ज्ञायते यत् शिष्यस्य मेधां विचार्य यावानुपदेशः यया रीत्या कर्तव्यो भवति तावानुपदेशः तादृशीं रीतीमुपयुज्य बोधनीयो भवति। धूर्तपशोः कण्ठे काष्ठभारमिव आचार्याः तादृशेभ्यः कठिनप्रवृत्तिभ्यः शिष्येभ्यः प्रत्येकां रीतिमाश्रयन्ते। शब्दादिविषयेष्वपि यथेच्छं सञ्चरतामिन्द्रयाणां भगवद्विषयप्रावण्यं यथा भवेत् तथा परिष्करणीयमाचार्यैः। भगवदायत्तचित्तानां भागवतधर्मयुक्तानां चेतांसि कृत्यानि च को हि विज्ञातुमर्हति? तेषां हृदयं सामान्यजनाः न कदापि जानीयुः। किमुत तेषां कृत्यानि। आचार्याणां समीपे सर्वे शिष्याः न समानाधिकारिणो भवन्ति। शिष्यजनयोग्यतानुगुणमेव तत्तन्मन्त्रोपासनादि पद्धतीः परमया दयया सदाचार्या अनुगृण्हन्त्येवेति ज्ञायते" इति सोमयाजिमहाशयाः श्रीभट्टार्य श्रीसूक्त्या नितरां सन्तुष्टिमुपगताः यथागथं प्रातिष्ठत।

भक्तजनसमाधानम् -

कदाचित् कश्चित् भक्तः श्रीपराशरार्यानेत्य, "हे ! विद्वन्! नमामि भवन्तम्। प्रष्टव्यः कश्चन सन्देहः" इति उवाच। श्रीपराशरास्तु "हे! अतिथिवर्य! निर्भयेन पृच्छन्तु" इति समादधिरे। तदनु सः महाजनः "श्री वैष्णवाः देवतान्तरभजनं किमर्थं न कुर्वन्ति? किं सर्वे देवाः न समाना वा? किमर्थं सङ्कुचितमनस्काः भवन्ति। वयं तु सर्वान् देवान् नमस्कुर्मः। ते न तथा कुर्वन्ति। तत्र को वा हेतुरिति जिज्ञासया अपृच्छत्। श्रीपराशराः तं प्रेम्णा एवमूचुः। "हे ! सुकृतिन्! श्रीवैष्णवाः दृढचित्ताः। अव्यभिचारभक्तिमेव आश्रयन्ते। "अन्तर्बहिश्चतत्सर्वं व्याप्य नारायणः स्थितः" इति जानन्ति। अतः सर्वत्र नारायण एव तेषां दृग्गोचरो भवति। तमेवार्चयन्ति, तमेव भावयन्ति, तं शरणमुपयन्ति।

पातिव्रत्यम् अनुष्ठीयन्ते। यदि प्रमाणविरोधः, तथैव संशयस्याविर्भावः। अतः एते स्वरक्षणे स्वान्वयं वा पराश्रयं वा नाङ्गीकुर्वन्ति। श्रीमन्नारायणैकपरायणाः पारतन्त्र्यनिष्ठायुक्ताः तमेव शरणं सर्वभावेन गच्छन्ति। अत्र संशयगन्धोऽपि नास्ति। रजस्तमोभूयिष्ठैः जनैः सत्त्वगुणाः सदा आश्रयन्ते। इदं च न्याय्यं सत्त्वगुणभूयिष्ठाः जनाः न कदापि रजस्तमो गुणयुक्तान् आश्रयन्ते खलु। यदि तदा अनुतिष्ठेयुः विप्रतिषिद्धं भवति। अतः स्वधर्मे वर्तमानाः श्रीवैष्णवाः परधर्मे गुणो वा स्यात् दोषो वा भवेत् न कदापि स्वाचार्यं स्वधर्मं स्वमन्त्रं स्वमार्गम् उल्लङ्घयन्ति इति समादधुः । अनेन उदेशेन देवतान्तर साधानान्तर मन्त्रान्तराणि श्रीवैष्णवजनैः न कदापि अनुवर्तनीयानि भवन्तीति ज्ञायते" इति। उपदेशमिमं श्रुत्वा स भक्तः श्रीवैष्णवजनानां अनन्यभक्तिं प्रशंसन् स्वधाम जगाम।

श्रीपराशरभट्टार्याणां जनन्याः भागवतनिष्ठा -

श्रीपराशरभट्टार्याणां जननी तत्रभवती आण्डाळ्देवीति नाम्ना विजयते। सा च कूरेशमिश्राणां महाभागवतशिखामणीनां धर्मपत्नीत्वात् महाभागवतानुष्ठानं पत्युः सकाशादध्यगच्छत्। कदाचित् श्रीपराशरार्येषु श्रीमन्नारायणमन्त्रानुष्ठानेषु सत्सु, अन्य श्रीवैष्णवशिष्य श्रीहस्तेन भट्टार्याणां श्रीपादौ क्षाळयित्वा तच्च श्रीपादतीर्थं स्वीकुर्वन्तीत्यासीत्। तत्रस्थाः सर्वेऽपि "अयि! जननि! एतदुचितं वा? भट्टार्याणां भवत्यः जन्मदायिन्ः खलु" इति पर्यपृच्छन्। तदनु सा ज्ञानानुष्ठानयुक्ता जननी अयि! महात्मानः! अन्यैः प्रतिष्ठापितभगवद्विग्रहस्य तीर्थं स्वीकार्यं भवति। एवं स्वयमेव प्रतिष्ठापितभगवद्विग्रहस्य तीर्थं कुतो न स्वीकार्यं भवेत्? इति प्रत्युवाच। शिष्यो भवतु पुत्रो वा भवतु ज्ञानाधिकः सर्वथा समाश्रयणीय एव। श्रीमन्तः पराशरभट्टार्याः न सामान्याः, ज्ञानाधिकाः। कारणजन्माश्च भवन्ति। भगवतः श्रीरङ्गनाथस्य दिव्यान्नप्रसादात् प्रसादिताः श्रीरङ्गनाथश्रीरङ्गनायकीदिव्यदम्पत्योः पुत्रकृतकाः

श्रीवत्सचिन्हतनया: दिव्यजन्मकर्मयुक्ता: अपारपाण्डित्यगरिमाण: दिव्यसूरिणां एवमेव भगवद्रामानुजाचार्याणां प्रीतिपात्रा: पुत्रनिर्विशेषाश्च भवन्ति । अतो मयि कदापि तान् प्रति सामान्यमानुषबुद्धिः वा पुत्र इति भावना वा नोपद्यते, परं देवताबुद्धिरेव उत्पद्यते" इति निगदितवती। अस्या: आण्डाल्देव्या: भागवतनिष्ठां विज्ञाय सर्वेऽपि साष्टाङ्गं प्रणेमु:।

श्रीशैलानन्तर्यसन्निधौ भट्टार्यै: शिष्यप्रेषणम् -

श्रीपराशरभट्टार्या: श्रीरङ्गनाथसन्निधौ प्रतिनित्यं दिव्यप्रबन्धादीनां व्याख्योपन्यासमुपदिशन्ति स्म। एकस्मिन् दिने श्रीपराशरार्याः स्वान्तेवासिनमाहूय - "वत्स! त्वमधुना तत्र भवतां महाभागवतोत्तमानां श्रीशैलानन्तार्याणां दिव्यसन्निधिं गत्वा साष्टाङ्गं प्रणम्य श्रीवैष्णवानां लक्षणानि ज्ञात्वाऽऽगच्छ" इति आज्ञापयामासु:। स शिष्य: भट्टार्याणामाज्ञामनुसृत्य श्रीशैलानन्तार्याणां गृहमगात्। तत्र तु भोजनकर्म प्रचलति स्म। अनेके श्रीवैष्णवभागवता: तदीयाराधने निमग्नाश्चासन्। श्रीशैलानन्तार्या: भगवदर्चनां नानाप्रकारै: कुर्वन्ति स्म। तैस्साकं सम्भाषणसुखमनुभवितुं भट्टार्यशिष्यप्रमुखस्य नावकाशोऽलभत। अलब्धावकाश: स: शिष्य: तेषां साक्षात्कारार्थमवतस्थे। श्रीशैलानन्तार्या: हठादेनं शिष्यं ददर्शु:। तं च एवमूचु:। "अयि! श्रीवैष्णव! कियान् वा काल: तूष्णीमेव यापितोऽसि भवान्? बुभुक्षा पीडित इव भासि। अन्त: आगत्य भोक्तुं नावकाशो भवतामुपलब्ध इति मन्ये" इति वदन्त: तस्मै सादरमातिथ्यं दत्तवन्त:। तस्य शिष्यस्य प्रतीक्षां प्रति खिन्ना: "तात! त्वदागमनमजानन् एवं विलम्ब: समभूत्। अस्योत्तरदायीं अहमेव।' अन्यथा न मन्यतामिति बहुधाश्वासितवन्त:। तस्मै सादरं प्रसादं समर्पयामासतुः । तदनु भागवतशेषं परमान्नमिति भावयन्तौ तावनन्तार्यदम्पती सानन्दं बुभुजाते। भोजनानन्तरं अनन्तार्या: पराशरभट्टार्यशिष्यम् आहूय विस्रब्धमुपविश्य तं दृष्ट्वा "भवान् कुत्रत्य:? किं निमित्तमागमनम्? केन वा प्रकारेण भवते उपकरोमि"

इत्यप्राक्षुः। स तु श्रीशैलानन्तार्यकृतमतिथिसत्कारं तेषां विनयं भागवत निष्ठां च वीक्ष्य तन्मयो भूत्वा स्थाणुरभवत्। तदनु "हे! महात्मन्! अहं श्रीपराशरभट्टार्याणां पादसम्बन्धेनोज्जीवयामि। ते तु भूलोकवैकुण्ठाख्ये श्रीरङ्गमहाक्षेत्रे भगवन्तं नारायणं समर्चयन्तः कालक्षेपगोष्ठीमत्यद्भुतं निर्वहन्ति। एकस्मिन् दिने कालक्षेपानन्तरं मामाहूय "वत्स! तत्रभवतां श्रीशैलानन्तार्याणां श्रीपादसन्निधिमुपेत्य श्रीवैष्णवानां लक्षणं ज्ञात्वा प्रत्यागच्छेति आज्ञापयामासुः। अतः श्रीचरणानां भवतां सन्निधिमागतोऽस्मि। कृपया श्रीवैष्णवलक्षणम् उपदिशन्तु" इति प्रार्थयन् स्ववचनं विरराम। श्रीशैलानन्तार्याः विकसितवदनारविन्दाः, "अयि! सज्जन! श्रीवैष्णवो नाम भवादृशः एव भवेत्" इत्येवमात्रं समादधुः। अनेनाद्भुतसमाधानेन एवं ज्ञयते यत् श्रीवैष्णवस्तु स्वज्ञानानुष्ठानानुसारेण कदापि भागवतगोष्ठ्याम् अग्रेसरो भवितुं नेच्छेत्। सदा

"त्वद्भृत्यभृत्यपरिचारकभृत्यभृत्य-
भृत्यस्य भृत्य इति मां स्मर लोकनाथ।।"

[मुकुन्दमाला-२८]

"त्वद्दासदास चरमावधि दासदासाः।"

[श्रीवेङ्कटेश्वरसुप्रभतम्, २९]

इत्येव भावयन् चरमनिष्ठायामेव भवेत। भागवतशेषत्वसंरक्षणमेव श्रीवैष्णवलक्षणम् इति। तदनु स भट्टार्यशिष्यप्रमुखः श्रीशैलानन्तार्याणां विशालहृदयं भागवतनिष्ठां स्वगुरुचरणेभ्यः विज्ञापितवान्। शैला इवोन्नतास्सन्तः किन्तु प्रकृतिकोमलाः इति वचनं न मिथ्यात्मकमेव।

श्रीपराशरभट्टार्याणां वात्सल्यम्-

श्रीपराशरभट्टार्याः शिष्यवत्सलाः श्रीवैष्णवाचार्यपदवीं निर्वहन्ति स्म। जातुचित् कश्चित् सेवकः श्रीवैष्णवः भट्टार्यान् प्रणम्य "स्वामिन्! नाहमत्र स्थातुमुत्सुको भवामि। अद्यावधि भवद्भिस्सह न मे कश्चित्सम्बन्धो भवतु" इत्यज्ञानेनावादीत्। श्रीपराशरास्तु तस्य प्रवृत्तेः कारणं सहवासजदोषः एवेति मनोवैकल्याद्विषयासक्तोऽभवदिति च

विदितवन्तः। तदनु तं सेवकं प्रति "अयि! वत्स! यत्त्वयोच्यते तन्नसिध्यति। यतोऽहि त्वया परित्यक्तेऽपि नाहं त्वां परित्यजामि इति, द्वेषः अनर्थदायकः" इति तस्मै मधुरमुपदेशादिकं कृतवन्तः। तस्य मूलप्रकृतीः उदात्तीकुर्वन्तश्चासन्। श्रीपराशरवचनामृतेन दिव्यप्रभावाच्च स तु स्वामिनां अन्तरङ्गशिष्यो बभूवेति परमाश्चर्यम्। अनेनोपदेशेन ज्ञायते दोषेषु भोग्यगणनावात्सल्यमिति सदाचार्याः तु अपमार्गगन्तॄनपि स्वोपदेशप्रभावेण प्रयत्नैश्च स्वाश्रितान् शिष्यान् सन्मार्गे स्थापयन्तीति स्थापनीया इति च ज्ञायते।

श्रीपराशरार्यसन्निधौ शिरियाच्चान् विषयः -

श्रीपराङ्कुशपरकालनाथमुनिभगवद्रामानुजाचार्यादिश्रीवैष्णव-सिद्धान्तस्थापकाचार्याणां श्रीसूक्तिसुधां स्ववाग्वैभवैन मेलयित्वा-द्भुताद्भुतं श्रीवैष्णवगोष्ठीं श्रीरङ्गनाथदिव्यालये निर्वहत्सु श्रीपराशरार्येषु कदाचित् कश्चन श्रीवैष्णवः सानन्दं "अहो भाग्यं! अहो भाग्यं! श्रीपराशरगोष्ठी सन्दर्शनम्। तत्रापि तेषां मुखारविन्दात् श्रीसूक्तिश्रवणम्। किमुवा वच्मि अस्मत्सुकृतविशेषम्। सुकृतं विना एतादृशीं गोष्ठीं स्मर्तुमपि न पारयामः। सुकृतं विना श्रीपराशरार्याणां दर्शनं न भविष्यति" इति उच्चैः प्रकटयामास। तत्र तु चरमपर्वनिष्ठाः शिरुमामनिशर इति श्रीकूरेशादि भागवतोत्तमैः प्रशंसिताः शिरियाच्चान् नाम महाभागवताः तस्यां गोष्ठ्यां विराजन्ते स्म। ते तु तस्य वैष्णवस्य वचनं नानुमेनिरे। "अयि! श्रीवैष्णव! भगवतः श्रीमन्नारायणस्य अपारकारुण्यात् निर्हेतुकवात्सल्याच्च जगदिदं परिवर्त्येति। स एव भगवान् जगदुदयरक्षाप्रळयकृदिति, नराणां नित्यानां अयनमिति श्रीपराशरदिव्यवदनारविन्दात् शृणुमः, तर्हि कुत्रत्या वा इयं काचित् सुकृतनाम्नी देवता? इमां मिथ्यात्मिकां देवतां कुतः कल्पयन्ति? किमर्थं व्युत्थापिताः ? इति विशदयामासुः। अनेन महाभागवतवचनेन अस्माकं ज्ञायते यत् भगवान् सत्यकामः सत्यसङ्कल्पः अपारकारुणिको भूत्वा

चेतनोज्जीवनार्थं कृतसङ्कल्पः यथा भवेत् तदा सर्वाण्यपि आनुकूल्यानि भवन्ति। तत्र सुकृतमिति कथनं स्वरूपविरुद्धमिति।

"कुतो भयं स्यात् त्वयि सानुकम्पे?
कुतो भयं स्यात् त्वयि जातरोषे?"
[अष्टभुजाष्टकम्-५]

इति वेदान्ताचार्याणां वचनं स्मरणीयं भवत्येव। प्रपन्नजनाः सुखदुःखे भगवतः अनुग्रहविशेष एवेति मन्यन्ते। दुःखमपि प्रपन्नजनाय हितार्थं भवति। तत्रापि भगवतः दया निदानभूता भवति।

श्रीपराशरार्याणां कैङ्कर्यनिष्ठा -

श्रीरङ्गनाथाः(उत्सवमूर्तिः) कदाचित् एकस्मिन् दिव्यास्थान-मण्डपे विराजन्ते स्म। तस्मिन् समये विविधाः प्रपन्नाः भक्ताः गायकाः नटाः तौर्यत्रिकबृन्दाः वन्दिजनाः नानाकैङ्कर्येषु नियुक्ताः भगवत्सेवां कुर्वन्ति स्म। तस्मिन् समये श्रीपराशरभट्टार्याः देवदेवोत्तमस्य श्रीरङ्गचन्द्रमसः दिव्यव्यजनकैङ्कर्यम् अत्यन्तश्रद्धाभक्तिभिः समर्पयन्ति स्म। तदानीं सन्ध्यावन्दनसमयः अतिक्रामति स्म। अयं च सन्ध्यातिक्रान्तविषयः केनापि शिष्येण तेभ्यः स्मारितश्चासीत्। तदनु भट्टार्याः "भगवत्कैङ्कर्यनिरतं भागवतं सन्ध्यावन्दनकालाति-क्रमणदोषः न कदापि स्पृशेदिति महतां वचनमनुसरन्तः[1] भगवतः व्यजनकैङ्कर्यमेव निर्विघ्नेन कुर्वन्ति स्म। आरब्धकैङ्कर्यत्यागः महते दोषाय प्रकल्पत इति भावयन्ति स्म। अनेन भट्टार्यानुष्ठानेन एवं ज्ञायते भगवद्भक्ताः यदि भगवत्पूजासु निमग्ना भवन्ति तेभ्यः कालातिक्रमदोषो न भवेदेव। यतः "भगवद्भक्तानां कालातिक्रमदोषो न स्पृशेदिति धिया भगवता स्वयमेव केचन ऋषयः नियुक्ताः। ते च कोटित्रयसंख्याकाः भवन्त्येव। ते भगवद्भक्तानां तत्कालोचिताः क्रियाः

[1] मत्कर्म कुर्वतां पुंसां यदि कर्म विलुप्यति ।
तत्कर्म ते प्रकुर्वन्ति तिस्रः कोट्यो महर्षयः ।।

सश्रद्धं कुर्वन्ति इति शास्त्रवचनं प्रमाणं भवत्येव। अत्र भगवत्कैङ्कर्यविषये नित्यकर्मानुष्ठानादयः न कदापि प्रबलाः भवन्ति। अर्चावतारकैङ्कर्यादिकं विहाय नित्यकर्मादयः नानुष्ठेयाः।" तथा भवति चेत् स्वरूपविरुद्धो भवत्येवेति।

श्रीपराशरभट्टार्यैः प्रदर्शितं विजयचिह्नं श्वेतातपत्रम् -

कदाचित् मात्सर्यभूयिष्ठाः बहवः विपश्चितः श्रीपराशर-भाट्टार्याणां नवनवोन्मेषशालिनीं प्रतिभां पाण्डित्यं चाकलय्य भट्टपादैः योद्धुं समागताः। तदा श्रीपराशराः विदग्धगोष्ठी समराङ्गणे पद्यात्मिकां मधुरगद्यात्मिकां हृद्यानवद्यकवितां उत्तुङ्गगङ्गालहरीवेगामाविश्चक्रुः। पराशराणां तर्कशास्त्रशरणामग्रतः स्थातुम् अशक्ताः, सद्धेतुवादैः मूकीकृताः पलायन्ते स्म। श्रीपराशराणां शराणामग्रतस्थातुमसमर्थाः स्वेर्ष्यां प्रदर्शयामासुः। केचनाहङ्कारमदमत्ताः स्वामिनं दृष्ट्वा "अयि! भो! भवन्तश्च सर्वज्ञाः इति, भवन्त एव श्रीरङ्गराजपुत्राः इति केचनाभ्युपगच्छन्तीति श्रुत्वा वयं परिज्ञातुमागताः इति प्रोवाचुः । तदनु पराशरभट्टार्यान् दृष्ट्वा भोः! अस्मिन् घटे किं वा वस्तु विद्यते, सत्वरमुच्यताम्" इति उच्चैः हसन्तः पर्यपृच्छन्। तत्समाधानतया "भो! पण्डिताः मात्सर्यमुत्सार्य श्रुण्वन्तु! घटेऽस्मिन् श्रीवैकुण्ठनिकेतनस्य नागान्तकदिव्यवाहनस्य विजयचिह्नं श्वेतातपत्रं राराजते" इति दरहासचन्द्रिकां विकिरन्तः स्पष्टमूचुः। परिपन्थिनस्तु महानन्द-सन्दोहतुन्दिलाः अहो एते सर्वज्ञाः खलु। इदानीमेव पश्यतां भवतां समक्षे निर्धार्यते इति परिहासवचनानि ब्रुवन्तश्च वराकास्ते घटस्य पिधानमुद्घाटितवन्तः। घटादनुपदं महापदनिलयः कृष्णसर्पः बहिर्निर्ययौ। ते च भट्टार्यान् "अयि! सर्वज्ञ इदमेवं वा विजयचिह्नं श्वेतपत्रम्?" इति जगर्जुः। तदनु श्रीपराशरान् दृष्ट्वा ससर्पश्च गरुडमन्त्रविद्ध इवाभवत्। तदा भट्टार्याः इदं छत्रमेव। यतो हि भगवतः दिव्ययात्रायां सर्पराजः -

"निवासशय्यासनपादुकांशुकोपधानवर्षातपवारणादिभिः।

शरीरभेदैस्तव शेषतां गतैः यथोचितं शेष इतीर्यते जनैः।।"
(स्तोत्ररत्नम्, ४०)

श्वेतातपत्रायमानः कैङ्कर्यं निर्वहति इति दिव्यसूरिणः भगवद्यामुनाचार्यादयः भागवतोत्तमाः स्तुवन्ति खलु। एवं विवृण्वत्सु श्रीपराशरेषु तेषां सर्वज्ञतां अप्रतिहतप्रतिभां च प्रत्यक्षप्रमाणेन विदितवन्तः स्वतर्ककर्कशवचनानि स्मरन्तः परां लज्जां अनुभूतवन्तः। स्ववञ्चनाव्यापारस्य क्षमां च प्रार्थयामासुः। तदनु भट्टार्याणाम् अनुग्रहेण विद्यामदं परित्यक्ताः भगवन्तं शरणमभजन्। अनेन वृत्तान्तेन श्रीपराशरभट्टार्याणां वाक्शुद्धिः ज्ञायते।

ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति।
[उत्तररामचरितम्, १-१३]

इति भवभूतेः वचनं अक्षरसत्यमेव। कदाचित् भगवद्रामानुजयतिसार्वभौमदिव्याज्ञया तिरुकुरुहरैपिरान् पिळ्ळान् [कुरुकेशाः] महाभागवताश्च श्रीशठकोपमुनीन्द्राणां तिरुवाय्मोळिदिव्यप्रबन्धस्य विष्णुपुराणप्रक्रियया षट्सहस्रग्रन्थमितां व्याख्याम् अद्भुताद्भुतं व्याचक्षिरे। श्रीपराशरार्याः कूरेशरचितषट्सहस्रग्रन्थपरिमितं व्याख्यानं नञ्जीयरमहाशयेभ्यः उपादिशन्। ते तत्र समग्रमधिकारं लब्ध्वा श्रीपराशरार्यानुवानुवर्तमानाः तेषां गुरूत्तमानामाज्ञया श्रीशठकोपमुनेः तिरुवाय्मोळिमहाप्रबन्धस्य नवसहस्रग्रन्थमितां महाव्यख्यां रचयन्तः कालं यापयन्ति स्म।

श्रीपराशरार्याणां कैशिकपुराणपठनम् -

कदाचित् कैशिकद्वादश्यां भगवान् श्रीभूनीळाधिनाथः दिव्यमहीषीभिस्सार्धं दिव्यतरास्थानमहामण्डपे देदीप्यमानाष्टदळपद्मकर्णिकातले दिव्यसिंहासने समस्तविबुधनित्यसूरिभागवतजनसंसेव्यमानदिव्यश्रीचरणयुगळः श्रीकार्यनिर्वाहकवृन्दसहस्रेणकृतदिव्यप्रबन्धाध्ययनोत्पन्नगम्भीरशब्दबुद्धिस्वाद्यनेनसन्तुष्टान्तरङ्गः श्रीमद्रङ्गपतिः विराजमानः आसीत्। श्रीपराशरभट्टार्यैः निवेद्यमानां अमृत-

लहरीसदृशां वेदवेदान्तमहाकाव्यनिखिलविबुधसूरिजनदिव्यवाग्विलसितां कैशिकपुराणव्याख्यां शब्दगाम्भीर्येण अर्थगौरवेण विचित्राद्भुत-समासजालेन उपमाद्यलङ्कारशोभया नानाविधार्थसन्दर्शनचातुर्येण मधुरातिमधुरं चातुर्येण प्रवचयन्ति विज्ञापयन्ति स्म । तदा भट्टार्याः तमेव श्रीमन्नारायणं पश्यन् आनन्दमनुभवन् हर्षबाष्पपर्याकुलेक्षणाः सगद्गदं विगळितवेद्यान्तराः प्रवचयामासुः। तस्यां वेलायां श्रीपराशरभट्टार्याः वेदपुरुष इव सहस्रवदनविलसितसाक्षात् आदिशेष इव निखिलपुराणप्रवचनपारीणव्यासभगवानिव श्रीरामदिव्यावतारतत्त्वं प्रवचनपटुवल्मीकभव दिव्यावतार इव दिव्यनादकालितद्राविडसुप्रभात-गानैकलक्ष्यः वनमालांशोद्भवविप्रनारायण इव कदाचित् परकाल इव कदाचित् भक्तिसार इव कदाचित् मुकुन्दमालया कदाचित् सोत्ररत्नेन कदाचित् भगवद्भाष्कारकृतश्रीभाष्यप्रपञ्चेन कदाचित् भगवद्विषयनिगूढ-तत्त्वप्रवचनपूर्वाचार्यस्वरूपेण कदाचित् रामानुजदिव्याज्ञया स्वेनैव विरचितपरमाद्भुतश्रीविष्णुसहस्रनामभाष्यभगवद्गुणदर्पणसन्दर्शनेन साक्षात्कृतहयवदन परब्रह्म इवाशेष भागवतजननयनयोः आविरासन्।

श्रीपराशरभट्टार्यान् प्रति श्रीरङ्गनाथोक्तिः -

दिव्यसूरिगाथालोलुपः सहस्रपात् विराट्पुरुषः श्रीमन्नारायणः स्वापदसमीपे अद्भुताद्भुतं कैशिकपुराणं व्याख्यायमानान् स्वदत्तपुत्रान् श्रीकूरेशतनयान् स्वदिव्यकरुणाकटाक्षविलसितदृग्भिः पातुमुद्युक्ताः बभूवुः। भगवान् स्वकण्ठधृतां दिव्यतुलसीमालिकां शेषांशुकं दिव्याद्-भुतानि हाराणि श्रीचन्दनादिबहुमानानि उपायनत्वेनानुगृहीतवान् । तदनु मेघस्तनिकगम्भीरेण हे पुत्र! रामानुजपदाश्रित! आचार्यकटाक्ष-विलसित! सन्तुष्टोऽस्मि, तृप्तोऽस्मि आनन्दपरवशोऽस्मि, धन्यं तावकं जीवनम्। धन्यमिदं भुवनम्। धन्याचेयं गोष्ठिः। आचार्यकृपाकटाक्षविलसितवते भवते मदीयं "परमपदम्" सपदि दीयते इति कण्ठोक्त्याऽनुगृहीतवान्। तच्च वचनं "सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति" इति कुलशेखरदिव्यसूरिवचनं सत्यमकरोदिति भागवतजनाः नितरां मुमुदिरे।

श्रीपराशराः श्रीमन्नारायणसन्दर्शन परवशाः निर्निमेषाः बाष्पवारिपरिपूर्णनेत्राः बद्धाञ्जलयः सविनयं प्रणेमुः। शनैःशनैः लब्धस्मृतयः देवाधिदेवं दृष्ट्वा "हे परंधाम! महान् प्रसादः अनुगृहीतोऽस्मि" इत्येव वदन्तः कमप्यलौकिकमानन्दमनुभवन्ति स्म। तत्रस्थाः महाभागवताः भक्ताः श्रीपराशरार्यसमाधानं श्रुण्वन्तः "हेजगत्पितः! किमीदृशः श्रीपराशरार्यविषये सङ्कल्पः युक्तरूपो वा? कथमस्मान् शिक्षयसि? आचार्यश्रीसूक्तिरहितमरुकान्तारजीवने वयं तिष्ठामः!" इति खिन्नाः क्षुभिताः श्रीरङ्गेशमश्रुपूर्णनयनैः प्रार्थयामासुः। श्रीपराशराः श्रीरङ्गेश्वरपादसन्निधिं प्राप्य "हे प्रभो,

अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः"

[श्रीमद्भगवद्गीता १८-६६]

इति पार्थाय दिव्याभयं प्रदत्तवानिति कर्णाकर्णिकया शृणुमः। परन्तु अद्य स्वयमेव मय्यनुकम्पां प्रदर्श्य एवं मां अनुगृण्हासीत्यत्र उभयविभूतिनायकानां चराचरहितैषिणां श्रीभाष्यादिमहाग्रन्थकर्तॄणां श्रीविशिष्टाद्वैतसिद्धान्तस्थापकाचार्याणां रामानुजसार्वभौमानां कटाक्ष एव। ते च शैशवावस्थायां डोलायमानं मां श्रीयामुनाचार्यदिव्याद्भुतसङ्कल्पानुगुणं श्रीपराशरनामधेयविलसितमकुर्वन्। परमवैराग्यधनाः श्रीकूरेशमिश्राः भगवदनुग्रहेण मम जनकाः सञ्जाताः। मदीयमातुः आण्डाल्देव्याः वात्सल्यमेवं भवत्पादारविन्दमकरन्दमधुपमकरोत्। क्व वा ब्रह्माण्डान्तर्गोळे कुत्रापि विद्यमानः जीवः कुत्र वा भगवत्पादारविन्दयुगळेऽकृतिमत्वप्रेमप्रकर्षावतां भागवतोत्तमानां गृहे जन्म? तत्रापि श्रीगोविन्दार्याणां [एम्बार्] गुरुराट् तल्लजानां परमानुग्रहः क्व? सर्वमिदं नूनं भगवन्निर्हेतुकजायमानकृपाकटाक्षाऽनुग्रह एव" इति स्वामिनं सगद्गदया वाचा प्रार्थयन्ति स्म।

श्रीपराशरार्यविषये भागवतजनविलापः -

एवमुच्चार्यमाणेषु कमप्यलौकिकानन्दमनुभवत्सु श्रीपराशरभट्टार्येषु तत्र स्थिताः दिव्यप्रबन्धगायकाः श्रीपराशरभट्टार्यान् वीक्ष्य

"उभयकावेरीपरिवृतः श्रीरङ्गनाथः भवतां श्रीसूक्तिमास्वादयन्नानन्दसागरे निमग्नाः युक्तायुक्तमपि विस्मृत्य केनापि पारवश्येनेवं वदति स्म। तच्च वचनं भवद्भिः शिरसा धार्यते वा? किमर्थमेवं कुरुथ ? भगवतः वचनं किमभूत्? भवन्तं साधनीकृत्य इमां लीलाविभूतिं संस्कारिष्यामि इति, भवति असाधारणकृपायाः परिणामः वा, भगवान् सर्वदैव एवं करोति । भगवतः अपि भागवत विषये काप्यसूया उदेति वा? अहो! भागवतजनेभ्यः कठिनपरीक्षा!" इति उच्चैः आक्रन्दयामासुः। एवं बहुप्रकारं विलपत्सु भागवतजनेषु श्रीपराशराः तान् सर्वान् वीक्ष्य भागवतोत्तमाः स्थितप्रज्ञाः भवन्तु। अयं लोकः लोकस्थिताः जनाश्च यदि भाग्यहीनाः भवन्ति चेदहं किं वा कुर्याम्? कुक्कुरजठरस्य हैरय्यङ्गवीनस्य च का वा मैत्री? विभूतिरियं मां सहते वा? भगवान् श्रीरङ्गराजः अत्रैव लीलाविभूत्यां इतोपि कतिपयदिवसान् मदीयकैङ्कर्यमङ्गीकृत्याऽभ्युपगमयति चेत् लीलाविभूतेः नित्यविभूतिपर्यन्तं सोपानश्रेणिकां न निर्मास्यामि किम्?" इति समादधुः। तदनु बद्धेनाञ्जलिना, नतेन शिरसा, सरोमोद्गमैः गात्रैः, कण्ठेन स्वरगद्गदेन च उद्गीर्णबाष्पाम्बुनयनेन श्रीमन्नारायण चरणौ शरणं प्रपद्ये इति द्वयमन्त्रमनुसन्दधानाः तमेव श्रीरङ्गनाथं रङ्ग रङ्गेति स्मरन्तः नमन्तः नृत्यन्तः भावयन्तः उन्मत्तास्समभवन्। पुनः स्मृतिं लब्धवन्तः "हे श्रीमन्नारायण! प्राप्यप्रापकविभो! जयीभव! भगवद्रामानुजमुनिचन्द्रमादयः यथा परमपदनाथमवर्णयन् । तथा श्रीवैकुण्ठनिकेतने मृदुतलफणिराट्पर्यङ्किकायां श्रीभूनीळादिदिव्यमहिषीभिः परिचर्यमाणदिव्यपदारविन्दं सुरेन्द्रमकुटमणिगणकिरणनीराजितपादपीठं समस्तदेवयक्षगरुडकिन्नरकिम्पुरुषनारदादिमहर्षिभिः संस्तूयमानदिव्यचरितम्, महाद्भुतदिव्यप्रभाराशिभिः दिव्यपञ्चायुधैः प्रकाशमानं पीताम्बरं कौस्तुभवत्सचिह्नं पुण्डरीकायताक्षं मम कुलधनं श्रीमन्नारायणं यावन्न नेत्रसात्करोमि; तदनु झटिति तच्च वैकुण्ठं त्यक्त्वा पुनः अस्मत्कुलधनं भोग्यं श्रीरङ्गराजचरणारविन्दमेव अस्मिन् भूलोकवैकुण्ठे उपाश्रयामि निश्चयेन" इति विज्ञाप्य, नम्बेरुमाळ् स्वामिनम् उत्सवमूर्तिनं

मूलविराट्रूपिणं देवतासार्वभौमं श्रीरङ्गनाथं शयानमापादचूडमनुभूय, श्रीमति गर्भालये निक्षिप्तदृष्टयः स्तब्धाश्चाभवन् । सर्वे श्रीरङ्गवासिनः चित्रार्पिता इव तान् श्रीपराशरान् साञ्जलयो नमस्कुर्वन्ति स्म ।

श्रीरङ्गनाथेन ब्रह्मरथप्रेषणम् -

श्रियःपतिः भगवान् श्रीरङ्गनाथः स्वसङ्कल्पानुसारं श्रीपराशरभट्टार्येभ्यः स्वदत्तपुत्रेभ्यः प्रेमातिशयेन सानन्दं ब्रह्मरथं दिव्यालङ्कारोपेतं समस्तनिजपरिजनपरिचारिकैः प्रेषयामास। समस्त-भागवतजनाः ज्ञानवृद्धाः, वयोवृद्धाः, बालाः, पण्डितपामरजनसमूहा समस्तमिमं वृत्तान्तं आकर्ण्य अत्यद्भुतं तं ब्रह्मरथं द्रष्टुं पर्युत्सुकाः उत्प्लुत्योत्प्लुत्य दर्शयामासुः। श्रीरङ्गनाथदिव्यालये घण्टानादः विजय-सङ्केताराव इव सूचितः। श्रीरङ्गभर्तृः दिव्याभरणानि श्रीपराशर-भट्टार्येभ्यः प्रेषयामासुः। तं च महारथं दृष्ट्वा हर्षोत्फुल्लातिरेकेण साष्टाङ्गं प्रणम्य श्रीपराशराः भगवदाज्ञया तस्मिन् उपविष्टाः। तदनु दिव्यचन्दनस्रक्पीताम्बराः ब्रह्मघोषेण वेदोच्चारणेन भूचक्रातपत्रेण भगवतः शेषांशुकश्रीशठारितुलसिमालिकाप्रसादपुरस्कारेण दिव्यमङ्गळ-नादैः वन्दिजनविहितजयजयशब्दैः सप्तप्राकारप्रदक्षिणप्रक्रियया कावेरीं सन्दर्शयन्तः श्रीरङ्गदिव्यक्षेत्रनिवासिनां पशुपक्षिक्रिमिकीटक-तरुपाषाणधूळिसिकतारेणुपर्यन्तानां जडाजडानां च वारं वारं प्रणमन्तः महोत्सवकोलाहलजनितमहानिनादेन श्रीरङ्गराजधान्याः युवराजा इव पुण्याङ्गनाभिः समर्पितनीराजनसपर्यया अत्यद्भुतं कमपि दैविकं तेजः धारयन्तः श्रीरङ्गेशपुरोहिताः स्वगृहं समागताः। श्रीपराशराः ब्रह्मरथादवतीर्य स्वजननीं साष्टाङ्गं प्रणमेमुः। "अयि मातः! ब्रह्मरथः अस्मत् गृहद्वारि तत्रभवत्याः अनुमतिं प्रतीक्षते। ब्रह्मरथोऽयं साक्षात् श्रीरङ्गनाथेन प्रेषितः। एहि मां चानुगृहाण इति सविनयमभ्यर्थयामासुः। भगवतः दिव्यसङ्कल्पस्य मूलनिदाना श्रीभट्टार्याणां जन्मदायी भगवती सा आण्डाल्देवी जननी च तथा वदतः स्वकुमारान् द्वारि विराजमान-विमानं च बहुवारं दृष्ट्वा "अयि! श्रीकूरेशमिश्रवंशप्रदीप! गोविन्दार्य-

कटाक्षलब्धदिव्यजीविन! अयि भगवद्रामानुजदिव्यकरुणाकटाक्षैकपात्र! मदीयपोत! विजयोऽस्तु नित्यम्। भगवते श्रीचक्रवर्तितनूजाय यानि मङ्गळानि राजमहिषी कौसल्या प्रदत्तवती तानि तवानिशं भवन्तु। निस्सीमनिरवधिकानन्दलोके प्रविशन्तु" इत्याशिषः व्यावहरन्ती तान् मूर्ध्नि आघ्राय महानन्दमभ्यनन्दत्। श्रीपराशरास्तु स्वमातुः नयनयोः महदानन्दं तृप्तिं च वीक्ष्य तस्याः दिव्यवाणीं च श्रुत्वा "अहो! मत्प्रार्थितमेतदेव। जननी च मामङ्गीकृतवती" इति हर्षामावापुः। ये च ब्रह्मरथेन साकं समागताः तेभ्यः सर्वेभ्यः श्रीवैष्णवेभ्यः परमान्नैः भोजयित्वा यथापूर्वं तस्मिन्नेव दिवसे श्रीपरकालसूरिणः "तिरुनेडुन्दाण्डकम्" इति दिव्यप्रबन्धस्य दिव्यार्थान् अनुगृहीतवन्तः। अतः "शन्नियोङ्गु" इति श्रीविष्णुचित्तसूरिणः दिव्यप्रबन्दार्थान् "अञ्जिरैप्पुल्तनिप्पाकम्" इति परकालसूरिणां प्रबन्धेन साकं विवृण्वन्तः-

'परवैयेरुम्परम् पुरुडा नीयेन्नै कैकोण्डपिन्
परवियेन्नुम् कडलुम् वरिप्पेरुम् पमाकिनल् ॥'[1]

"हे परमपुरुष! भवति करं प्रसार्य मां कटाक्षितवति अज्ञानोपहते भवसागरेऽत्र बहुमानमुपलब्धम्" इति (पेरियाल्वार्) विष्णुचित्तसूरिणां गाथांशमेव द्विरनुसन्धाय द्वयमन्त्रमेवोच्चारयन्तश्च बाष्पपूर्णे लोचने क्रमेणोन्मील्य शरीरं प्रकम्प्य शुचिस्मिताः मन्दस्मिताः स्वमूर्ध्नि विन्यस्तहस्ताञ्जलयः पद्मासनेन पद्मनाभं पद्मविशालनेत्रं पद्मनिलयं, स्वाचार्यं च कमप्यद्भुतभावनया समर्चयन्तः शेषशायिनं स्मरन्तः शय्यायां स्वदिव्यशरीरं योजयामासुः। श्रीपराशरभट्टार्येषु विगत-बाह्यस्पृहेषु शय्यायां शयिष्ठेषु शिरःकपालः पफाल। ब्रह्मरन्ध्रेणो-त्क्रमणमानेषु तेषु तत्र स्थिताः श्रीवैष्णवाः भयकम्पिताः तत्र भवतीमाण्डाल्देवीं जननीमुपगम्य समस्तमिमं वृत्तान्तं निवेदयामासुः। सा

[1] "பரவையேரும்பரம் புருடா நீயேந்நை கைகோண்டபிந்
பரவியேந்நும் கடலும் வரிப்பேரும் ।।பாகிங்ல்"

च तथाविधं शय्यायां शयिष्ठं भट्टार्याणां दिव्यदेहं दृष्ट्वा "अहो! वैकुण्ठनाथस्य लाभ:! श्रीरङ्गनाथस्य हानि:" इत्येवं वदन्ती सर्वानपि भागवतान् दृष्ट्वा "यदि स्वामी स्वयं संगृण्हाति चेत् तत्र कश्शोक: क: कोप:" इति दृढचित्ता वैराग्यज्ञानसम्पन्ना नितरां चकाशे। परन्तु सर्वेऽपि शोकार्णवनिमग्ना: किमपि वक्तुं न पारयन्ति स्म। हा हा कष्टम्" इति अश्रुपूर्णनयनै: जडां बभूवु:। तत्र भवन्त: श्रीपराशरार्यपरमानुग्रह-मुपलब्धा: वेदान्तिन: नञ्जीयरमहोदया: स्वगुरुदेवस्यान्तिमां वृत्तान्तवार्ताधिगम्य छिन्नद्रुम इव क्षुभितपारावार इव विवशा: भूमावपतन्। कथञ्चित् स्मृतिमधिष्ठाय श्रीरङ्गराजपुरोहितानां स्वाचार्याणां दिव्यचरमविग्रहसेवां कुर्वन्त: खिद्यन्ते स्म।

श्रीरङ्गनाथदेवस्य दिव्याज्ञा -

श्रीरङ्गदिव्यमन्दिर: स्वपुरोहितेभ्य: श्रीपराशरभट्टार्येभ्य: स्वसङ्कल्पानुसारेणास्मिन् कलियुगे दुरापं स्वकीयं परमपदमनुगृहीत-वानिति वृत्तान्तः सर्वत्र लोके व्याप्त:। ब्रह्मरथारूढान् श्रीपराशरार्यान् द्रष्टुं भक्तजनप्रवाह: कावेरीलहरीसदृश: प्रवहति स्म। अनेके (जीयर्-स्वामिन:) श्रीवैष्णवयतिवरा: परमैकान्तिन: भागवतोत्तमा: दिव्यप्रबन्धा-नुसन्धानं श्रीमन्नारायणनामोच्चारणं पूर्वाचार्याणां स्तोत्रपाठानि च शोकाकुलेन चेतसा विज्ञापयन्ति स्म। तदनु श्रीरङ्गदिव्यमङ्गळ-सुन्दरविग्रह: एवमादिशत् - "अयि भक्तगणा:! भागवता:! मा विचारयन्तु। श्रीपराशरभट्टार्या: मदीयसर्वजनपरिच्छदा वितान-पतद्ग्रहमुक्ताहारधवळचामरश्रीचन्दनतुलसीमालिकाभि: सम्माननीया:। यथाऽस्माकं अवभृथोत्सवं महता वैभवेन क्रियते तद्वत् मदीयदत्तपुत्रेभ्य: चरमकैङ्कर्यं निर्वर्तयध्वम्" इति। तच्चाद्भुताद्भुतं वचनमाकर्ण्य भागवता: नितरां तुष्टुवु:। अनुपदमेव श्रीरङ्गमन्दिरात् सकलविधं वस्तुजातं दिव्यगजकुम्भस्थले निधाय मङ्गळघोषै: समानयन्ति स्म। महात्मनां चरमयात्रा: विवाहमङ्गळसदृशा भवन्तीति लोकोक्ति: सफलाऽभूत्। श्रीरङ्गमन्दिरे श्रीरङ्गदेव: ताम्बूलचर्वणापि विहाय

अद्यास्माकमङ्गारको वक्री बभूवेति, भगवानपि स्वयमाखिद्यतेति विषयः न सामान्यः। भागवतजनायत्तसुखदुःखः भगवानिति पौराणिकं वचनं न सत्यदूरमेव। अहो श्रीरङ्गराजस्य भागवतपक्षपातः! अत एव भागवतप्रियः इति रङ्गनाथं दिव्यसूरिणो स्तुवन्तीति नातिचित्रम्। अथ वेदान्तिप्रमुखाः शिष्योत्तमाः श्रीपराशरभट्टार्याणाम् अनुजान् वेदव्यासभट्टार्यान् [श्रीरामप्पिळ्ळै] पुरस्कृत्य श्रीचूर्णपरिपालनादिकं[1] परमं वैदिकं वैष्णवं चरमदेहकैङ्कर्यं ब्रह्ममेधविधिविधानेन संस्कृत्य अवभृथस्नानं परिसमाप्य समागताः। लोकोत्तरदिव्यचारित्रान् श्रीपराशर-भट्टार्यान् भगवते सर्वशेषिणे चिदचिद्विशिष्टाय श्रीमन्नारायणाय तुलसिमालिकावत् सानन्दं समर्पयामासुः। वेदान्तिनस्तु शून्यहृदयाः आचार्यविरहमनुभवितुमशक्ताः न वा विधवावत् शिरोऽवगुण्ठ्य पश्चिमद्वारेण मठालयं प्रविशन्तः सर्वजनेभ्यः शोकमुत्पादयामासुः। अहो नञ्जीयरशिष्याग्रगण्यानाम् आचार्यनिष्ठा! सच्छिष्येण सदाचार्यविषये पत्नीसमानेन वर्तितव्यम्। इतीदं श्रीवैष्णवजनस्वरूपसाधकमिति ज्ञाना-नुष्ठानवतां वेदान्तिनां व्यवहारेणास्माकम् अवबुध्यते। अथ पराशर-भट्टार्याणां ब्रह्ममेधसंस्कारादयः श्रीरङ्गनाथस्य अवबृथोत्सवमिव कृतवन्तः शिष्योत्तमाः श्रीरामप्पिळ्ळै, श्रीवेदव्यासभट्टारकाश्च स्वभवनानि प्रति निवर्तयामासुः। श्रीवेदव्यासभट्टारकास्तु स्वाग्रजस्य वियोगेन शून्यहृदयाः खिद्यन्तः स्वभवनं शून्यसदनं श्रीरङ्गेशमन्दिरं च भट्टार्यरहितं नष्टां भागवतगोष्ठीं च दृष्ट्वा परागहीनं पुष्पमिव शोभाविहीनं नळिनसरमिव स्वमन्दिरञ्चाकलय्य शिरशि हृदये च ताडयन्तः उच्चैराक्रन्दन्तः रुरुदुः। एतां वेदव्यासभट्टारकानां शोकरोदनादिकं विदित्वा भट्टार्याणां जननी आण्डाल्देवी "आः! अयं वत्सः वेदव्यासः श्रीकूरेशगर्भे उत्पत्तुं नार्हति" इति शिष्यान् वदन्ती

---

1 पञ्चसंस्कारमपगतानां भागवतजनानां पार्थिवदेहत्यागानन्तरं भगवतः सन्निधेः भगवन्निर्माल्यमायाति । तदा श्रीवैष्णवाः दिव्यप्रबन्धमनुसन्दधानाः श्रीचूर्णमुल्लखले उत्पादयन्ति । पार्थिवदेहैलङ्कारं द्वादशोर्ध्वपुण्ड्रैः कुर्वन्ति । तत्क्रियायाः नाम ।

भट्टार्यमुपागम्य "अयि वेदव्यास! किमेतत्? किमभूत्? कुत एवं रोदिषि? किं ज्ञातिमात्रासूयां प्रदर्शयसि? अग्रजेषु श्रैवैकुण्ठदिव्यपदवीमधिगच्छत्सु तवेदानीं मात्सर्यभावः सम्भवति वा? नैतज्ज्ञानिनां युक्तम्। उत्तमलोकान् प्राप्य तवाग्रजाः सानन्दं सायुज्यमनुभवन्तः श्रीशठकोपमुनिना स्वदिव्यश्रीमुखसूक्त्यनुसारं [तिरुवाय्मोळि] अर्चिरादिमार्गेण नानाविधबहुमानानि चोपलभ्य, अमानवकरस्पर्शं च प्राप्य दिव्यसम्मानं च मुक्तपुरुषैः क्रियमाणं स्वीकृत्य श्रीभूनीळामहिषिभिः प्लाविते दिव्यास्थाने, नित्यसूरभिः सर्वदा "हावु हावु हावु" इति संस्तूयमानदिव्यसन्निधिं एवमेव सारूप्यसामीप्यसायुज्यं च अधिगतवान् भगवतः दिव्यपर्यङ्के स्वाचार्यकरुणाकटाक्षेण अधुना विराजते। अस्मिन् विषये रोदनं तु ज्ञात्यसूयाभूयिष्टं ज्ञापयति। यदि त्वमेवं वर्तेथाः अहमुदासीना भवेयम्" इति च शशास। स्वजनन्याः ज्ञानदशां आत्मनः अज्ञत्वं च आकलय्य श्रीवेदव्यसाः नितरां लज्जितवन्तः। अवनतमुखाः स्वमातृदिव्यचरणयोः साष्टाङ्गं प्रणम्य क्षमतां तत्रभवती इति स्वापराधाय क्षमां याचयित्वा महता वैभवेन श्रीपाराशरभट्टार्याणां समस्तचरमकैङ्कर्यतीर्थोत्सव अध्ययनानि च[1] सश्रद्धं परिसमाप्य श्रीरङ्गनाथ दिव्यसन्निधिमुपागमन्। श्रीरङ्गनाथदेवः श्रीरामपिळ्ळैनामानमनुगृह्णन् श्रीवेदव्यासभट्टारक अहं पराशरविहीनोऽभवम्। भवतां रक्षको भवामि। भवन्तः मा बाधामनुभवन्तु। इति सान्त्वयामास। अहो वेदव्यासभट्टारकाणां महिमा! साक्षात् श्रीरङ्गनाथेनाविश्वासित इति भागवतजनानां वचनानि नभोमण्डलं व्याप्तानीति आण्डाल्देवी च श्रुत्वा नितरां मुमुदे।

श्रीरङ्गनाथेन श्रीवेदव्यसभट्टारकेभ्यः ब्रह्मरथानुग्रहणम्-

यथा श्रीपराशरभट्टार्येभ्यः श्रीरङ्गेशपुरोहितत्वम्, विविधाः क्रियमाणाः प्रतिपत्तीः अस्मै वेदव्यासार्येभ्यश्च अनुग्राह्याः इति भगवतः

[1] नालायिरसेवाकालम् - दिव्यसूरिणां प्रबन्धानुसन्धानम् ।

दिव्यमङ्गळविग्रहात् कामपि दिव्याज्ञां शृण्वन्तः समस्ताः भगवद्भक्ताः नितरां सन्तुष्टाः समभवन् । वेदव्यासभट्टारकाः श्रीविशिष्टाद्वैत-सिद्धान्तप्रचराय श्रीपराशरभट्टार्याणामनन्तरं तानेवादर्शं भावयन्तः क्रमप्राप्तकैङ्कर्यान् कुर्वन्तः भागवतनिष्ठागरिष्ठाः श्रीरङ्गनाथसन्निधौ कैङ्कर्यनिर्वाहकाः भूत्वा सदा सार्थद्वयोच्चारणेन कालं गमयन्तः आचार्याज्ञामनुवर्तन्ते स्म। इत्थमत्यद्भुतं महामहिमपूर्णं श्रीपराशर-भट्टार्यजीवितविशेषं को वा वक्तुं पारयेत्? इदं च समस्त वृत्तान्तजातं श्रीपराशरभट्टार्याणां जीवितचरित्रं ज्ञापयति। विशिष्टाद्वैतसिद्धान्तप्रचारे तेषां सेवापि अनन्यसाध्या। एवं परिशीलितग्रन्थेषु श्रीपराशराणाम् अवतारपरिसमाप्तिकालः न स्पष्टमुपलभ्यते। कैशिकद्वादश्यां स्वपुराण-प्रवचनं च भगवते श्रीरङ्गराजाय निवेद्य तस्मिन्नेव दिने ब्रह्मरथमारुह्य परमपदमुपगता इति केचन प्रामाणिकाः गुरुपरम्पराग्रन्थरचयितारः मन्यन्ते। ते च जय नाम संवत्सरे शुक्लद्वादश्यां पुण्यास्तमयः सञ्जातः इति भावयामासुः। जय नाम संवत्सरः श्रीमद्रामानुजाचार्यकालेन सम्बद्धः षष्ठिसंवत्सरेषु १११४ आङ्ग्लकालमानरीत्या भवेत्। यदि वयं संवत्सरमेनं विश्वसिमः तर्हि भगवद्रामानुजाचार्याणां कालविषयोऽपि परिशीलनीय एव। भगवद्रामानुजाचार्याणां समयस्तु (क्री. श.) १०१७-११३७ इति सर्वैः अङ्गीकृतम्। एते च पूर्णायवः विशंत्युत्तरशतावयः श्रीवैष्णवदर्शनस्थापकाश्चासन्। श्रीपराशरभट्टार्याणां अवतारसमाप्तिः १११४ समये यदि अङ्गीकुर्मः तर्हि तस्मिन्समये रामानुजाचार्याः भुवमेवालञ्चक्रुः इति निर्णयः भवति। नाम श्रीपराशभट्टार्याणामनन्तरं त्रयोविंशतिवर्षपर्यन्तं स्वयमेव विशिष्टाद्वैतमतप्रचारमकुर्वन्निति वक्तव्यं भवति। श्रीवैष्णवसम्प्रदायवादिनः न कदापि पूर्वोक्तपद्धतिमङ्गीकुर्वन्ति। भगवद्रामानुजाचार्याणामनन्तरं श्रीवैष्णवसिद्धान्तनिर्वाहकदुरन्धराः श्रीपराशरभट्टारकाः एवेति विश्वसन्ति। रामानुजाचार्याणां काले अवशिष्टः विषयः श्रीवेदान्तिपरिवर्तनपूर्वकः पश्चिमदेशपर्यटनरूपः। पराशरभट्टार्यैः भगवद्रामानुजाज्ञया वेदान्तिनः परिवर्तनं विहितमिति रामानुजाज्ञया श्रीविष्णुसहस्रनामभाष्यं च कृतवन्त इति वदन्ति।

भगवद्रामानुजार्येषु भूलोकमधिवसत्सु श्रीपराशराः दर्शननिर्वाहकं न कदापि कुर्युरिति कृत्वा भगवद्रामानुजजीवनानन्तरमेव पराशरार्याणां निर्वाहकत्वमुपलब्धमिति कृत्वा श्रीपराशरार्याणामनन्तरं भगवद्रामानुजाचार्याः त्रयोविंशतिवर्षान् जीवितवन्तः इति मतं विवदन्ते। अतः पराशरार्याणामवतारसमाप्तिः ११९४ A.D. इति नाङ्गीकुर्वन्ति। श्रीपराशरार्याणां अवतारपरिसमाप्तिकाले श्रीरामानुजाचार्याणां वा श्रीकूरेशमिश्राणां वा प्रस्तावो ग्रन्थेषु नोपलभ्यते। तावुभावपि यत्र कुत्र वा प्रचारायागच्छतामिति केचनाभिप्रयन्ति। गुरुपरम्परादिग्रन्थेषु पराशरार्याणां मातृदेवतावृत्तान्तः बहुवारं प्रस्तावितः। श्रीकूरेशानां जीवनकालविषये सन्देहो भवत्येव। एवं श्रीपराशरभट्टार्याणां मध्यप्रतोलिभट्टार्याः इति नाम्ना कश्चन पुत्रो समजनीति केचन भट्टार्यवंशस्थाः अधुना स्ववंशवृक्षेषु उपवर्णयन्ति, परन्तु नायं विषयः विश्वसनीयः। कुत्रापि प्रमाणाभावादिति परिशोधकाः वदन्ति। यदि वयं परिशीलयामश्चेत् श्रीपराशरार्याणां चरमक्रियाः ब्रह्ममेधसंस्कारादयः तेषां भ्रातृचरणैः श्रीवेदव्यासभट्टारकैः निर्वर्तिताः इति तत्तद्ग्रन्थेभ्यः स्पष्टं जानीमः। अनेनाधारेण तेषां पुत्राः न सन्तीति ज्ञायते। यतः पुत्रं विना अन्यः न कदापि श्राद्धादिकं कुर्यात्किल। अथवा अनुपनीता वा अल्पायुष्का वेति वक्तुमपि न शक्यते। श्रीरङ्गनाथानां दिव्याज्ञया श्रीपराशराणामनन्तरं वेदव्यासभट्टारका एव दर्शननिर्वाहकाः समभवन्निति परिदृश्यमानत्वात् श्रीपराशरार्याणां सन्ततिः नास्तीत्येव वक्तुं शक्यते। भगवद्रामानुजपदाश्रितेषु मुख्याः वयोवृद्धाः कूरेशमिश्राः नडादूराळ्वान्, मोदलियाण्डान्, किडाम्बि याच्वान् इत्यादयः प्रसिद्धाः। एवमेव रामानुजाचार्यैः ज्ञानपुत्रत्वेन स्वीकृताः तिरुक्कुरुगैप्पिरान् पिळ्ळान् श्रीपराशरभट्टार्याश्च मुख्यतमौ बभूवतुः।

चतुस्सप्ततिसिंहासनेषु भट्टार्याणां स्थानम् -

१. श्रीयामुनतनूजाः शोट्टनम्बिमहाभागाः ।

२. पेरियनम्बि [महापूर्णाः] महाभागपुत्राः पुण्डरीकाक्षमिश्राः ।

३. तिरुक्कोट्टियूर्नम्बि [गोष्ठीपूर्णाः] तनूजाः तेर्काळ्वान् महाभागाः ।
४. तिरुमलैयाण्डान् पुत्राः सुन्दरत्तोळुडयारस्वामिनः ।
५. पेरियतिरुमलनम्बि [श्रीशैलपूर्णाः] पुत्राः तिरुक्कुरुगरैप्पिरान् ।
६. पिळ्ळै तिरुमलनम्बिमहाशयाः ।
७. श्रीकूरेशमिश्राः ।
८. श्रीकूरेशमिश्राणां तनूजाः "श्रीपराशरभट्टार्याः" ।
९. श्रीरामपिळ्ळै [श्रीव्यासभट्टारपादाः] ।
१०. अस्यां परम्परायामष्टमस्थाने श्रीपराशरार्याः सन्ति। परन्तु ब्रह्मतन्त्रस्वतन्त्रपरकालस्वामिभिः कृते ग्रन्थे ६४ संख्यायुक्ताः विराजन्ते।
७४ मारोन्त्रिल्लामारुदीयाण्डान् इति चतुस्सप्ततिसंख्याकाः विराजन्ते[1]।

❖ ❖ ❖

---

[1] श्रीरामनुजः सप्तशतैर्यतीनां पीठैश्चतुस्सप्ततिभिस्समेतः ।
एकान्तिभिर्द्वादशभिस्सहस्रैः श्रीरङ्ग आस्ते यतिसार्वभौमः ।।
इति गुरुपरम्पराप्रभावेऽपि वर्तते ।

द्वितीयः प्राकारः

श्रीमते रामानुजाय नमः ।

।। द्वितीयः प्राकारः ।।

श्रीपराशरभट्टार्याणां कृतिपरिचयः -

श्रीपराशभट्टार्याः महाप्रतिभासम्पन्नाः। दक्षिणभारतदेशे प्रसिद्धं श्रीरङ्गमहाक्षेत्रं स्वजन्मनालञ्चक्रुः। बाल्यात्प्रभृति तर्क-व्याकरण-मीमांसादिषु अतीव निष्णातानां पञ्चस्तवादिनिर्माणदुरन्धराणां महाकवीनां श्रीकूरेशमिश्राणां स्वपितृपादानां समक्ष एव प्राथमिकीं विद्यामधिगताः। तदनु भगवद्रामानुजाचार्याणामाज्ञया नियुक्तानां महादेशिकानां श्रीगोविन्दभट्टार्याणां पादसन्निधौ वेदवेदान्तविद्यां सम्प्रदायविद्यां चाधिगताः। यथा पितृपादाः व्याकरणादिषु दक्षाः एवमेवेति षडङ्गविद्यासु निष्णाताऽभवन्। न केवलं शास्त्रपाण्डित्यम्। अपि तु गङ्गावेगमपि स्वकविताधारतया मन्दयितुं समर्थाश्चाभवन्। द्रमिडभाषायां संस्कृतभाषायाञ्च कृतयः निर्मितवन्तः परां कीर्तिमुपागमन्। श्रीवैष्णवसाहित्ये रामानुजाचार्याणामनन्तरं पराशर-भट्टार्याणामेवाऽद्वितीयं स्थानमस्तीति। इदमेवालं एतेषां पाण्डिती-प्रकर्षायाः औन्नत्यमवगमनाय। अस्माकं तु भगवदनुग्रहेण श्रीपराशरभट्टार्यकृतयः षडेवोपलभ्यन्ते। तासु

१. अष्टश्लोकी
२. क्रियादीपः
३. भगवद्गुणदर्पणम् [श्रीविष्णुसहस्रनामभाष्यम्]
४. श्रीगुणरत्नकोशः
५. श्रीरङ्गनाथस्तोत्रम्
६. श्रीरङ्गराजस्तवः

इति प्रसिद्धमुपागताः। अन्याः त्रयः कृतयस्तुनोपलभ्यन्ते।

१. अध्यात्मखण्डद्वयविवरणम्

२. तत्त्वरत्नाकरः

३. लक्ष्मीकल्याणनाटकञ्च

इति। श्रीवेदान्तदेशिकचरणानां भाष्ये व्याख्यानेषु च क्वचित् क्वचित् श्रीपराशराणां एताः त्रयः उटङ्किताः चकासन्ते। श्रीवेदान्ताचार्याणां काले सम्पूर्णरूपेणोपलब्धाः भवेयुः। अधुना तु सम्पूर्णरूपेण वा पठनपाठनादिषु वा सम्प्रदायगृहेषु वा न पश्यामः। सुबालोपनिषत् [व्याख्यापि] विवरणमपि पराशरैः विहितमिति ज्ञायते। एतदपि वेदान्ताचार्यणां तत्त्वमुक्ताकलापे उट्टङ्कितम्। श्रीपराशरभट्टार्याणां द्राविडभाषापाण्डित्यं तु निरुपमानम्। द्राविड्यां कैशिकमाहात्म्यं तावत् अधुना मुद्रितग्रन्थेषूपलभ्यते। एवमेव तत्र भवता श्रीपरकालदिव्यसूरिणा द्राविड्यां विरचितं तिरुनेडुन्दाण्डकम् इति महाप्रबन्धं श्रीपराशराः स्वयमेव श्रीरङ्गमहाक्षेत्रे उपन्यस्ताः। तच्च विवरणादिकं च उपलभ्यते। अन्यच्च श्रीपराशरभट्टार्याणां मुक्तकाः संस्कृतद्राविडरूपाः रुचिररुचिरार्थाः सर्वे श्रीवैष्णवसम्प्रदायावलम्बिभिः प्रतिनित्यं पठ्यते। एते मुक्तकश्लोकास्तु अविच्छिन्नाः श्रीवैष्णवदेवालयेषु अधुनापि पारायणमाध्यमेन अनुसन्धीयन्ते।

१. द्रविडवेद इति दिव्यसूरिणां गाथासमुदायः सर्वैः अङ्गीक्रियते। यथा संस्कृतवेदानां भगवत्सन्निधौ पारायणं क्रियते तद्वत् द्राविडवेदाध्ययनञ्च भगवत्सन्निधौ सरागं पारायणं क्रियते एव। संस्कृतवेदस्य तु नियमबाहुळ्यं दृश्यते। द्राविडवेदस्य न जातिनियमः, न वा स्वरनियमः भवति स्त्रीशूद्रादीनां सर्वेषामपि अर्हता विद्यते। "नालायिरम्" इति द्रविडवेदः कीर्त्यते एव। "चतुस्सहस्रगाथामयः द्रविडवेदः" वेदचतुष्टयरूपः इति कृत्वा सर्वैः पठ्यते। तत्र वेदस्यारम्भे यथा "हरिः ओम्" इति पठ्यते तद्वत् द्रविडवेदारम्भेऽपि "पोदुत्तनियन्" इति केचन श्लोकाः गुरुपरम्परावन्दनपूर्वकाः पठ्यन्ते। गुरुपरम्परा श्लोकानां रचयितारः श्रीपराशरभट्टार्येभ्यः अपि प्राचीना एव। तैः कृतेषु प्रार्थनाश्लोकेषु श्रीपराशरभट्टार्यैश्च कृतद्वादशसूरिवन्दनपूर्वकप्रार्थना-

श्लोकोऽपि सर्वैः पठ्यन्तेति कृत्वा श्रीपराशरभट्टार्याणां द्रमिडवेदविषये श्रद्धां निष्ठां च जानीमः। सत्स्वपि श्रीपराशरसमकालीनेषु बहुष्वपि महाप्रभाववत्सु विद्वद्वरेषु ज्ञानिषु एतेषामेव प्राधान्यं ददुः।

भूतं सरश्च महदाह्वयभट्टनाथ-
श्रीभक्तिसारकुलशेखरयोगिवाहान्।
भक्ताङ्घ्रिरेणुपरकालयतीन्द्रमिश्रान्
श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम् ।।
[नित्यानुसन्धानतनियन्]

मुक्तकोऽयं सर्वदिव्यसूरिवन्दनारूपः द्रविडवेदारम्भे पठ्यते। एवमेव श्रीविष्णुचित्तपुत्री गोदादेवी महाविष्णोः प्रियतमा सञ्जाता। तस्याः "आमुक्तमाल्यदा" इति रमणीयं नाम चकास्ति। सा स्वानुष्ठानेन श्रीरङ्गनाथं पतित्वेनावृणोत्। सैव श्रीरङ्गनायकी इति सर्वैः प्रार्थ्यते। लोके सर्वत्र श्रीवैष्णवदेवालयेषु श्रीभूनीळामहिषीभिस्साकं तस्याः अपि अर्चामूर्तिः परिदृश्यते। एषा महाकवयित्री। द्राविड्यां "तिरुप्पावै", "नाच्चियार् तिरुमोळि" नाम ग्रन्थद्वयं विरचितवती। तत्र तिरुप्पावै नाम ग्रन्थः त्रिंशत् गाथा भूयिष्ठः वेदवेदान्तोपनिषदादि रहस्यभूयिष्ठः श्रीकृष्णसुप्रभातस्तवरूपः। द्राविडवेदे महान्तं स्थानमभजत्। तस्य तिरुप्पावै महाप्रबन्धस्य प्रार्थनाश्लोकः श्रीपराशरभट्टार्यैः विरचितः सर्वजनसंस्तुतः विराजते।

"नीळातुङ्गस्तनगिरितटी सुप्तमुद्बोध्य कृष्णं
पारार्थ्यं स्वं श्रुतिशतशिरस्सिद्धमध्यापयन्तीम्।
स्वोच्छिष्टायां स्रजि निगळितं या बलात्कृत्य भुङ्क्ते
गोदा तस्यै नम इदमिदं भूययेवास्तु भूयः।।

इत्ययं प्रार्थानाशेलोकः रसघनरूपः प्रतिदिनं देवालयेषु महाभागवताः पठन्ति। अस्य महाप्रबन्धस्य श्रीपराशरभट्टार्याणां मुक्तकश्लोकः मकुटायमानः राराजते। नालायिरदिव्यप्रबन्धे नम्माळ्वार् कृत तिरुवाय्मोळि महाप्रबन्धः सामवेदरूप इति सम्प्रदायः। तस्य महाप्रबन्धस्य प्रार्थनारूपश्लोकाः संस्कृतद्रमिडभाषामयाश्च दृश्यन्ते। तत्र

श्रीपराशरभट्टार्याः द्राविड्यां श्रीशठकोपदिव्यसूरेः महाप्रबन्धस्य प्रार्थनारूपां गाथां समर्पितवन्तः।

" वान्तिगळुंशोलै मदिळरङ्गरवण्पुगळ्मेल्
आन्र तमिळ्मरै गळायिरमुं । ईन्र
मुदल् ताय् शडगोपन्, मोयम्पाल वलर्त
इदत्ताय् इरामानुशन् "

सा च परममनोहराऽधुनापि सर्वैः भागवतोत्तमैः अस्य महाप्रबन्धाध्ययनवेलायां पठ्यतेति अहो पराशरार्याणां महिमा! धन्यत्वञ्च। एवमेव श्रीरङ्गनाथदेवस्य उत्सवेषु अभिषेकेषु पूजासु श्रीपराशरभट्टार्याः आशुरूपेण मुक्तकानि अद्भुताद्भुतेन वेदवेदान्तरहस्ययुक्तानि वदन्ति स्म । अतः द्राविड्याम् एतेषां पराशरार्याणां "तिरुमञ्जन कवि" [अभिषेककविः] इति नामापि श्रूयते। प्रायशः एवं विधानि मुक्तकानि त्रिंशत्संख्याकानि उपलभ्यन्ते।[1] श्रीरङ्गनाथस्याभिषेकवेलायां कदाचित् आशुरूपेण श्रीपराशरभट्टार्यैः समर्पितमिमं श्लोकं सर्वोत्तममिति महाभागवतैरङ्गीक्रियते। जीवपरमात्मनोः वादात्मकोऽयं श्लोकः श्रीरङ्गदेवस्य भक्तपराधीनतां व्यनक्ति-

"त्वं मेऽहं मे कुतस्तत् तदपि कुत इदं वेदमूलप्रमाणात्
एतच्चानादि सिद्धात् अनुभवविभवात् तर्हि साक्रोश एव।
क्वाक्रोशः कस्य गीतादिषु मम विदितः कोऽत्रसाक्षीसुधीस्स्यात्
हन्त त्वत्पक्षपाती स इति नृकलहे मृग्यमध्यस्थवत् त्वम्।।"

भगवान् स्वाभिषेकवेलायां आर्द्रं हरिद्रावसनं शिरसि धृत्वा तुलसिमालां दधानः प्रतिज्ञां जीवात्मलाभाय करोतीति उत्प्रेक्ष्यन्ते। अहो पराशराणां भावुकता जीयात्। श्रीपराशरभट्टार्याः क्रान्तिदर्शिनः महामेधाविन-

---

[1] "SRI PARASARASABHATTA" by Sri Padmanabhan- page २१५.

श्चासन्। अत्यल्पे वयसि बाल्यावस्थायां स्वपितुः समीप एव विद्यारहस्यान् अधिजग्मुः। वेदपाठशालायामपि वेदाध्ययनमकुर्वन्। भगवद्रामानुजाचार्याणां हृदयज्ञता तेषां सिद्धान्तसौरभं स्वयमाघ्रायमाणाः परेभ्यः अपि समर्पयामासुः। इत्थं संस्कृतद्राविडमर्मज्ञाः प्राचीनकाव्य-नाटकालङ्कारशब्दशास्त्रादिषु प्रतिपादितान् अत्यद्भुतान् विशेषान् स्वमनसि निधाय स्वाचार्याणामाज्ञया वेदवेदान्ततत्त्वसिद्धान्तान् स्वप्रतिभया ग्रन्थरूपेण विरचय्य स्वाराध्यदैवताय श्रीरङ्गनाथाय समर्पितवन्तः। एते च कविता व्यासङ्गे काळिदास-भवभूति-श्रीहर्षादीन् च अतिशयन्ते। शास्त्रचर्चासु दर्शनस्थापकानपि स्वाद्भुतपाण्डित्य-गरिम्णा विवदन्ते। वेदबाह्यान् कुदृष्टीन् मायावादिनः, नास्तिकान्, हेतुवादिनः, स्वतर्ककर्कशाशनिसंनिपातैः प्रतियुद्ध्यन्ते स्म। स्वाभिप्रायं दृढीकरणाय वेदपुराणादीन् बहुचमत्कारं प्रतिपादयन्ति स्म। एतेषां ग्रन्थाः सर्वाणि स्तोत्राणि च पूर्वाचार्याणां वैष्णवसिद्धान्तस्थापना-चार्याणामभिप्रायानुसाराणि च भूत्वा श्रीमहा-विष्णोः पारम्यप्रतिपादकानि च भवन्ति। । एवमष्टाक्षरमहामन्त्र-द्वयमन्त्र-चरमश्लोकार्थप्रतिपादकानि च भूत्वा सर्वोत्कर्षेणाधुना श्रीवैष्णवसिद्धान्ते विराजन्ते। श्रीपराशर-भट्टार्याणां कृतीनाम् आदौ तु

"श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतश्श्रीमान् श्रेयशे मेऽस्तु भूयसे।।"

इत्ययं श्लोकः तेषां वन्दनारूपेणोपनिबद्धः सर्वोच्छस्थानमवाप।

अष्टश्लोकी - [विषयपरिशीलनम्]

श्रीपराशरभट्टार्याणां सर्वतोमुखपाण्डित्यावगमनाय "अष्टश्लोकी" इति स्तोत्रपाठः एक एवालम् इति महापण्डितजनाभिप्रायः नितरां शोभते। अष्टश्लोकीति नाम्नैवात्र अष्टौ श्लोकाः भवन्तीति जानीमः। श्रीवैष्णवसिद्धान्तस्य मूलकन्दायमान महामन्त्रः अष्टाक्षरीमहामन्त्र इति कृत्वा तन्मन्त्रं [तिरुमन्त्रं] अष्टभिः श्लोकैः पूर्वसूरिव्याख्यानुगुणं व्याकृतवन्तः। अष्टश्लोकी तु प्रपन्नजनानां नित्यपारायणेषु सर्वप्रथमं

स्थानमुपलभ्यते। अष्टश्लोकी परिचयहीनाः श्रीवैष्णवाः न भवन्त्येव। आत्मना क्रियमाणानि सर्वाण्यपि कर्माणि भगवत्कैङ्कर्ये एवान्वयन्ति, न तु मुक्तिसाधकानीति ज्ञात्वा तत्रोपायबुद्धिं च त्यक्त्वा उपदेशगम्य-शेषत्वपारतन्त्र्यकैङ्कर्याणि सम्यक् जानन्तः, अत्रानादिसिद्धः भगवतः अष्टाक्षरीमहामन्त्र एव शरणमिति भागवताः भावयन्ति। एतद्ज्ञानाधि-गमनमेव परमं प्रयोजनमस्ति । आधुनिके जगति स्वरूपज्ञानिन आचार्याः। आचार्यैकव्रताः शिष्याः सुदुर्लभाः इति कृत्वा भगवान् श्रियःपतिः स्वयमेव शिष्यः भूत्वा उपायान्ताराभावात् स्वयमेवा-चार्योऽभवत्। श्रीमति नानावृक्षलतागुल्मयुते बदरिकाश्रमनाम्नि दिव्याश्रमे नरनारायणरूपेणावतीर्य सकलवेदसारांशभूतं अनादिसिद्धं तिरुमन्त्रं[1] नरायोपदिदेश । तदनु स्वयमेव नारायणः जगज्जनन्यै महालक्ष्म्यै स्वपत्न्यै द्वयमन्त्रं स्नेहपारवश्येनानुगृहीतवान्। तदनु द्वापरयुगे कुरुक्षेत्रमहासंग्रामे स्वभक्ताय प्रपन्नाय अर्जुनाय श्रीचरमश्लोकं[2] दयया भगवान् देवकीनन्दनः श्रीकृष्णः उपादिशत्। एवं प्रकारेण तिरुमन्त्रद्वयमन्त्रचरमश्लोकाः उपदेशैकमूलग्राह्या परम्परारूपेणात्र भुवि सुकृतीनामेवोपलभ्यन्ते। एतेषां मन्त्रत्रयाणां दिव्यार्थावगमनं वेदशास्त्रमूलकत्वात् न सर्वजनलभ्यमभूत्। अतः पूर्वाचार्याः स्वकृपावशात् तत्तदर्थान् सर्वजनावगमनाय कृपानिधयो भूत्वा सुलभमार्गमाश्रित्यानुगृहीतवन्तः। पूर्वाचार्यहृदयमर्मज्ञाः परमकारुणिकाः श्रीरङ्गेशपुरोहिताः श्रीपराशरभट्टार्यास्तु तान् च दिव्यार्थान् अष्टाक्षरमहामन्त्रस्य, द्वयमन्त्रस्य, चरमश्लोकस्य च संग्रहरूपेण

1 [ॐ नमो नारायणाय] श्रीअष्टाक्षरीमहामन्त्रं भगवान् नारायणः आचार्यो भूत्वा शिष्याय नराय कृपया उपादिशत्। तस्मिन् समये वीतरागिणः महामुनयः तौ दृष्ट्वा श्रीनारायणचरणकमलमुपाश्रिताः नारायणकृपा-पात्राश्चाभवन्। द्वयमन्त्रस्तु [श्रीमन्नारायणचरणौ शरणं प्रपद्ये, श्रीमते नारायणाय नमः।

2 सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।।

अष्टश्लोकीति नाम्ना अनुगृहीताः यांश्च दिव्यार्थान् प्रपन्नजनकालक्षेपानुगुण्येन विवव्रुः। अष्टश्लोक्यां प्रथमे श्लोके तु मन्त्रराजस्य नारायणाष्टाक्षरस्यार्थं, तस्मिन् महामन्त्रे स्थितं प्रणवं एवं व्याख्यायन्ते - प्रणवो नाम "ओम्" इति ओङ्कार इति उच्यते। अस्मिन् प्रणवे अ+उ+म इति त्रयो वर्णाः वर्तन्ते। एतेषां त्रयाणां संयोगस्वरूप एव प्रणव इत्युच्यते[1]।

"अकारार्थो विष्णुः जगदुदयरक्षा प्रळयकृत्
मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम्।
उकारोऽनन्यार्हं नियमयति सम्बन्धमनयोः
त्रयीसारस्त्र्यात्मा प्रणव इममर्थं समदिशत्।।"

इति, मकारार्थः जीवः, अकारार्थाय सर्वेश्वरायैव दासः भवति नेतरस्येति निश्चितार्थः। अत्र तु ऋग्यजुस्सामाधर्ववेदेभ्यः सारतया क्रमात् अकार-उकार-मकाराः प्रादुर्भूताः इति ज्ञायते। अतः वेदसारभूतोऽयं प्रणवः जीवेश्वरयोः संबन्धं उपदिशतीति प्रणवार्थं उपादिशन्। सर्ववेदान्तसारतया स्वरूपोपायपुरुषार्थप्रतिपादकतया सदा मुमुक्षुभिः अनुसन्धेयस्य रहस्यत्रयस्य सम्प्रदायपरम्पराप्राप्तमर्थं दर्शयितुकामाः स्वरूपज्ञानपूर्वकत्वात् अभीष्टोपायप्रवृत्ते स्वरूपप्रतिपादनपरं शास्त्रगृहीतं श्रीमदष्टाक्षरमन्त्रं आदौ विवृणोति चतुर्भिश्श्लोकैः। अथ द्वाभ्यां द्वयं मूलमन्त्रविवरणरूपं स्वरूपानुरूपोपायपुरुषार्थप्रतिपादनपरं मन्त्ररत्नं, ततो द्वाभ्यां द्वयविवरणरूपं चरमश्लोकं अनुगृहीतवन्तः। द्वितीयश्लोके

"मन्त्रब्रह्मणि मध्यमेन नमसा पुंसस्वरूपं गतिः
गम्यं शिक्षितमीक्षितेन पुरतः पश्चादपि स्थानतः।
स्वातन्त्र्यं निजरक्षणं समुचिता वृत्तिश्च नान्योचिता
तस्यैवेति हरेर्विविच्य कथितं स्वस्यापि नार्हं ततः।।"

नमश्शब्देन अहंकारममकारनिवृत्तिं निवृत्तिभूतस्वरूपस्य अत्यन्तं

---

[1] अष्टश्लोकीव्याख्यानम् ।

पारतन्त्र्यं पारतन्त्रस्यानुरूपमुपायं, पारतन्त्रस्य पराकाष्ठतया तदीयशेषत्वं चानुगृहीताः।

अकारार्थायैव स्वमहमथमह्यं न निवहाः
नराणां नित्यानामयनमिति नारायणपदम्।
यमाहास्मै कालं सकलमपि सर्वत्र सकला-
स्ववस्थास्वाविस्स्युर्मम सहजकैङ्कर्यविधयः।।

तृतीयश्लोके नारायणशब्देन अहम् अकारवाच्याय विष्णव एव शेषभूतोऽस्मि। मम शेषभूतो न भवामीति नमः शब्दार्थानुवादः स्वीकृत्य "नारायण" पदं विवृण्वन्तः। रीङ्-क्षये इति धातोरुत्पन्नः रशब्दः क्षयिष्णुवाची। राः क्षयिष्णवः न भवन्तीति नराः नित्याः नराणां समूहाः, नाराः, ते च ज्ञानानन्दामलत्वादयः, ज्ञानशक्त्यादयः वात्सल्यसौशील्यादयश्च दिव्यात्मगुणाः दिव्यमङ्गळविग्रहः, कान्तिसौकुमार्यादयः दिव्यमङ्गळविग्रहगुणाः दिव्यभूषणानि, दिव्यायुधानि, दिव्यमहिष्यः, नित्यसूरयः, छत्रचामरादिसाधनानि, द्वारपालकाः, गणाधिपाः, मुक्ताः, परमाकाशः, मूलप्रकृतिः, बद्धात्मनः, कालः महादादिविकाराः, अण्डानि, अण्डान्तर्गत देवादि पदार्थाश्च भवन्तीति । अनादिसिद्धनाशरहितचेतनाचेतनकोटीनाम् अयनं स एव श्रीमन्नारायणः इति "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतिप्रमाणेन अन्तर्व्याप्तिबहिर्व्याप्तितः सौलभ्यपरत्वकल्याणगुणप्रकाशकाय सर्वेश्वराय तस्मै सर्वकालसर्वावस्थासु स्वतस्सिद्धेनाहं सर्वविधकैङ्कर्यादिपरिचर्याः करवाणि" इति अनुगृहीतवन्तः।

"देहासक्तात्मबुद्धिर्यदि भवति पदं साधु विद्यात्तृतीयं
स्वातन्त्र्यान्धो यदि स्यात् प्रथममितरशेषत्वधीश्चेद्द्वितीयम्।
आत्मत्राणोन्मुखश्चेन्नम इति च पदं बान्धवाभासलोलः
शब्दं नारायणाख्यं विषयचपलधीश्चेत् चतुर्थीं प्रपन्नः।।"

अथ चतुर्थश्लोके (तिरुमन्त्रं) मन्त्रराजम् अष्टाक्षरमहामन्त्रं संग्रहेण विवृण्वन्ति स्म। प्रपन्नजनस्य प्रामादिकदेहात्मभ्रमादिदोषो अप्रसङ्गाय तदनुसन्धाना-वश्यकमित्याशयेनेनात्र बहुचमत्कारमुपदिशन्ति। यो वा स्वदेह एव जीव इति भावयति सः प्रणवे स्थितं तृतीयं पदं मकारं जानीयात् । यतो हि मकारपदं मन-ज्ञाने, मदि-हर्षे, मनु-अवबोधने, मसि-परिणामे इति धातुभ्यः उत्पन्नम्। अत्र पदशब्दः तदर्थपरः। "वेदवित्" इत्यादौ वेदशब्दवत्। तेन जडत्वाचेतनत्वस्थूलत्वदुःखरूप-त्वादिविशिष्टदेहविलक्षणज्ञानानन्दस्वरूपत्वानन्दगुणकत्वाणुत्वविशिष्ट-वस्तुप्रतिपादकं मकार इति पदं साधु विजानीयादिति। एवंविधमकारा-र्थानुसन्धानेन आत्मस्वरूपस्य देहादिविलक्षणत्वप्रतीत्या देहात्मभ्रमो निवर्तत इति प्रथमे पादे प्रतिपादितवन्तः। "शरीरभिन्नः जीवोऽहं स्वतन्त्रपरः" इति स्वाधीनताबुद्ध्या तिरोहितभगवच्छेषत्वस्वरूपः अन्धो यदि स्यात्तर्हि प्रणवे स्थितं प्रथमपदं "अ" कारं जानीयात्। अव-रक्षणगतिहिंसादिषु" इति धातोरुत्पन्नं सर्वकारणत्व-सर्वरक्षणत्व-सर्वसंहारकत्व-लक्ष्मीपतित्व-सर्वशेषत्व-सर्वकल्याणगुणात्मकत्व-विशिष्ट-विष्णुप्रतिपादकं, लुप्ततादर्थ्यचतुर्थीकं, अकारं विद्यादिति तथा च अकारार्थानुसन्धानेन "सर्वप्रकारेणापि भगवतः शेषित्वं, स्वस्य तच्चेषत्वं इति प्रतीत्या स्वात्मैक शेषत्वरूपस्वातन्त्र्यभ्रमो निवर्तते इति वेदान्तार्थमुपदिष्टाः। "इतरशेषत्वधीश्चेत्" इतरेषां भगवल्लक्ष्मी भागवताचार्यव्यतिरिक्तानां शेषः इति यस्य बुद्धिः उदियात्तदा प्रणवे स्थितं द्वितीयं अवधारणार्थकं "अ" कारान्वितं उकारं साधु विद्यात् इति, उकारार्थानुसन्धानेन परमात्मजीवात्मनोः शेषिशेषभावरूपसम्बन्धस्या-नन्यार्हत्वप्रतीत्या इतरशेषत्वभ्रमः निवर्ततेति अनुगृहीताः।

अथ भगवतः शेषभूतोऽहं मद्रक्षणे अहमेव शक्तः इति यदि सम्भावयति जीवः तस्मिन् समये नमःपदं जानीयात्। नमः पदार्थं तु मद्रक्षणे नाहं स्वतन्त्रः, सर्वदा परतन्त्रो भवामि, स एव मां रक्षतु, तमेवोपायतया स्वीकृत्य स्वयत्ननिवृत्तः निर्भरानुसन्धानो भवेयम् इति

चिन्तनीयः। यदि ·आभासमात्रदेहबान्धवाः ममाभीष्टा इति कृत्वा बान्धवाभासलोलश्चेत् नारायणपदं जानीयात्। नारायणपदं तु भगवानेव सर्वविधबन्धुः इति तेन साकं जीवस्य नवविधसम्बन्धाः भवन्तीति फलति। तद्यथा --

"पिता च रक्षकश्शेषी भर्ता ज्ञेयो रमापतिः।
स्वाम्याधारो ममात्मा च भोक्ता । चैवमनूदितः।।"

माता पिता भ्राता निवासश्शरणं सुहृद् गतिः नारायणः इति

१. सः भगवान् पिता - अहं पुत्रः इति,
२. सः भगवान् रक्षकः - अहं रक्ष्यः इति
३. स एव भगवान् प्रभुः - अहं सेवकः इति
४. स एव नारायणः भर्ता - अहं भार्या इति
५. स एव नारायणः ज्ञेयः - अहं ज्ञाता इति
६. स एव नारायणः स्वामी - अहं स्वं भवामि इति
७. स एव आधारभूतः - अहं आधेयः इति
८. स एव नारायणः अन्तरात्मा - अहं शरीरभूतः
९. स एव नारायणः भोक्ता - अहं भोज्यः

इति मनुस्मृत्युक्तरीत्या नवविधसम्बन्धाः जीवपरमात्मनोः सम्भवन्ति इतीदं सत्यं ज्ञात्वा "त्वमेव सर्वं मम देव देव" इति शरणागतिः कर्तव्या। यदि शब्दस्पर्शरूपरसगन्धादिषु विषयान्तरेषु चपलो भवति। तर्हि तिरुमन्त्रस्य अष्टाक्षरमन्त्रस्य चतुर्थीविभक्तिसूचकम् "आय" इति प्रत्ययं ज्ञेयम्। तच्च भगवदेकभोग्यत्वं प्रतिपादयति। भगवन्मुखोल्लासहेतुभूतं कैङ्कर्यमेव प्रतिपाद्यमानत्वात् भगवन्मुखोल्लासः अविच्छिन्नकैङ्कर्येण कर्तव्यः इति सदा स्मरणीयः भवति। नाम शब्दस्पर्शादिविषयकग्राहकत्वक्चक्षुश्श्रोत्रजिह्वाघ्राणादि पञ्चेन्द्रियाणि

"जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयाच्युतकथाः श्रोत्रद्वयं त्वं शृणु।
कृष्णं लोकय लोचनद्वयं हरेर्गच्छाङ्घ्रियुग्मालयं
जिघ्र घ्राण मुकुन्दपादतुलसीं मूर्धन्नमाधोक्षजम्।।"

इति मुकुन्दमालायां श्रीकुलशेखरदिव्यसूरिश्रीसूक्तिमनुसरन् तस्मिन् भगवति समर्पणीयानि भवन्तीति ज्ञेयम्।

"नेतृत्वं नित्ययोगं समुचितगुणजातं तनुख्यापनं च
उपायं कर्तव्यभागन्त्वथ मिथुनपरं प्राप्यमेवं प्रसिद्धम्।
स्वामित्वं प्रार्थनाञ्च प्रबलतरविरोधिप्रहाणं दशैतान्
मन्तारं त्रायते चेत्यधिगतनिगमषट्पदोऽयं द्विखण्डः।।"

अथ पञ्चमे श्लोके मूलमन्त्रविवरणभूतम् आचार्यरुचिपरिगृहीतम् अनुष्ठानप्रकाशकं मन्त्ररत्नं श्लोकद्वयेन व्याचक्षाणाः तत्र प्रथमे तस्य पदार्थान् उपदिशति। द्वयमन्त्रो नाम "श्रीमन्नारायणचरणौ शरणं प्रपद्ये। श्रीमते नारायणाय नमः।" इति।। मन्त्रोऽयं वेदे वेदान्तविभागान्तर्भूत-कठवल्याद्युपनिषत्सु पाद्मादिपुराणेषु प्रतिपादितः । खण्डद्वयात्मकः दशविधार्थानुसन्धानवन्तम् अवश्यं रक्षत्येव।

१. श्रीः इमं जीवं भगवते समर्पयति।

२. लक्ष्मीः पुरुषकारस्वरूपत्वात् भगवन्तं न कदापि जहाति।

३. भगवान् स्वदासरक्षणाय वात्सल्य-स्वामित्व-सौशील्य-ज्ञान-शक्ति-प्राप्ति-पूर्तिरूपाष्टविधकल्याणगुणान् वहतीति ।

४. स्वदासजनरक्षणे सन्देहनिवृत्तयर्थं शङ्खचक्रादिदिव्यायुध-निवहमुद्वा परत्वविशिष्टदिव्यमङ्ळविग्रहवान् इति चरणौ इति शब्देनावगम्यते इति।

५. भगवत्कैङ्कर्यसाधनभूतौ चरणौ एव उपायस्वरूप इति तावेव उपायकृत्यतया स्वेष्टप्राप्तिमनिष्टनिवारणञ्च कुर्वत इति। नाम अज्ञानं, रागद्वेषादिकं, पुण्यपापरूपकर्मणी, देवतिर्यङ्मनुष्यस्थावरादिदेहान्, आध्यात्मिकाधिदैविकाधिभौतिकदुःखपरम्परारूपमनिष्टानि निरस्य इष्टभूतमर्चिरादिमार्गगमनं, परमपदप्राप्तिः, परमात्मनः सन्दर्शनं, भगवद्गुणानुभवकैङ्कर्यं चानुगृण्हातीति कृत्वा सैव प्राप्यप्रापकस्वरूप इति "शरण"शब्देनावगमनम्।

६. इमं चार्थं विज्ञाय मनोवाक्कायकर्मभिः श्रियःपतेः तस्य श्रीपादयुगळं सर्वदा समाश्रयणीयम्। नाम मूकभावे वा, पङ्गुत्वाभावे वा यदि वा भवतु येन केनापि प्रकारेण मनसा समाश्रयणीय इति। करणत्रयभावे तु तेन त्रितयेनैव भगवतः श्रीपादसमाश्रयणमेव दासजनस्यांश इति।

७. "श्रीमते" इति शब्देन श्रीश्रियःपत्योः मिथुनकैङ्कर्यमेवेति।

८. "नारायण"शब्देन चेतनाचेतनात्मकस्यास्य सकलजगतः स एव प्रभुः इति।

९. आय शब्देन कैङ्कर्यक्रियां कर्तुमाज्ञां देहीति प्रार्थनम्।

१०. नमः इति शब्देन अहंकारममकाररूपं शत्रुनिरसनं चेति दशविधदिव्यार्थाः द्वयमन्त्रे निगूढतया विराजन्तेति प्रपन्नजनः भावयेदिति प्रतिपादितवन्तः।

"ईशानां जगतामधीश दयितां नित्यानपायां श्रियं
संश्रित्याश्रयणोचिताऽखिलगुणस्याऽङ्घ्री हरेराश्रये।
इष्टोपायतया श्रिया च सहितायाऽऽत्मेश्वरायार्थये
कर्तुं दास्यमशेषमप्रतिहतं नित्यन्त्वहं निर्ममः।।"

अथ षष्ठे तु श्लोके मन्त्ररत्नपदार्थानुवादपूर्वकं वाक्यार्थाननुगृण्हन्ति। सर्वेश्वरस्य भगवतो नारायणस्य प्रियतमा भगवती सकलजगतां ईशानेति, सर्वकालसर्वावस्थासु च विष्णोः तस्यानपायिनीति कृत्वा तामेव जननीं प्रथममाश्रित्य तदनन्तरमेव वात्सल्य-स्वामित्व-सौशील्य-सौलभ्य-ज्ञान-शक्ति-प्राप्ति-पूर्तिरूपाष्टविधगुणगणमण्डितत्वात् तस्यैव "श्रीमन्नारायणचरणौ शरणं प्रपद्ये" इति भावयन् शरणं व्रजेत्। तेन च विनैव महालक्ष्म्याः पुरुषकारान्तरं फलसिद्धिः न कदापि सम्भवत्येवेति फलितांशः अवगम्यते। आश्रितजनेष्टप्राप्तेः मुख्यसाधनभूतया श्रिया युक्तवते सकलजीवानामधिपाय परमात्मने अहङ्कारममकाररहितः अविच्छिन्नसकलविधकैङ्कर्यं च कर्तुं प्रार्थयेति कृत्वा कैङ्कर्यरूप-प्रार्थनमस्माकं मुख्यं कर्तव्यम् इति भावं कृपया उपादिशन्।

"मत्प्राप्त्यर्थतया मयोक्तमखिलं सन्त्यज्यधर्मं पुनः
मामेकं मदवाप्तये शरणमित्यार्तोवसायं कुरु।
त्वामेवं व्यवसाययुक्तमखिलज्ञानादिपूर्णोह्यहं
मत्प्राप्ति प्रतिबन्धकैर्विरहितं कुर्यां शुचं मा कृथाः।।"

अथ सप्तमे च लोके मन्त्ररत्नविवरणभूतं शरण्यरुचिपरिगृहीतं चरमश्लोकमनुगृण्हन्ति। अस्मिन् श्लोके श्रीपराशरभट्टपादाः श्रीकृष्णार्जुनयोः चित्रं श्रीमद्भगवद्गीतासारांशतया उल्लिखन्ति। तद्यथा- "हे अर्जुन! मत्प्राप्तिसाधनत्वेन भवन्मानसपरीक्षार्थं पूर्वाध्यायेषु मया बहुविधं प्रतिपादितं किल। कर्म-ज्ञान-भक्त्यादीनि मुक्तेः साधनानीति बुद्धिं विहाय नाम वर्णाश्रमविध्युक्तमात्रबुद्ध्या आचरतु इत्यर्थः। मत्प्राप्त्यर्थं मामेव साधनं कृत्वा आप्तो भव"इत्युपादिशत्। नाम भगवदैकशरणानां साधनान्तराभाव इति भगवानेव व्यनक्तीति कृत्वा साध्यं साधनं च नारायण एक एवेति फलति। सः अस्मान् रक्षतु। इत्युक्तरीत्या रक्षणभक्षणादि भारं मयि [भगवति] निवेद्य स्वरक्षणे स्वान्वयं विहाय "मदीय चरणौ शरणं व्रज" इति फलितांशः द्योतते। एवं भूत निश्चयात्मकज्ञानविशिष्टः त्वां (जीवं) सर्वज्ञसर्वशक्त्याद्यनन्त-कल्याणगुणविशिष्टः अहं [श्रीकृष्णः] मत्प्राप्तिप्रतिबन्धकैः अविद्या-कर्मवासनारुचिभिः देहान्तरप्राप्त्यादिभिः विरहितं [त्वां] कुर्याम्"। अवश्यं मोक्षयिष्यामि माशुचः" इति भगवान् श्रीकृष्णः स्वाश्रितवते प्रपन्नाया-र्जुनायाभयरूपं चरमश्लोकं कृपया उपदिदेश।

"निश्चित्य त्वदधीनतां मयि सदा कर्माद्युपायान् हरेः
कर्तुं त्यक्तुमपि प्रपत्तुमनलं सीदामि दुःखाकुलः।
एतज्ज्ञानमुपेयुषो मम पुनस्सर्वापराधक्षयं
कर्तासी दृढोस्मि ते तु चरमं वाक्यं स्मरन् सारथेः।।"

अष्टश्लोक्यां अन्तिमः श्लोकः रसघनः अर्जुनस्य (जीवस्य) समाधानरूपः प्रपत्तिरूपः। श्रीपराशरभट्टपादाः प्रतिपादयन्ति। "हे पुण्डरीकाक्ष! श्रीकृष्णदेव! अहं तु सर्वदा तवाधीन एवेति निश्चित्य कर्म-

ज्ञानभक्तिरूपसाधनान्तराणि वर्णाश्रमाचारोचितानीति कृत्वा तानि सम्यगाचरणाय वा तान्येव मुक्तिसाधनानीति बुद्धिं त्यक्तुमपि वा। नाम स्वरूपविरुद्धत्वात्, दुष्करत्वात्, दु:खबहुळत्वात्, सापायत्वात्, स्वत:फलाऽसाधनत्वात्, सापेक्षत्वात्, विलम्बफलप्रदत्वात्, चिरकाल-साध्यत्वात्, आनेकत्वाच्चानुष्ठातुमसमर्थ:, एवमेव वर्णाश्रमोचितत्वेना-नभिमतफलसाधनत्वेन च शास्त्रचोदितत्वात्, त्वयैवोपदिष्टत्वात्, प्रत्यवायभीत्या च विहातुमपि असमर्थ: भवामि[1]। तव चरणारविन्द-शरणागति: सुलभरूपाऽपि शीघ्रफलदायिन्यपि सुकरोपाये शोक-निवृत्यर्थमभिहिताऽपि तदङ्गभूतसर्वधर्मत्यागस्य अशक्यत्वत्, आर्त्यभावात् आकिञ्चन्याभावात् महाविश्वसाभावाच्च सर्वधर्मत्यागा-ङ्गकं प्रपदनं कर्तुमप्यसमर्थो भवामि। परं शोकाविष्टस्सन् सीदामि। अत: स्वव्यापारनिवृत्तिमनसा तव श्रीचरणारविन्दं सकृदाश्रयितु-मप्यसमर्थ:। अत: एवंभूत ज्ञानविशिष्टस्य सर्वापराधक्षममविद्या-कर्मवासनारुचिप्रकृतिसम्बन्धात् तदवान्तरभेदानाम् अहङ्कार-ममकारादीनां सञ्चिताभ्युपगतप्रारब्धपुण्यपापरूपपूर्वाघानां पुण्यपाप-रूपप्रमादिकोत्तराघानां अनादिकर्मवासनाकृततृणच्छेदकण्ड्यूयनादीनां लोकापवादभीत्या करुणया कालुष्येण च कृतानां केषाञ्चित् बुद्धिपूर्वककृतानां च सर्वेषां च प्राप्तिविरोधिनां अश्लेषविनाश-रूपसवासनानिवृत्तिं करिष्यसीति अवसादनिवृत्त्या निर्भरो निर्भयो भवामि। यत: वात्सल्यातिरेकात् (मम) अर्जुनस्य सारथीभूतस्य परमाप्तस्य भगवत: अन्तिमं वाक्यार्थं [सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज] इति चरमश्लोकार्थमनुसन्दधान: "मा शुच:" इति वाक्यं च स्मृत्वा स्मृत्वा दृढमनस्को भवामि इति किरीटी निवेदयामास। "श्रीमन्नारायणचरणौशरणं प्रपद्ये" इति वदन्तं मां रक्षयित्वा

---

[1] नित्यनैमित्तिकानां साधनानुष्ठानयोग्यतापादकत्वाकारेण त्याग: । भगवदाराधनयोग्यतापादकत्वाकारेण कैङ्कर्यत्वाकारेण च अनुष्ठानं करणीयमिति अवगम्यते।

मोक्षयिष्यसीति निश्चित्य स्वस्थो भवामि" इति च सव्यसाची विज्ञापयामास। अत्र "अस्मि" इति वर्तमाननिर्देशेन अध्यवसायस्य चाञ्चल्याभावः सूचितः। स्मरन् इति वर्तमाननिर्देशेन तदर्थानुसन्धानेनैव कालक्षेपः कर्तव्यः इति भगवद्रामानुजाचार्याणां दिव्याज्ञा- "द्वयमर्थानुसन्धानेनैव यावच्छरीरपातम् अत्रैव श्रीरङ्गे सुखमास्व" इति अनुसन्धेया भवति। एवमेव -

"कर्मज्ञानमुपासनञ्च शरणं व्रजेति चावस्थितान्
सन्मार्गानपवर्गसाधनविधौ सद्वारकाऽद्वारकान्।
एकद्व्याकृतियोगसम्भृतिपृथग्भावाऽनुभावानिमां
सम्यक् प्रेक्ष्य शरण्यसारथि गिरामन्ते रमन्ते बुधाः।।"
"शाखानामुपरिस्थितेन मनुना मूलेन लब्धात्मक-
स्सत्ता हेतुसकृज्जपेन सकलं कालं द्वयेन क्षिपन्।
वेदोक्तं सविहारसारथिदयागुम्भेन विस्रम्भितः
सारज्ञो यदि कश्चिदस्ति भुवने नाथस्सयूथस्य नः।।"

इति श्रीपराशरभट्टार्याः सकलविधवैष्णवसिद्धान्तं विशिष्टाद्वैतस्य समग्रस्वरूपं श्रुतिशतसिद्धं तत्त्वमष्टाक्षरमहामन्त्रविवरणम् अष्टश्लोक्यां श्रीकृष्णार्जुनव्याजेन "ते" इति मानससान्निध्याभिप्रायेण श्रीरङ्गनाथाभिप्रायेण दृढोऽस्मीति स्वनिष्ठाप्रदर्शनात् भगवतः सन्निधौ तेषामनन्यलभ्यप्रेमैकपूर्वस्वातन्त्र्यं प्रस्फुटं विशदीकृताः। अनया अष्टश्लोक्या प्रपन्नाः देवतान्तरमतान्तरसाधनान्तरप्रयोजनान्तरविषयान्तरविमुखाः भूत्वा भगवद्भागवताचार्यकैङ्कर्यनिष्ठावन्तः शेषत्वपारतन्त्र्यकैङ्कर्ययुक्तप्रपत्तिमार्गावलम्बिनः भवेयुः इति अनुगृहीताः।

क्रियादीपः -

अयं ग्रन्थः केनापि कारणेन नातिप्रसिद्धः, न सर्वत्रोपलभ्यते। अत्र को वा विषयः प्रतिपाद्यतेति वक्तुमपि न शक्यते। सम्प्रदायवादिनः क्रियादीपो नाम ग्रन्थः श्रीपराशरभट्टार्यैः विरचितः इति भावयन्त्यपि केचन नाङ्गीकुर्वन्तिस्म। श्रीवेदान्ताचार्याः स्वेन विरचिते

रहस्यत्रयनामके ग्रन्थे श्रीपराशरभट्टार्याणां नित्यग्रन्थात् केचनांशान् स्वीकृतवन्तः इति महान्तः वदन्ति[1]। "प्रणवोदित तच्छेषवृत्तिकः भूयासमित्यमुं भावं व्यनक्ति[2] । आराधनेनापाद्य स्वोर्ध्वपुण्ड्रश्च तर्पयेदिति। एतावत्पर्यन्तमेव उल्लिखितवन्तः। अत्र वैदिकक्रियाः विषयत्वेनोपवर्णिताः न नूतना इव भान्ति। परन्तु श्रीमतां परमहंसाचार्यैः अहोबिळमठाधीशैः [19th Century] श्रीरङ्गनाथयतीन्द्रमहादेशिकैः उदाहृते "आह्निकग्रन्थे" वैविध्यं दृश्यते[3]।

भगवद्गुणदर्पणम् - (श्रीविष्णुसहस्रनामस्तोत्रभाष्यम्) -

श्रीपराशरभट्टार्याणां सर्वतोमुखप्रतिभायाः विश्वरूपः श्रीविष्णुसहस्रनामभाष्ये साक्षात्क्रियते। श्रीमहाभारते आनुशासनिक-पर्वणि विराजमानं स्तोत्रं श्रीविष्णुसहस्रनामस्तोत्रं तु जगत्प्रसिद्धम्। गद्यरूपात्मकः ग्रन्थः विष्णुसहस्रनामभाष्यरूपः एक एव। श्रीविष्णुसहस्रनामस्तोत्रभाष्यस्य तु "भगवद्गुणदर्पणम्" इति श्रीकरं चान्वर्थं नाम तैरेव व्यधायि। श्रीविष्णुसहस्रनामस्तोत्रस्य प्रायशः ४०संख्याकाः व्याख्याः विद्यन्ते। अधुना सर्वत्रोपलभ्यमानेषु श्रीपराशर-भट्टार्याणां भगवद्गुणदर्पणम् सर्वोत्तममिति मन्यन्ते। विशष्टद्वैत-सिद्धान्ते भगवान् सकलकल्याणगुणगणविशिष्टः, निखिलहेयप्रत्यनीक-कल्याणैकतानः । भगवति न कदापि निर्गुणत्वं विद्यते। अद्वैतप्रवक्तारः श्रीशङ्करभगवत्पादाः अपि श्रीविष्णुसहस्रनामस्तोत्रस्य व्याख्या-मरचयन्। एताननुश्रुत्यैवानेके स्वस्वभाष्याणि व्यरचयन्। श्रीपराशर-

[1] नित्यग्रन्थो नाम आचार्यैः स्वशिष्यजनशिक्षणाय प्रतिदिनं क्रियमाणानां वैदिकक्रियाणां भगवदाराधनापद्धतीनां क्रमरूपेण विवर्यमाणो ग्रन्थविशेषः। भगवद्रामानुजाचार्याः "स्वनित्यग्रन्थे" श्रीमन्नारायणस्य पूजनं विवृण्वन्तः।

[2] .....रहस्यत्रयसारः of Sri Vedantadesika स्मरन्ति इमानि श्रीपराशरभट्टार्याणां वाक्यानि ।

[3] Ascribbed Sri Parasarabhatta, published along with several Nityagrantha-s. Bangalore-1897 Anhikagrandha.

भट्टार्यास्तु स्वेन विरचितस्य भाष्यस्य विशिष्टाद्वैतसिद्धान्त-विजयकेतनस्य "भगवद्गुणदर्पणम्"इत्यद्भुतं नाम विहितवन्तः। दर्पणं नाम आदर्शः खलु। सकलकल्याणगुणानां दर्शनं दर्पणेनानेन द्रष्टुं शक्यतेति अभिप्रायः युक्त एव। निर्गुणवादिनां तु मतं निरस्यते। श्रीपराशरभट्टार्याणां उपोद्घातः तेषां निष्ठां व्यनक्ति।

श्रीपराशरभट्टार्याः श्रीविष्णुसहस्रनामस्तोत्रस्य वैभवं बहुधा प्रशंसितवन्तः। तत्त्वहितपुरुषार्थानां विवरणम्, देवदेवस्य श्रीमन्नारायणस्य सर्वोत्तमत्वं, सगुणोपासनायाःसौलभ्यं, नामसंकीर्तनस्य विशेषफलप्रदत्वं विवृण्वन्तः भगवतः स्वरूपनिरूपकाः, निरूपित-स्वरूपविशेषणभूता दिव्यात्मस्वरूपाश्रिताः दिव्यमङ्गळविग्रहमाश्रिताः आश्रयणसौकर्यापादकाः आश्रितकर्यापादकाः गुणाः श्रीवैष्णव-विद्वदेकधीगोचराः इति भगवतः गुणदर्पणदर्शनात् साक्षात्क्रियन्तेति गुणगणकीर्तनमेव प्रपन्नजनानां स्वरूपः इति सिद्धान्तयतिस्म। निर्गुणवादिनः कथं वा गुणकीर्तनं अङ्गीकुर्वन्ति? तत्रापि दिव्यकल्याणगुणकीर्तनमेवाविष्कृतस्य श्रीविष्णुसहस्रनामस्तोत्रस्य परेषामेतद्भाष्यप्रणयनप्रवृत्तिरपि नोचितेति स्वकीय भाष्यप्रक्रिया एतादृशी च स्वयमेवाविष्कुर्वन्तिस्म। उपाधिना स्वरूपपरिणामेन वा ब्रह्मैव संसरतीति वादिभ्या तु ब्रह्मण्यशेषदोषाभ्युपगमात्। [भगवद्गुण-दर्पणव्याख्या] "पवित्रं मङ्गळं परम्" इत्यादि नामानि कुप्येयुरिति श्रीसूक्तितः आदिमं विषयम्। अथ पञ्चसिद्धान्तनिष्ठानिर्णयेन परव्यूहविभवविशेषेषु स्वनाम अर्थप्रकरणौचित्यापौनरुक्त्यप्रभृतिभिः न्यायैः व्यवस्थाप्य व्याकरणनिरुक्तार्षनिर्वचनप्रस्थानेन नामानि निरुच्यन्ते इति श्रीसूक्तितः द्वितीयं विषयं च विशदयामासुः। विभवविशेषेष्वित्येतदर्चावतारस्यापि प्रदर्शकं बहुत्र तद्गतानामपि गुणानां विवरणं स्वदर्पणेन प्रदर्शितवन्तः। अस्माकं भारतदेशे भाष्यकार नाम्ना समुपार्जितकीर्तिवतामाचार्याणां भाष्यप्रणयनं प्रयाशो चतुर्षु ग्रन्थेष्वावश्यकं मन्यन्ते विपश्चितः।

१. उपनिषदः

२. श्रीमद्भगवद्गीता

३. शारीरकमीमांसा

४. श्रीविष्णुसहस्रनामाध्यायश्चेति।

भगवद्रामानुजाचार्याः वेदार्थसंग्रहप्रणयनेन विरचित उपनिष्द्-भाष्यग्रन्थः लब्धप्रतिष्ठस्समभवत्। एवमेव विवादास्पदामुपनिषद्वाक्यानां सम्प्रतिपन्नसदर्थानुग्रहणेन दिक्प्रदर्शनरूपेण निर्विवादस्थलेषु परकीय-भाष्योपजीवनं नानुचितमिति मन्यन्ते स्म। भगवद्गीताशारीरक-मीमांसाभाष्ययोः प्रपञ्चप्रसिद्धत्वात् न तत्र किञ्चिद्वक्तव्यमाभाति। किन्तु श्रीविष्णुसहस्रनामभाष्यप्रणयनं न कुर्वन्ति स्म। परन्तु स्वसम-कालिकविद्वत्प्रकाण्डश्रेण्यां दीपादुत्पन्नप्रथाभाजः श्रीकूरेशमिश्रात्मज-मणीन् श्रीपराशरभट्टार्यानेवास्मिन् कार्ये श्रीविष्णुसहस्रनामभाष्य-प्रणयेन योग्यान् अमन्यन्त। यतो हि श्रीपराशराः आबाल्यादेवाप्रति-ममहाप्रतिभाभासुराः सर्वतोमुखज्ञानसाम्राज्यसन्धुक्षितविपुलविमलयशसः भगवद्गुणविद्धहृदयतायां "न भूतो न भविष्यति" इत्यशेषमहापण्डित-कविघोषितप्रभावाः विरेजिरे। विशिष्य च कुशाग्रधियः व्यराजन्त। श्रीपराशरभट्टार्या एव श्रीविष्णुसहस्रनामभाष्यमवतारयतुमर्हन्तीति भावयन्तः भगवन्तः श्रीरामानुजाचार्याः स्वदिव्याज्ञामनुगृहीतवन्तः। भगवद्रामानुजाचार्याणामुभे च दिव्याज्ञे प्रतीच्यां दिशि वेदान्ति नाम्ना विराजमानानां माधवाचार्याणां विनयमधिकृत्य प्राथमिकी दिव्याज्ञा। द्वैतीयिकी दिव्याज्ञा श्रीविष्णुसहस्रनामभाष्यप्रणयनविषयिणी च। भगवद्रामानुजाचार्याणां जीवितकालं यावत् उभे दिव्याज्ञे निर्वर्तयितुमवकाशम् अलभमानाः श्रीपराशराः परस्तादेव प्राप्तावसराः कृतकृत्यस्समभवन्[1]। अत्रेदमवधेयांशः भवति - भगवद्रामानुजाचार्याणां

[1] श्रीकाञ्ची प्रतिवादिभयङ्कर-अण्णङ्गराचार्याणामुपोद्घातवाक्यानि (भगवद् गुणदर्पणस्य 1964 रत्नं मुद्राक्षरशालायां स्वैरेव मुद्रापितस्य) यथावसरं यथातथं स्वीकृतानि।

दिव्यावतारसमयः 1017-1137A.D. इति सर्वैरभ्युपगतः किल। एतत्समयमनुसृत्य श्रीपराशरभट्टार्याः श्रीविष्णुसहस्रनामभाष्यप्रणयनं 1137 अनन्तरे काले कृतवन्तः इति। नाम पराशराभट्टपादाः विंशति अथवा पञ्चविंशति वयसि वा प्रणीतवन्तः इति ऊहितुं शक्यते। वेदान्तिवादजयानन्तरमेवेति संभाव्यते। नाम 1157 - 1162 काल इति ज्ञायते। अतः श्रीपराशरभट्टार्याणां पुण्यास्तमयः १११४A.D. काले समभूदिति वादिनां मतं सर्वात्मनाऽत्र न संगच्छते। भगवद्गुण-दर्पणाख्ये स्वकीयभाष्ये मङ्गळश्लोकाः पूर्वचार्याणां वन्दनरूपाः मनोहराः भट्टार्याणां विनयमाविष्कुर्वन्ति।

वन्दे गोविन्दतातौ मुनिमथमनवैलक्ष्मणार्यं महान्तं
ध्यायेयं यामुनार्यं मम हृदि तनवै राममेवाभियायाम्।
पद्माक्षं प्रेक्षिषीय प्रथममपि मुनिं नाथमीडे शठारिं
स्तौमि प्रेक्षेयलक्ष्मीं शरणमशरणश्श्रीधरं संश्रयेयम्।। १ ।।
जातो लक्ष्मणमिश्र संश्रयघनात् श्रीवत्सचिन्हादृषेः
भूयो भट्टपराशरेति फणितः श्रीरङ्गभत्रा स्वयम्।
श्रीश्रीरङ्गपतिप्रसाद तृषया श्रीरङ्गनाथाह्वयः
श्रीरङ्गेश्वरकारितो विवृणुते नाम्नां सहस्रं हरेः।। २।।
संसारोऽयमपण्डितो भगवति प्रागेव भूयः कलौ
पूर्णं मन्यतमे जने श्रुतिशिरोगुह्यं ब्रुवे साहसात्।
तत्र स्तोत्रमिदं प्रकाशयति यस्तुत्यश्च यस्तावुभौ
व्यासः कारुणको हरिश्च तदितं मौर्ख्यं सहेतां मम।। ३ ।।
अर्थे हरौ तदभिधायिनि नामवर्गे
तद्व्यञ्जके मयि च बन्धविशेषमेत्य।
सेवध्वमेतदमृतं प्रणिपत्य या चेत्
मध्यस्तमत्सरि जनाः इह मा च भूवन्।। ४।।

इति प्रार्थितवन्तः।

एते स्वयं शैल इव उन्नताः। प्रकृतिकोमलाश्च इति स्पष्टं आभात्येव। तत्र चतुर्दश विद्यास्थानप्रधानभूतस्य वेदस्य

"इतिहासपुराणाभ्यां वेदं समुपबृम्हयेत्।
बिभेत्यल्पश्रुतात् वेदो मामयं प्रतरिष्यति।।"

इति प्रकारेण इतिहासपुराणाभ्याम् अर्थे निर्णतव्ये पुराणेभ्य: इतिहासोत्कर्षे च विवक्षिते श्रीमद्रामायणवत् महाभारतं शरणम्।

महाभारत सारत्वात् ऋषिभि: परिगानत:।
वेदाचार्यसमाहारात् भीष्मोत्कृष्टमतत्त्वत:।।
परिग्रहातिशयतो गीताद्यैकार्थ्यतश्च न:।
सहस्रनाम्नामध्याय: उपादेयमतो मत:।।

इति स्वभाष्यरचनारम्भवेलायां जोघुष्यन्त: अथ पञ्चसिद्धान्त-निष्ठानिर्णयेन परव्यूहविशेषेषु स्वनाम भावार्थप्रकरण औचित्यापौन-रुक्त्यप्रभृतिभि: न्यायै: व्यवस्थाप्य व्याकरणनिरुक्तार्षनिर्वचनप्रस्थानेन नामानि निरुच्यन्ते इति प्रतिज्ञामकार्षु:।

श्रीविष्णुसहस्रनाम्नां व्याख्यापद्धति: -

पाठकजनानां रसिकजनानां चाह्लादाय च श्रीपराशर-भट्टार्याणां व्याख्यापद्धतिं दिङ्मात्रं प्रदर्श्यते ।

"विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभु:।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावन:।।"

इत्यस्मिन् प्रथमे श्लोके प्रथमं नाम विश्वमिति किल! श्रीपराशर-भट्टार्याणां व्याख्या' तत्र पूर्वं सर्वतोमुखं भगवत: पूर्णत्वमाह - विश्वमिति। विशत्यवयवान् इत्यर्थे "अशूप्रुषिलटिकणिखटिविशिभ्य: क्वन्" इति क्वन् प्रत्यय:। यथा मोक्षधर्मे संयमाय पञ्चशिख:-

वेशनाद्विश्वमित्याहु: लोकानां काशिसत्तम।
लोकांश्च विश्वमेवेति प्रवदन्ति नराधिप।।

इति स्वाभाविकानवधिकातिशयमाङ्गळ्यैकतानै: स्वरूपगुणविभवै: परिपूर्ण इत्यर्थ:। कार्त्स्न्यवचत्वात् अस्य आदौ अनवच्छेद्य महाविभूतित्वस्य संकीर्तनयोग्यत्वाच्च। तदशिष्यं संज्ञाप्रमाणत्वादिति

यथोपलम्भं सर्वत्र लिङ्गनियमः। कार्यवाचिविश्वशब्दः कारणे वर्तत इति केचित्। तद्वार्तम्। सर्वेषां नाम्नां योगरूढ्यां भगवति स्वशब्दत्वोपपादनात् जघन्यवृत्तेरयुक्तत्वाच्च। अन्ये विश्वमिति ब्रह्मप्रपञ्चयोरभेदं परं प्रपञ्चितवन्तः तत् वञ्चनामात्रम्। तथा हि न तावत् विश्वपदमभेदवाचि। न च तत्त्वमस्यादिवत् सामानाधिकरण्येनैक्यपरं, संज्ञानां स्वातन्त्र्येण ऐक्यपरत्वाविवक्षणत्वात्। अत एव हि विश्वं विष्णुः इति अविशेष्य लिङ्गत्वम्। निरस्तश्चायमर्वागेव पक्षः। अन्यत्र चानेकत्र इदमेव पूर्णत्वं सर्वै नामभिः विष्णुः इत्यादिभिः विशिष्यते। श्रीमन्तः पराशरार्याः श्रीविष्णुसहस्रनाम्नां भाष्यं कमप्यनिर्वचनीयमानन्दं विज्ञानं चानुगृण्हात्येव। स्वभाष्यस्य गुणदर्पणस्योपयोगः अन्धाज्ञानेभ्यः बहूपकारः भवति। "सद्गतिसत्कृतिस्सत्ता सद्भूतिः सत्परायणः।"[1] इत्यादिषु सत्कृतिनाम्नो भाष्यम् अवधार्यताम्। "यतो वा इमानि भूतानि जायन्ते" इत्यादि श्रुतिप्रतिपन्नजगत्सृष्ट्यादिकृतिमत्वमेव सत्कृतिमत्वमिति परे बभाषिरे। भट्टपादास्तु नैवेममर्थबह्वमन्वत अधस्तात्। "वसुप्रदो वासुदेवो वसुर्वसुमना हविः।" इति वासुदेवशब्दश्रवणेन एतत् प्रकरणस्थानि सुबद्धानि नामानि वसुदेवात्मजस्य भगवतः कृष्णकिशोरस्य गुणगणचेष्टितप्रतिपादनपरतेव व्याचक्षिरे। सत्कृतिरिति। जगत्सृष्ट्यादिकृतिमत्वप्रतिपादनमिह

[1] श्रीविष्णुसहस्रनामस्तोत्रभाष्योपोद्घातः । श्रीकाञ्चीअण्णङ्गराचार्याः ७०५ नाम्नः।

७३२(सः) स्यति निश्चयीक्रोतीति सः। शमिमुषिस्यति इत्यादिना अङ्।

७३३ (वः) यथा प्रसिद्धिसर्ववासित्वात् वः। वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि स च भूतेष्वशेषेषु वकारार्थस्ततो मुने।

७३४ (कः) मलीमसेषु वसन्नपि कनतीति कः कनतेः डः। (किम्) तत्तसर्वेप्सितबुभुत्सूनां निरुपाधिकप्रष्टव्यत्वात् "किम्" प्रच्छ ज्ञीप्सायाम्।

७३५. यत् तेषां रक्षायै यतते इति यत् "यती प्रयत्ने" क्विप्।

७३६. (स्वज्ञानभक्तिं) तत् तनोतीति तत्। तेषां गमादीनाम् इति क्विप्। नकार लोपस्तुगागमः। अतो हि तत्सवितुर्वरेणीम्। ॐ तत् सत् इति निर्देशः ।

विरसमिति विभावयन्तः नवनीतचौर्यमुलूखलबद्धत्वं रासक्रीडेत्यादीनि चेष्टितान्येवात्र सत्कृतित्वेनाभिमतानि सन्दर्शयामासुः। इत्थं इतरभाष्योपकृतामगोचराणि तत्त्वानि श्रीवैष्णवसिद्धान्तख्यापनानि भगवतः स्वामित्वसौशील्यवात्सल्यौदार्यादिगुणगणानि निखिलशास्त्रोपनिषन्मूलानि प्रतिपादयन्ति। प्रत्ययधातुप्रकरणादिषु स्वाद्भुताद्भुतव्याकरणशास्त्रपाण्डित्यगरिमाणं प्रदर्शयन्ति। सः, वः; कः, किम्, यत् तत् इत्यादि पदानां भगवतः कल्याणगुणव्यञ्जकत्वमुपादिशन्।

श्रीविष्णुसहस्रनामस्तोत्रभाष्योपवर्णितकतिपयविशेषविषयाणां सूची -

१. महाभारतप्राशस्त्यम्।
२. कृष्णद्वैपायनप्राशस्त्यम्।
३. भीष्मप्राशस्त्यम्।
४. नामसहस्रस्य परिग्रहातिशयः।
५. भक्तेः वेदान्तप्रतिपाद्यत्वम्।
६. उपासनस्य दास्यैकरुचिगर्भत्वे प्रमाणम्।
७. स्तोत्रप्राशस्त्यम्।
८. गुरुलघुविकल्पविचारः।
९. भगवतः पावित्र्यम्।
१०. भगवतः त्रिविधकारणत्वम्।
११. भगवतः शास्त्रप्रसिद्धिः।
१२. नाम्नां गौणत्वं किं नाम?
१३. निर्गुणवादे अनुपपत्तयः।
१४. सगुणनिर्गुणशास्त्रयोः व्यवस्था।
१५. उपाधिवादे स्वरूपपरिणामवेदे च दोषाः।
१६. भगवन्नामस्ववयवार्थानां प्रवृत्तिनिमित्तत्वमावश्यकम्।
१७. भगवतः चिदचिद्दोषाननुषङ्गः।
१८. मुक्तस्वरूपम्।

१९. मुक्तानां भेदे च बहुत्वं च।
२०. अभेदवादस्यापि मुख्यत्वम्।
२१. मोक्षे शेषत्वं न तिरस्क्रियते।
२२. कतिपयमुक्तानामर्वाचीना गतिः। [कैवल्यम्]
२३. मोक्षस्थाननिर्णयः।
२४. भगवतः दृढानुग्रहः।
२५. भगवतः जन्मप्रकृष्टम्।
२६. जन्मप्रकारः।
२७. भगवद्गुणानां नित्यत्वमाकल्पनिकत्वं च।
२८. सङ्कल्पेनैव जगद्व्यापारः।
२९. ज्ञानानन्दगुणकस्यैव ज्ञानानन्दस्वरूपत्वमप्युपपन्नम्।
३०. श्रियो माहात्म्यम्।
३१. नामात्कप्रघट्टकस्य परत्ववर्णने तात्पर्यम्।
३२. परव्यूहविभवभेदाः।
३३. व्यूहवर्णनम्।
३४. विभववर्णनम्।
३५. उपेन्द्रवर्णनम्।
३६. षाड्गुण्यवर्णनम्।
३७. ज्ञानस्य वैभवं, करणनिरक्षेपं तदपेक्षं च स्वातन्त्र्येणेत्यादि।
३८. भगवद्विग्रहवैलक्षण्यम्।
३९. हंसावतारः।
४०. प्रादुर्भावप्रथमः पद्मनाभः।
४१. नृसिंहावतारः।
४२. मत्स्यावतारः।
४३. कालस्वरूपः।
४४. न्यग्रोधशय्यावर्णनम्।
४५. मायाशब्दो न मिथ्यावाचिनः।
४६. भार्गवो रामः।

४७. कूर्ममूर्तिः ।
४८. द्विषट्काध्यात्मा विषयः ।
४९. वासुदेवत्वं स्वरूपतोऽपि।
५०. वासुदेवत्वं विभूतितः ।
५१. लक्ष्मीपतिमूर्तिः ।
५२. स्वार्थहर्षशोकाद्यभावेऽपि परार्थतत्प्रसक्तिरदोषः ।
५३. ध्रुवमूर्तिः ।
५४. मृतसञ्जीवनं रामचरितम्।
५५. कल्की
५६. ताराशिंशुमाराकृतिः ।
५७. प्रवृत्तिधर्मनिष्ठानां गतिः ।
५८. निवृत्तिधर्मनिष्ठानां गतिः ।
५९. नरनारायणादिः
६०. अमृताहरणम्।
६१. धर्मात्मा
६२. वत्सलः ।
६३. प्रपन्नापराधापरिगणनं गुण एव।
६४. हेयोपादेयनिष्कर्षः ।
६५. भक्ताः यमतत्किङ्कराणामप्रधृष्याः ।
६६. पुनरपि रामवर्णनम्।
६७. कपिलमूर्तिः ।
६८. वराहमूर्तिः ।
६९. बलभद्रः ।
७०. नारायणः ।
७१. व्यासः ।
७२. सारस्वतावतारः ।
७३. शिवत्वोपपादकनामानि श्रीवत्सवक्ष इत्यादीनि
७४. अर्चावतारः ।

७५. क्षेत्रविशेषेषु स्थितिविशेषाः।
७६. शक्तीशावतारः।
७७. आनन्त्यं गुणविभूतिभ्याम्।
७८. बाह्यशब्दार्थविशेषाः।
७९. वात्सल्यतोऽप्यानन्त्यम्।
८०. कृष्णावतारः।
८१. अपराजितः।
८२. बुद्धावतारः।
८३. शास्त्रवश्यानामनुग्राहकः।
८४. व्यवहितावतारः।
८५. अणिमाद्यधिष्ठानम्।
८६. अघटितार्थघटनम्।
८७. योगिनां निर्वाहकः।
८८. अर्चिरादिः।
८९. गजेन्द्रमोक्षणम्।
९०. सर्वभगवद्व्यापाराणां प्रयोजनम्।
९१. दिव्यायुधयोगः।

एते विशेषाः श्रीमद्भिः प्रतिवादभयङ्कर-अण्णङ्गराचार्यैः प्रकाशिते भगवद्गुणदर्पणे व्याख्याने ग्रन्थे सूचिताः।

एवं भगवतः नामानि गौणानि, विख्यातानिश्रीवैष्णव-सिद्धान्तानुगुणं निखिवलवेदपुराणेतिहासादिप्रमाणवच्चनैः पूर्वाचार्य-सूक्त्यनुगुणं अनितरसाध्यं व्याख्यातवन्तः। श्रीपराशरभट्टार्याः भाण्डागारस्थानमभजत्। भगवतः प्रतिज्ञां "संभवामि युगे युगे" इतीमां श्रीपराशराः अत्यद्भुतं स्वभाष्यप्रणयने प्रदर्शितवन्तः। सृष्टिस्थिति-लयानां श्रीमन्नारायणः एक एव निदानः नान्योऽस्ति कश्चनेति "सर्वं खल्विदं ब्रह्म" इत्यादि विशेषान् भक्तजनहिताय शास्त्रानुगुणं

विवृण्वन्तः। संसाररोगक्लेशनाशाय पारलौकिकानन्दानुभूतये च श्रीविष्णुगुणकीर्तनं प्रपन्नजनकृत्यमिति च प्रतिपादितवन्तः।

"शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।
रथाङ्गपाणि रक्षोभ्यः सर्वः प्रहरणायुधः।।"

१०००नाम्नि "सर्वप्रहरणायुधः" इत्यत्र स्वनिष्ठानां सर्वानिष्टोन्मूलयितृण्य संख्येयान्यमर्यादसामर्थ्यान्यात्मोचितान्यनन्तान्याभरणविकल्पानि सदा सर्वत्र सर्वथा सर्वप्रकारसमाश्रितसंरक्षा दीर्घसत्रदीक्षितानि सर्वैश्वर्यधुरन्धराण्यन्यान्यपि दिव्यायुधान्यस्येति सर्वप्रहरणायुधः इति। एवमशेषदोषप्रत्यर्थ्युपाधिसंख्यावधि विरोधितुङ्गमङ्गळस्वरूपरूपगुणविभवचेष्टितमनङ्कुशैश्वर्यसौशील्यमापत्सखमर्थिकल्पकं प्रपन्नैकजीवातुं श्रियःपतिं भगवन्तं पुरुषोत्तममाश्रितानामाश्चर्यः सर्वसम्पत्समुदायः इति अनुगृहीतवन्तः। फलश्रुतौ अथवा उत्तरपीठिकायां तु अन्ते द्वयोः श्लोकयोः।

"इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्।
पठेद्य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च।।
विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम्।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवनम्।।
[विष्णुसहस्रनामस्तोत्रम्]

निस्सीमभूमा भगवान् स्तुत्यः। तन्निगरणक्षमज्ञानवाग्विभवो भगवान् व्यासः स्तोता। तदुभयमाङ्गल्यमहिमेदं स्तवरत्नं, तदपनेयमहादारिद्र्यमिदं जगत् तदधिकारीति पुष्कलमेतत् यः कश्चित् चेतनः परावरश्रेयोऽर्थी निर्विशङ्कः सेवतामित्याह इमं स्तवमिति। एवं स्वभावतः एव समस्तद्वन्द्वप्रतिद्वन्द्वि सकलकल्याणगुणाकरं प्रपन्नपारिजातं पुण्डरीकाक्षं लक्ष्मीपतिं भगवन्तं भजमानानां स एव सर्वस्वमिति तत्सम्पदो वाचामगोचराः, कुतः सांसारिकपरिभवप्रसङ्गः इति पर्याप्तयति विश्वेश्वरमिति तमिममर्थं शपथेन भावयन् न ते यान्ति पराभवं, न ते यान्ति पराभवमित्यावृत्त्या पूरयतीति।

"अस्माकमत्र च सर्वदुःखमुन्मूल्य संपदमशेषविधां विधाय।

श्रीरङ्गराजमहिषी स च वैष्णवानां
सङ्गात् सुखं सह जयेन सदा क्रियास्ताम् ।।"

इति श्रीहरितकुलतिलकश्रीवत्साङ्कमिश्रसूनोः श्रीरङ्गराजदिव्याज्ञा लब्धश्रीपराशरभट्टापरनामधेयस्य श्रीरङ्गनाथस्य कृतौ श्रीमद्विष्णु-सहस्रनामविवरणं भगवद्गुणदर्पणाख्यं भाष्यं समाप्तम्।

इत्थं भगवद्रामानुजाचार्याणां गुरूत्तमानां दिव्याज्ञां श्रीविष्णु-सहस्रनामभाष्यप्रणयनरूपां श्रीपराशरभट्टार्याः परिपालयन्तः रामानुजीयानां गुरुदक्षिणां समर्पयन्तः महतीं कीर्तीं शाश्वतीमापुः। श्रीवैष्णवसाहित्ये श्रीविष्णुसहस्रनामभाष्यं भगवद्गुणदर्पणं विशिष्टं स्थानं परमादरणीयञ्च भवति।

श्रीगुणरत्नकोशः -

श्रीपराशरभट्टार्यकृतिषु श्रीमहालक्ष्मीवैभवप्रकटनपरः श्रीगुण-रत्नकोशः संस्कृतसाहित्येऽपि विशेषं स्थानमभ्यगात्। भगवद्गुणदर्पणं यथा प्रपन्नजनेभ्यः अनुगृहीतवन्तः तद्वत् श्रीगुणरत्नकोशमपि प्रदर्शयन्ति। भगवतः श्रियश्च गुणकीर्तनमेव भगावतजनस्वरूपः इति ज्ञायते। श्रीगुणरत्नकोश रचनानन्तरं भगवद्गुणदर्पणरचनां कुर्वन्तिस्मेति भाव्यते। यतो हि मातुः पुरुषकारं विना भगवतः अनुग्रहसिद्धिः नैव सिध्येत्। अतः प्रथमतः श्रीगुणरत्नकोशरचनां कृत्वा भगवद्गुणदर्पणरचनामकुर्वन्निति ऊहितुं शक्यते। भगवद्गुण-व्याख्यानरचनायां प्रौढिः श्रीपराशरभट्टार्याणां सम्पूर्णपाण्डित्य-परिपाकदशां अभिव्यनक्त्येव। श्रीगुणरत्नकोशे महालक्ष्म्याः कीर्तनं मधुरफणितिभिः कुर्वन्ति स्म। अत्र ६१ श्लोकाः रसालङ्कारशय्या-सौभाग्यरीतिध्वनिरमणीयार्थशब्दविशिष्टाः महालक्ष्मीवैभवं पुरुषकारं च प्रकटयन्ति। एषैव श्रीः श्रीरङ्गनायकीति बहुधा प्रशंसन्ति। श्रीरङ्गमन्दिरसौभाग्येति च महासाम्राज्ञीति च स्तुवन्ति। श्रियः गुणरत्नकोशः श्रीरङ्गे एव विराजतेति गुणरत्नानामाकारः श्रीः इति

अनन्तैश्वर्यमणिगणयुता, गुणरत्नैश्च चकासतीति सैव नित्ययौवनेति न केवलं भक्तजनावनायैश्वर्यप्रदानं अपि तु श्रीहरेः सृष्टिरचनायाः स्वभ्रूभङ्गेन मार्गदर्शिनी बभूवेति च प्रशंसन्ति। कदाचित् रामायणे सीतादेव्याः मातृवात्सल्यमत्यद्भुतं स्तुवन्ति। श्रुतिस्मृतिपुराणादिषु पाञ्चरात्र्यागमादिषु च ये ये गुणाः महर्षिभिः परिकीर्तिताः, ते सर्वेऽपि एकत्र कोशे निक्षिप्य भक्तजनानां महान्तमानन्दं उपजनयन्ति स्म। पुरुषाकाररूपा महालक्ष्मीः न केवलं भोगभाग्यं, अपि तु श्रीमन्नरायणसायुज्यप्रदाने प्राधानं पुरुषकारं कृपया अनुगृण्हातीति च स्तुवन्ति।

"श्रियै समस्तचिदचिद्विधान व्यसनं हरेः।
अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोऽञ्जलिः।।
[श्रीगुणरत्नकोशः, २]

"यद्भ्रूभङ्गा प्रामाणं स्थिरचररचनातारतम्ये मुरारेः
वेदान्तास्तत्त्वचिन्ता मुरभिदुरसि यत्पादचिन्हैस्तरन्ति।
भोगोपाद्घातकेळी चुळकितभगवद्वैश्वरूप्यानुभावा
सानः श्रीरास्तणीता ममृतलहरी धीलङ्घनीयैरपाङ्गैः।।
[श्रीगुणरत्नकोशः, ४]

इति च स्तुवन्तः।

उल्लासपल्लवितपालितसप्तलोकी-
निर्वाहकोरकितनेम कटाक्षलीलाम्।
श्रीरङ्गहर्म्यतलमङ्गळदीपरेखां
श्रीरङ्गराजमहिषीं श्रियमाश्रयामः।।

अस्मिन् श्लोके उल्लासपल्लवितत्वं निर्वहकोरकितत्वं; श्रीरङ्गहर्म्यतलमङ्गलदीपायमानत्वं च कवेः आलङ्कारिकप्रतिभां व्यञ्जयति। श्रियः परमानुग्रहायैव वेदाः देवाः सर्वेलोकाश्च सदायतन्ते। भगवदत्यन्ताभिमतायाः श्रियो भगवदपेक्षयाप्युत्कर्षशालितया वर्णनं भगवन्मुखोल्लासफलकमिति वर्णयिष्यमाणग्रन्थोपोद्घातेन

श्रियः श्रीश्रीरङ्गेशय तव च हृद्यां भगवतीं

श्रियं तत्तोऽप्युच्चैर्वयमिहफणामश्र्शुणुतराम्।
दृशौ ते भूयास्तां सुखतरळतारे श्रवणतः
पुनर्हर्षोत्कर्षात् स्फुटतुभुजयोः कञ्चुकशतम्।।

एवमेवान्यस्मिन् श्लोके उपक्रमोपसंहारोपात्तप्रमाणानुगुण्येन श्रीसूक्ताक्त्यादेरपि श्रियो भगवत्सम्बन्धायत्तवैभव परत्वावसायात् तादृशपतिवैशिष्ट्यवर्णनपरतया वेदानां श्रीगुणवर्णनपरत्वनिष्कर्षं श्लाघयन्ति। यथा --

अस्येशाना जगत इति तेऽधीमहे यां समृद्धिं
श्रीः श्रीसूक्तं बहुमुखयते ताञ्च शाखानुशाखम्।
इष्टे कश्चिज्जगत इति यः पौरुषे सूक्तउक्तः
तं च त्वत्कं पतिमाधिजगावुत्तरश्चानुवाकः।।

आकुग्रामनियामकादपि विभोरासर्वनिर्वाहकात्..... इत्यारभ्य सर्वेऽपि तवानुग्रहं तुङ्गमङ्गळगरिमवत्पुण्यं पुनःपावनं धन्यं मन्यन्त इति तवानुग्रहेण कश्चन कृती मुक्तातपत्रप्रचलमणिघणात्कारिमौळिः मनुष्यः दृप्यद्दन्तावलस्थो क्षोणिपालान्नगणयति। अन्यः तवानुग्रहविदुरः अशरणो भूत्वा स्वदन्तपङ्क्तीदर्शयन् भाग्यशालिनः तस्य समीपे भूमौ तिष्ठतीति वदन्तः

रतिर्मतिसरस्वतीधृतिसमृद्धिसिद्धिश्रियः
सुधासखियतोमुखं चिचलिषेत्तव भ्रूलता।
ततो मुखमथेन्दिरे बहुमुखी महंपूर्विकां
विगाह्य च वशंवदाः परिवहन्ति कूलङ्कषाः।।

इत्यस्मिन् श्लोके भावगाम्भीर्यं श्रीपराशराणां विद्वत्प्रकर्षं सूचयति। कुत्रचित् मातापुत्रसम्भाषणमिव श्रीरङ्गराजपुरोहिताः सविनयं चमत्कृतिमाविष्कुर्वन्ति। लक्ष्मीं प्रति भगवतः शेषित्वानाभिधानेऽपि समुचितशेषिलाभो गुणायैवेति त्वत्कृपावती आत्मनामानन्त्यान्निरवधिश्च या जनता तस्याविश्रमार्हावकाशमिति च बहुधा श्लाघयन्ति। महालक्ष्म्याः देव्यन्तरेभ्यः अपि प्राधान्यमुक्तवन्तः।

स्वतः श्रीस्त्वं विष्णोः स्वमनसि ततएवैष भगवान्

त्वदायत्तर्धित्वेऽप्यभवदपराधीन विभवः।
स्वया दीप्त्या रत्नम्भवदपि महार्घं विगुणं
न कुण्ठस्वातन्त्र्यं भवति च न चानन्याहित गुणम्।।

इत्यत्र महालक्ष्म्या वैभवमत्यन्तचमत्कारमुपववर्णिताः। स्वमातुः सन्निधावर्भको यथा निर्भयो वदति तथैव स्वातन्त्र्येण हे मातः!

यदि मनुजतिरश्चां लीलया तुल्यवृत्तेः
अनुजनुरनुरूपा देविनावावतरिष्यः।
असरसमभविष्यन्नर्मनाथस्य मातः
दरदलदरविन्दोदन्तकान्तायताक्षी।।

इति शब्दगम्यार्थेण स्तुवन्ति।

मातर्मैथिलि राक्षसीस्त्वयि तदैवाद्रापराधास्त्वया।
रक्षन्त्या पवनात्मजाल्लघुतरा रामस्य गोष्ठीकृता।।
काकं तं च विभीषणं शरणमित्युक्ति क्षमौ रक्षतः
सानस्सानन्दमहागसस्सुखयतु क्षान्तिस्तवाकस्मिकी।।

इत्यादयः श्लोकाः श्रियःगुणरत्नान्येव श्रीरामायणे जगन्मातुः सीतादेव्याः पुरुषकारवैभवप्रतिपादनपराः सम्प्रदायिनां महानन्दमुपजनयन्ति।

अधिशयितवानब्धिं नाथोममन्थबबन्धतं
हरधनुरसौवल्ली भञ्जम्बभञ्ज च मैथिलि।
अपि दशमुखीं लूत्वा रक्षःकबन्धमनर्तयत्
किमिव न पतिः कर्तात्वच्चादुचुञ्चु मनोरथः।।

इत्यस्मिन् श्लोके भगवतः कृत्यानि महालक्ष्मी मुखविकासपराणीति जगदुः। अन्यच्च "योऽर्थः सहृदयः श्लाघ्यः" इति ध्वनिकारप्रतिपादितः अलौकिकानन्दः प्रतिश्लोकं पश्यामः। ममन्थबबन्धवभञ्जानर्तयत् इत्यादिषु व्याकरणानुगुणं धातुवैचित्र्यं सरसं सहृदयाह्लादकञ्च भवति। श्रीगुणरत्नकोशे प्रतिश्लोकं रत्नायमानं भवति। प्रतिपदं भावगाम्भीर्यपरम्। प्रत्यक्षरं ध्वनिभूयिष्ठम्। प्रतिशब्दं रमणीयर्थप्रतिपादकं आवहति। इत्थं शब्दगुणार्थगुणगुम्फितम् आचार्याणां प्रतिभां विशदयति। महालक्ष्म्याः औदार्यं तावत् श्रीपराशराः एवमुपवर्णयन्ति।

ऐश्वर्यमक्षरगतिं परमं पदं वा
कस्मैचिदञ्जलिभरं वहते वितीर्य।
अस्मै नकिञ्चिदुचितङ्कृतमित्यथाम्ब
त्वं लज्जसे कथय! कोऽयमुदारभाव: ।।

अस्मिन् श्लोके भगवत्या: अनितरसाधारणप्रभाव: अत्युज्ज्वलमौदार्यं श्लाघिता: । श्रीपराशरा: सहृदयान् भक्तजनान् च नीत्वा रत्नानि गुणमयानि दर्शयन्ति। तानि च रामायणरत्नाकरात् सर्ववेदजलधित: पुराणाध्यात्मिक-विद्यासागरादादाय एकत्र कोशे मञ्जूषिकायां श्रीसूक्तभूयिष्ठप्रार्थनायां निक्षिप्तवन्त: इत्थं ६१ श्लोका: मधुरमधुरा: रसघना: श्रीविशिष्टाद्वैतसिद्धान्ते महालक्ष्म्या: पुरुषकारवैभवद्योतका: भवन्ति । अहो! श्रीपराशरभट्टार्याणां स्वातन्त्र्यम् । सर्वतोमुख-प्रतिभा। अन्तिमे श्लोके --

श्रीरङ्गे शरदश्शतं सह सुहृद्वर्गेण निष्कण्टकं
निर्दु:खं सुसुखञ्च दास्यरसिकां भुक्त्वा समृद्धिम्पराम्।
युष्मत्पादसरोरुहान्तररज: स्याम त्वमम्बा पिता
सर्वं च त्वमसि त्वमेव भव नस्स्वीकुर्वकस्मात्कृपाम्।।

श्रीरङ्गनाथदेवी ममजननी पिता सर्वं सैवेति तस्या: परमानुग्रहश्चेत् नान्यत् किमपि दुस्साधं भवेदिति च विशदीकुर्वन्ति स्म। दक्षिणभारते सुप्रसिद्ध: श्रीवैष्णवसम्प्रदाय:, वडगलै, तेङ्गलै इति रूपेण द्विविध:। वडगलै सम्प्रदाये महालक्ष्मीं भगवत्कोट्यां निक्षिप्य शरणं भजन्ते। तेङ्गलै सम्प्रादायिन: महालक्ष्मीं जीवकोट्यां निक्षिप्य सैव पुरुषकारिणीं मन्यन्ते। भगवते सर्वं निवेद्य क्षान्तिं संवर्धयतीति तेन श्रिय:पति: रक्षतीति शरणं भजन्ते। उभयत्रापि महालक्ष्म्या: प्राधान्यम्। वडगलै सम्प्रदाये वेदान्ताचार्या: पराशरभट्टार्याणामनन्तर काले महालक्ष्मीं स्वस्तोत्रपाठेषु बहुधा बहुत्र स्तुवन्ति स्म। तेषां पद्येषु श्रीपराशरभट्टार्याणां प्रभाव: स्पष्टमुपलक्ष्यते। इत्थं श्रीगुणरत्नकोश: अपि द्वयमन्त्रप्रतिपादक एव।

श्रीरङ्गनाथस्तोत्रम् -

श्रीपराशरभट्टार्याणां सुन्दरकवितायाः निदानभूतं श्रीरङ्गनाथस्तोत्रम्। लघुकाव्यत्वेन परिगण्यते। अस्मिन् स्तोत्रे षट् संख्याकाः श्लोकाः सन्ति। परन्तु प्राचीनग्रन्थेषु मुद्रितेषु अष्टौ दृश्यन्ते। अन्ते परिदृश्यमानौ द्वौ श्लोकौ नुक्तकाविति विदुषामभिप्रायः। न केवलं श्रीवैष्णवदेवालयेषु, अपि तु श्रीवैष्णवगृहेषु आबालवृद्धाऽपि प्रतिदिनं सानन्दं पठन्ति। प्रायशः अपरिचितशिशवो न भवतीत्यत्र अहो रचनायाः गुणत्वम्। स्रग्धरादिवृत्ताः पाठकान् गुञ्जयन्ति। तत्राद्यः श्लोकः --

सप्तप्राकारमध्ये सरसिजमुकुलोद्भासमाने विमाने
कावेरीमध्यदेशे मृदुतलफणिराट् भोगपर्यङ्कभागे।
निद्रामुद्राभिरामं कटिनिकटशिरः पार्श्वविन्यस्त हस्तं
पद्माधात्रीकराभ्यां परिचित चरणं रङ्गराजं भजेऽहम्।।

अयं च श्लोकः ओजोगुणभूयिष्ठः महत्वपूर्णः सर्वैः नित्यानुसन्धानपाठेषु पारायणरूपेण स्वीकृतः। अत्र भगवतो श्रीरङ्गनाथस्य साक्षात्कारः सकलमनुजनयनयोः चित्रमिव कृतवन्तः। . सप्तप्राकारयुते सरसिजमुकुलोद्भासमाने च विमाने कावेरी सलिलपरिवृते क्षेत्रे मृदुतलफणिराट्भोगपर्यङ्के निद्रामुद्राभिरामं कटिनिकटपार्श्वविन्यस्तहस्तं पद्माधात्रीकराभ्यां परिचरितचरणयुगळं श्रीरङ्गनाथं शरणं भजन्ते। अस्मिन् श्लोके वर्णितः श्रीरङ्गनाथः अधुना न तथा परिदृश्यते। पद्मधात्री कराभ्यां परिचितचरणः मूलस्थाने न साक्षात्क्रियते। हेतुः न जानीमः। तदानींतने काले आसीदिति केचन विवदन्ते। अथाद्वितीयः द्वितीयः श्लोकः। श्लोकेस्मिन् श्रीरङ्गनाथस्य दिव्याननं कस्तूरीकलितोर्ध्वपुण्ड्रं, कर्णान्तलोलेक्षणं, मुग्धस्मेरमनोहराधरदळं, मुक्ताकिरीटोज्वलं, पश्यन्मानस पश्यतोहररुचः, पर्ययपङ्केरुहं, कदा वा भूयोऽपि सेवेय इति स्वमानसिकीं बाधां आर्तिं च विज्ञापयामासुः। अत्र विचार्यमाणे श्रीमन्तः भट्टपादाः वीरसुन्दभूपालकृत भागवतापचारमसहमानाः स्वाराध्यमूर्तिनः भगवतः क्षेत्रंश्रीरङ्गमपि तत्यजुः। तस्मिन् समये . स्वाचार्याणामभि-

मानदिव्यदेशाय गेष्ठीपुरनामकक्षेत्राय प्रतस्थिरे। तत्रैव बहुकालं स्थिताः श्रीरङ्गनाथदेवस्य विरहबाधामसहमानाः श्रीरङ्गनाथस्तोत्रं निर्ममुः। तृतीयचतुर्थश्लोकयोः शिखरिणीवृत्तविलसितयोर्मध्ये श्रीपराशरभट्टार्याः स्वकीयां वाञ्छां प्रकटयन्ति। कदा वा कावेरी तटपरिसरे श्रीरङ्गमन्दिरे भोगीन्द्रे शयानं शतमखमणिश्यामलरुचिं मधुमथन नारायण हरे मुरारे गोविन्द इत्युपासीनः क्रोशन् दिवसानि अनुनेष्यामि इति, कदा वा कावेरीविमलसलिले वीतकलुषो भवेयमिति श्रममुषि तत्तीरे कदा वा वसेयमिति, कदा वा पुण्ये महति पुलिने मङ्गळगुणं कमलनयनं शेषशयनं भजेयमिति अतिकरुणं स्वबाधानमुभवन्ति।

संस्कृतसाहित्यमर्मज्ञाः शिखरिणी वृत्तास्वादने भवभूतिमेव श्लाघयन्ति। शिखरिण्यां भवभूतिः "एको रसः करुण एव इति निरूपितवान्। श्रीरामचन्द्रस्य सीता वियोगजवृत्तान्तः "अपि ग्रावा रोदिति अपि दळति वज्रस्य हृदयम्" इति यथा वर्णयति तद्वत् भट्टार्याः अपि शिखरिण्यां श्रीरङ्गनाथस्य वियोगमुपवर्णितवन्तः। सहृदयमनांसि द्रवीभवन्तीत्यत्र नास्ति संशीतिः। श्रीपराशरार्याणां कावेरी सलिल अवगाहनं परमभिमततममिति स्पष्टं ज्ञायते। सदैव कावेरीं शेषपर्यङ्कं च स्मरन्ति। पञ्चमश्लोके परमाद्भुतं भावमाविष्कुर्वन्ति। पञ्चमश्लोकः पञ्चमस्वरभूयिष्ट एव।

"पूगीकण्ठद्वससरसस्निग्धनीरोपकण्ठाम्।
आविर्मोदस्तिमितिशकुनानूदितब्रह्मघोषाम्।।"

इति श्रीरङ्गधाम्नः श्रीमतीं तां पुरीं पिकशुकालापब्रह्मघोषां पुनरपि कदा वा पश्येयमिति वारं वारं प्रार्थयन्ति। षष्ठे श्लेके तु

न जातु पीतामृतमूर्छितानां नाकौकसां नन्दनवाटिकासु।
रङ्गेश्व त्वत्पुरतमाश्रितानां रथ्याशुनामन्यतमो भवेयम्।।

श्रीरङ्गचन्द्र नाकौकसां नन्दनवाटिकासु कदापि मे वसतिः न भवतु। परन्तु तत्पुरमाश्रितानां रथ्याशुनामन्यतमो भवेयमिति स्वकीयां

भावपरम्परां प्रटयन्तीति आचार्याणां श्रीरङ्गशुभवासनाभिलाषः आनन्दमुपजनयति। सप्तमे तु काचन किंवदन्ती व्यज्यते। श्लोकोऽयं श्रीरङ्गनाथस्तोत्रे नान्तर्भवति। यतो हि अत्र वर्ण्यमानः विषयः सर्वात्मना भिन्न एव। कदाचित् श्रीरङ्गमन्दिराभ्यन्तरं कश्चन सारमेयः निकृष्टः जन्तुः प्राविशत्। अतः देवालयशास्त्रानुसारं शान्तिः कल्पनीयेति अर्चकप्रमुखाः श्रीरङ्गपुरोहितान् श्रीपराशरभट्टार्यानूचुः। एते च श्रीरङ्गशायिनः सन्निधिमुपगम्य

असन्निकृष्टस्य निकृष्टजन्तोः मिथ्यापवादेन करोषि शान्तिम्।
ततो निकृष्टे मयि सन्निकृष्टे कां निष्कृतिं रङ्गपते करोषि।।

हे श्रीरङ्गपते! क्षुद्रजन्तुः कुक्कुरः तव मन्दिरं प्राविशदिति मिथ्यापवादेन शान्तिं करोषि। निकृष्टजन्तुः जात्या नीच एव। परन्तु योऽयं जनः तव पुरतः उपस्थितः दासः कर्मणा नीचजन्तुः। यथा भगवद्यामुन मुनयो वदन्ति

अमर्यादः क्षुद्रश्चलमतिरसूया प्रसवभूः
कृतघ्नो दुर्मानी स्मरपरवशो वञ्चनपरः।
नृसंशः पापिष्ठः कथमहमितो दुःखजलधेः
अपारादुत्तीर्णस्तवपरितरेऽयं चरणयोः।। (स्तोत्ररत्नम्)

इत्यमुं श्लोकमेव भावयन्तः अहंशुनः अपि निकृष्टः। तव दिव्यान्तरालं समागतोऽस्मि। श्वा तु अज्ञानभूयिष्टः, किमपि न जानाति। अयं रङ्गमन्दिरः नाहं प्रवेष्टुमर्ह इति। अहं तु ज्ञानवान् सकल दुर्गुणभूयिष्ठः । ततोऽपि निकृष्टः तव सन्निकृष्टे भवामि। इदानीं कां निष्कृतिं करोषि? किमित्यहं शान्तिं कुर्याम्?

"पवित्राणां परवित्रं यो मङ्गळानां च मङ्गळम्।
दैवतं देवतानां च भूतानां योऽव्ययः पिता।।
त्वमेव सर्वान् पवित्री करोषि। त्वां कः पवित्रं कुरुते।"

इति वदन्तः, पूर्वोक्तं मुक्तकं न्यवेदयन् इति। विचार्यमाणे वृत्तान्तोऽयं सत्यभूयिष्टः असत्ययुक्तो वेति न निश्चुनुमः। केचन धनलोभयुक्ताः अर्चकवर्गाः एवं बलात् श्वानं रङ्गमन्दिरं प्रावेशिताः इति तदर्थं शान्तिं

कल्पयित्वा धनधान्यं लब्धुकामा एवमकुर्वन्निति च वदन्ति। यदि वा भवतु नैच्यानुसन्धानवेलायां मुक्तकोऽयं सर्वोत्तमत्वेन श्रीवैष्णवैः समादृतः। अथान्तिमश्लोकस्तु भगवद्रामानुजाचार्याणां विजययात्रां उद्घोषयति। भारते सर्वत्र श्रीवैष्णवदेवालयेषु रामानुजसिद्धान्तानुगुणामर्चनां कुर्वन्ति। न केवलं दक्षिणे भारते भगवद्रामानुजाचार्याणां प्रभावः अपि तु उत्तरे भारतेऽपि तेषां प्रभावः चकास्ति। श्रीवैष्णवदिव्यक्षेत्राणि १०८ प्रसिद्धानि सन्ति। यत्र च रामानुजाचार्यसिद्धान्तमनुसृत्यैवार्चनादिकं कुर्वन्ति स्म। तच्च दिव्यक्षेत्रक्रमः मुक्तकेऽस्मिन् संसूचितः। सर्वैरपि उत्तरादिश्रीवैष्णवैः भगवदाराधनवेलायां उच्चार्यतेऽयं श्लोकः । महापुण्यफलदः इति ।

श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रिसिंहाचलौ
श्रीकूर्मं पुरुषोत्तमञ्च बदरीनारायणं नैमिशम्।
श्रीमद्वारवतीप्रयागमधुराऽयोध्यागयाः पुष्करं
सालग्रामगिरिं निषेव्य रमते रामानुजोऽयं मुनिः।।[1]

अत्रोत्तरदक्षिणभारतदेशे स्थितानां श्रीवैष्णवदिव्यक्षेत्राणामनुसन्धानं क्रियते। १. श्रीरङ्गम्। २.काञ्चीपुरम्। ३, तिरुपतिः। ४. अहोबिलम्। ५. सिंहाचलम्। ६. श्रीकूर्मम्। ७. पूरीजगन्नाथम्। ८. बदरीनारायणम्। ९. नैमिशम्। १०. श्रीमद्वारवती। ११. प्रयागक्षेत्रम्। १२. मधुरा क्षेत्रम्। १३. अयोध्या। १४. गयाक्षेत्रम्। १५. पुष्करक्षेत्रम्। १८. सालग्रामगिरिक्षेत्रम्। इति इमानि क्षेत्राणि श्रीवैष्णवानां दर्शनीयानि मुक्तिप्रदानि च भवन्ति। अत्र श्रीमहाविष्णोः श्रीवैखानस-

---

[1] श्रीरङ्गं, करिशैलम् (काञ्चीपुरम्) - तमुळनाडु देशे। अञ्जनगिरितार्क्ष्याद्रिः, सिंहाचलः, श्रीकूर्मं च। -तिरुपतिः, सिंहाचलः, अहोबिलम् (आन्ध्रप्रदेशे)। पुरुषोत्तममं पूरीजगन्नाथक्षेत्रम् (ओरिस्सा देशे)। बदरीनारायणस्तावत् हिमगिरिषु दृश्यते। नैमिशक्षेत्रं उत्तरदेशे। द्वारकापुरी - गुजरातदेशे। प्रयागक्षेत्रं - अलहाबादस्य समीपे। मथुरा, अयोध्या, गया - उत्तरदेशे। पुष्करक्षेत्रं - राजस्थानदेशे। सालग्रामक्षेत्रं - नोपालदेशे च विद्यते।

पाञ्चरात्रागमानुगुणं अर्चना क्रियते। इत्थं अखण्डभारतपरिचयः श्रीवैष्णवसाम्प्रदाये स्थापयन्तो श्रीपराशराः उत्तरदक्षिणभारतजनानां प्रियतमाः सञ्जाताः स्वगुरुसार्वभौमान् देशे सर्वत्र प्रकाशितवन्तः। अत एव श्रीपराशरभट्टार्यकृतिषु श्रीरङ्गनाथस्तोत्रं द्वाभ्यां मुक्तकाभ्यां साकं एवमनुसन्धीयते।

श्रीरङ्गराजस्तवः- पूर्वशतकविशेषाः -

श्रीपराशरभट्टार्याणां कृतिषु श्रीरङ्गराजस्तवः हिमगिरिशिखरायमाणः प्रपन्नजनपारिजातश्चेति वक्तुं शक्यते। अयं च द्वयमन्त्रविवरणात्मकः "श्रीरङ्गराजस्तवः" पूर्वशतक-उत्तरशतकभूयिष्ठः रराजते। पूर्वशतके १२७ श्लोकाः, उत्तरशतके १०५श्लोकाः रसघनाः भक्तजनान् गुञ्जयन्ति। वीरसुन्दरभूपमरणानन्तरं श्रीरङ्गं प्रत्यागताः श्रीपराशरभट्टार्याः श्रीरङ्गराजस्तवमकार्षुरिति महतां वचनम्। प्रथमशतके श्रीपराशरभट्टार्याः श्रीवैष्णवजनानां कुलधनं कुलदैवतं भोग्यं रङ्गनाथं आपादमस्तकं वर्णितुमारब्धाः, गुरुपरम्परावन्दनपूर्वकमेव सर्वैस्साम्प्रदायिकैरभ्यसनीयत्वात् द्वयस्य प्रत्यूहव्याहृत्यै मङ्गळस्यानुष्ठेयत्वाच्च जन्मना विद्यया च स्वजनकश्रीवत्साङ्कमिश्रवन्दनरूपं मङ्गळं निबध्नन्ति स्म।

श्रीवत्सचिन्हमिश्रेभ्यो नम उक्तिमधीमहि ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गळसूत्रताम्।।

अहो श्रीपराशरार्याणां पितृभक्तिः! तदनु पञ्चसंस्कारमन्त्ररत्नोपदेशिकं श्रीगोविन्दमिश्रवन्दनरूपं श्लोकमुक्तवन्तः। तदनु भगवद्रामानुजाचार्यान् प्रणमन्ति स्म। अनन्तरं रामानुजमुनेः देशिकं श्रीपराङ्कुशदासापरनामधेयं महापूर्णगुरुं मनसा प्रणम्य यामुनमुनिं प्रणमन्ति। ततो यामुनमुनेराचार्यौ राममिश्रपुण्डरीकाक्षौ मनसा नमस्कृत्य तत्त्वविदग्रगण्यं भगवन्तं श्रीनाथमुनिं नमस्कुर्वन्ति स्म। इत्थं गुरुपरम्पराप्रविष्टस्य विष्वक्सेनस्य नमस्कारमपि मनसा कृत्वा भवभयाभितप्तचित्तानां तदुत्तारणाय श्रीमन्नारायणचरणारविन्दशरणागतिजुषां सर्वेषामपि

पुरुषकारभूतां श्रियं नमस्यन्ति स्म। तदनु व्याख्येयतया अभिमतमन्त्ररत्नपूर्वखण्डं सङ्ग्रहेण विवृण्वन्ति स्म। तदनु श्रीमच्छब्दार्थमेव श्लोकत्रयेण प्रतिपादिताः तदनु स्वयमेव समाश्रित-संरक्षणत्वरापरवशानां सुदर्शनादीनामपि नित्यसन्निधानमुपवर्णिताः। इत्थं मन्त्ररत्नविवरणतया चिकीर्षितप्रबन्धादावश्यकतया कर्तव्ये गुरुपम्परा-वन्दने प्रबन्धकृतां गुरूणां श्लोकरूपं, अन्येषां मानसञ्चकृत्वा लक्ष्मयाः तद्वल्लभस्यापि गुरुपरम्परानिविष्टत्वात् श्रीमन्नारायणशब्दार्थरूपत्वाच्च तयोर्वन्दनमपि कृत्वा वक्तव्यमर्थमपि संक्षिप्य विस्तरेण स्तोतुं स्वस्य स्तोत्रानधिकारम् आशङ्क्य सप्तभिः श्लोकैः समादधिरे। प्रागेव विवर्यमन्त्ररत्ननिष्ठश्रीमत्पदस्य विवृतत्वान्नारायणपदैकदेश नारपद विवरीतुकामाः इत्थं स्वस्तुत्यधिकारं द्रढीकृत्य प्रारभमाणाः प्रथमतः श्रीरङ्गदिव्यनगरदिव्यालङ्कारभूतां कावेरीं पञ्चभिः श्लोकैः स्तुवन्ति स्म। कावेरी वन्दनानन्तरं तदीयद्वीपं श्लोकद्वयेन वन्दनीयमिति वर्णयन्ति स्म। नित्यप्राप्यत्वमेवति श्रीरङ्गारामभूमेर्भवश्रमभीतभगवत्प्रपत्यनुगुण-भोग्यतेति वर्णिताः। श्रीरङ्गदिव्यनगरं श्लोकत्रयेण बहुरमणीयकं वर्णिताः। तदनु नगरपरिपालनकृतेः गणाधिपान् नमस्कुर्वन्ति स्म। अनन्तरमत्यन्तमुत्तुङ्गगोपुरवृन्दयुक्तं सप्तप्राकारपरीतं श्रीरङ्गमन्दिरं, द्वारपालान्, सहस्रस्थूणास्थानरत्नावस्थानं श्रीमतीं चन्द्रपुष्करिणीं, तत्र प्राग्देशप्रतिष्ठितान् प्राचार्यान् श्रीपराङ्कुशादीन् दशापि दयाभ्युत्थानाय प्रार्थयते स्म। अथ श्रीरङ्गविमानमद्भुताद्भुतमुपवर्णयन्ति। तदनु पुन्नागनोकहश्रेष्ठं, विष्वक्सेनं, तन्महिषीश्च, श्रीमन्तं गरुत्मन्तं, तत्पत्न्यौ रुद्रसुकीर्तीः समाश्रयन्ति स्म। तदनु पञ्चायुधीं स्तुवन्ति। एवमेव अस्त्रराजं दाशरथिप्रतिनिधि श्रीरङ्गनाथसेवैकधारकौ हनुमद्विभीषणौ, वेत्रश्रेष्ठं, आमोदस्तम्भद्वयं श्रीरङ्गविमानान्तःप्रदेशं श्रीरङ्गशायिपादार-विन्दसंवाहिनीः चामरग्राहिणीः वर्णयन्तः, कावेरीमवगाहिषीयेत्यारभ्य विवर्त्य मन्त्ररत्ननिष्ठा नारपदं विवरणं कृत्वा नारायणपदार्थभूतं श्रीरङ्गराजं विस्तरेण स्तुत्या प्रतिपाद्य तच्चरणौ शरणं प्रपद्येति प्रतिपाद्य पूर्वखण्डार्थं परिसमापयन्ति स्म पूर्वशतकेन। समाश्रित-

कार्यापादकत्वेन च पूर्वाचार्यैर्विभक्ताः कृपापरिपाक भेदाः सौशील्य-सौलभ्यवात्सल्यप्रभृतयो ज्ञानशक्त्यादयश्च श्रीरङ्गशायिनि विशदतरं प्रकाशन्तेति साम्प्रदायिकानां पन्थाः पदयोः किसलयत्वनिरूपणं चात्यन्तभोग्यतयोपेयभूतयोरेवाकिञ्चनजनाभीष्टसाधनोपायत्वद्योतनाय एवंभूते पदकिसलयेति शरणं प्रपद्ये" इत्यन्तिमे श्लोके उपवर्णयन्ति स्म। पूर्वशतकपठनवेलायां पाठकजनानां श्रीरङ्गनिवासानुभूतिः, श्रीरङ्ग-मन्दिरदर्शनहर्षातिरेकः, कावेरीस्नानानुभूतिः सम्प्रदायानुगुणं "श्रीमन्नारायणचरणौ शरणं प्रपद्ये" इति द्वयमन्त्रपूर्व-खण्डस्मरणं तस्यार्थः प्रत्यक्षं प्रदर्शितवन्तः श्रीपराशरभट्टार्याः श्रीरङ्गेशपुरोहिताः सर्वचेतनानां हितैषिणः सञ्जाताः।

श्रीरङ्गराजस्तवः - उत्तरशतकविशेषाः

श्रीपराशरभट्टार्याः उत्तरशतकेन मन्त्ररत्नपूर्वखण्डोपबृम्हणं कृत्वा सम्प्रत्युत्तरवाक्यवर्णनाय प्रारभमाणाः "ब्रह्मविदाप्नोति परम्" इति सर्वस्मात् परस्यैव प्राप्यतया सर्वसमाश्रयणीयनिमित्तकसौलभ्याति-शयजुषः श्रीरङ्गराजस्यैव सर्वस्मात् परत्वं विस्तरेण प्रतिपादयन्तः, सन्तः प्रथमतः शास्त्रैकसमधिगम्यत्वात् परत्वस्य तादृशशास्त्रप्रति-पादनमपि अपारकृपावतः भगवतः कृत्यमित्याह। द्वयोत्तरवाक्यविवरणे उत्तरशतके वेदबाह्यमतनिरसनं बहुचमत्कारं कृत्वा, वेदार्थनिर्णय-विधानं, वेदार्थावगतसाधनानि भगवद्गुणाः, जगत्सृष्टिप्रकारः, चेतनसंरक्षणं, अवतारप्रकारः, अर्चावतारवैभवः, अधिकारिस्वरूपम्, स्वनैच्यं, क्षमाप्रार्थना, शरणागतिः, भगवत्कैङ्कर्यपार्थना इत्यादयः विषयाः विस्तरेणोपपादिताः। अत्र वेदवेदान्तविषयाः, शास्त्रविषयाः, द्रविडवेदसारांशविवरणादयः, श्रीपराशरार्याणांवेदान्तविपश्चितत्वं च प्रकटितमस्ति। श्रीपराशराः श्रीरङ्गराजस्तवे शतकद्वयभूयिष्ठे न केवलं शास्त्रविषयाः न वा वेदान्तविषयाः अपि तु विशिष्टाद्वैतसिद्धान्तस्थापनं मनोहरशब्दार्थजालेन, ध्वनिप्रधानेन , अलङ्कारसौभाग्येन, रसमाध्यमेन, सहृदयाङ्लादनिदानत्वेन स्वाभिमतं मन्त्ररत्नस्य पूर्वोत्तरखण्डद्वयं

महाप्रतिभा विशेषेण प्रतिपादितवन्तः। पूर्वोक्तविशेषाः शोधकर्मणि यथावकाशं श्रीरङ्गनाथस्य परमानुग्रहेण परिशीलयामः।

श्रीपराशरभट्टार्याणामनुपलब्धाः कृतयः -

१. अध्यात्मखण्डद्वयविवरणम्। २. तत्त्वरत्नाकरः। ३. लक्ष्मीकल्याणम् नाटकञ्च इति। कुतो वा अनुपलभ्यन्तेति न स्पष्टं वयं जानीमः. भगवान् श्रीरङ्गनाथ एव प्रमाणं भवति। प्राचीनविशिष्टाद्वैतपण्डितानां कर्णाकर्णिकतया ग्रन्थत्रयाणामनुपलभ्यमानानां नामानि श्रूयन्ते। सत्स्वपि महापण्डितेषु अनेकेषु तत्र भगवान् श्रीनिवासघण्टावतारः श्रीवेदान्त-देशिकाः एक एव ग्रन्थत्रयाणां परिचयं श्रीवैष्णवलोकाय कृतवन्तः। एतेषां ग्रन्थानाधारीकृत्य पराशरभट्टार्याणां ग्रन्थपरिशीलनं क्रियते।

अध्यात्मखण्डद्वयविवरणम् -

वेदान्ताचार्याणां न्यायसिद्धाञ्जननामके ग्रन्थे श्रीपराशर-भट्टार्याणामभिप्रायः विवरणद्वयात्मकः अध्यात्मखण्डद्वयविवरणतया उपलभ्यते। प्रथमविवरणाभिप्रायिस्तु शारीरकः यो वा भगवद्रामानुजा-चार्यवर्यैः श्रीभाष्ये संस्थापितः। सोऽयमभिप्रायः वेदान्तदेशिक-महोदयानामभिरप्रायसाम्यमुपैतीति स्वयं प्रदर्शितवन्तः[1]। द्वितीय-विवरणाभिप्रायस्तु स्वकीये न्यायसिद्धाञ्जने विलक्षणरूपः मोक्ष इति वदन्तः श्रीपराशरभट्टार्याणामभिप्रायमाविष्चक्रुः। ऐश्वर्यं चकैवल्यस्थानं च आनन्दविशेषभूतौ। उत्तरोत्तरविशिष्टावेव। न च मोक्षावस्था इव श्रेष्ठतमाविति। नाम श्रीवैकुण्ठकैङ्कर्ये वा भूलोकजन्मनि वा प्रयोजनाभावः। आस्वादनानुभवाभावः इति तच्च प्रपन्नजनैर्नाभि-लषणीयम्। श्रीमन्नारायणसायुज्य एव मोक्षः इति तदेवाभिलषणीय इति, स च आचार्यकटाक्षैकलब्ध इति वदन्ति।

---

[1] स्थूलसूक्ष्मशरीराणां निदानभूतः सर्वेश्वरः एव।

तत्त्वरत्नाकरः -

श्रीपराशरभट्टार्याणां "तत्त्वरत्नाकरः" मुख्यतमग्रन्थः इति विदुषामभिप्रायः। अत्र द्विचत्वारिंशत् उद्धारणानि तत्त्वज्ञानायोपकुर्वन्ति। एतानि तत्त्वानि समुद्रायमाणानि एव। श्रीवेदान्ताचार्याणां न्यायपरिशुद्धिग्रन्थादेवास्य ग्रन्थस्योपलब्धिः विविधाः भागाः दृश्यन्ते, प्रकरणेति नाम्ना प्रथन्ते। श्रीदेशिकाः इमं ग्रन्थं जानन्त्येव। अधुना नोपलभ्यते। विशिष्टाद्वैतसिद्धान्तप्रकाशकोऽयं ग्रन्थः इत्यत्र न सन्देहः। G. Oberhammer वदति यत् तत्त्वरत्नाकरः भट्टार्यैः न समग्रेण विरचित इति। देशिकाः अपि न सम्पूर्णग्रन्थं जानन्तीति। तत्र निदानं तु तदानींतन राजोपप्लवा इति ऊहितुं शक्यते। श्रीमतां याममुनाचार्य रामानुजाचार्याणां ग्रन्थादरणकाले विरचितोऽयं तत्त्वरत्नाकरः। नातिख्यातिमलभतेति केचन वदन्ति। केचन यद्यपि तेङ्गलवडगलस्पर्धाः अपि कारणमिति वदन्ति। तच्च न श्रद्धेयं भवति।

लक्ष्मीकल्याणम् -

इदं च नाटकं कुत्रापि नोऽपलभ्यते। परन्तु बहवो विद्वांसः स्वोपन्यासवेलायां लक्ष्मीकल्यणनाटकं श्रीपराशरभट्टार्यप्रणीतमित्येव वदन्ति। तस्मिन्नाटके किमिति वस्तु वा नाटकलक्षणानुगुणविशेषान् वा वक्तुं न पारयन्ति स्म। नाटकानुपलब्धिरेवात्र कारणम्। अस्मिन् विषये श्रीवेदान्ताचार्याणां सारासारग्रन्थ एव शरणं भवति। सिद्धोपायचोदनायां अनन्याधीनकल्याणमिति वदन्तः

अनन्याधीनकल्याणमन्यमङ्गळकारणम्।
जगन्निधानमद्वंन्द्वं द्वन्द्वं वन्दामहे वयम्।।

इत्यनुष्टुप् छन्दसा मङ्गळश्लोकमारचयन्निति तत्र अकाररूपिणं भगवन्तं नमस्क्रियारूपेण स्तुवन्तः नाटकं रचितवन्तः। "दैवतिं दम्पती नः" इति लक्ष्मीनारायणमिथुनं प्रार्थयन्ते। तावेव दम्पती सकलश्रेयसां निदानभूताविति स्थापयन्ति। अथ द्वितीये विवरणे तु

"स्वयं वस्तु कुर्वन् जनमिमं अकस्मात् सरसिज-

प्रकारो पद्मायास्तव च चरणौ नः शरण्यान्।"

अत्र हे नारायण! त्वमेवं मां दासजनं वाञ्छारहितं कृत्वा निर्हेतुककृपया त्वत्पादारविन्दयोः एवमेव महालक्ष्म्याश्च पादारविन्दयोः शरणागतं विधेहि। एषा प्रार्थना शठकोपमुनिविरचित"तिरुवाय्मोळि" अनुगुणा भवति। एवमेवान्यत्र श्रीवेदान्ताचार्यरामानुजाचार्याणां गीताभाष्यविवरण-वेलायाम् अष्टादशाध्याये १४१५ श्लोकयोः मध्ये -

"अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधा च पृथक् चेष्टा दैवं चैवात्र पञ्चमम्।"
(भ.गी. १८-१४)

"दैवं चैवात्र पञ्चमम्" इत्यत्र लक्ष्मीकल्याणे च "धर्मे प्रमाणं समयस्तदीयो वेदाश्च तत्त्वं च तदिष्टदैवम्" इति तस्माद्दैवशब्दोत्र देवतापर्यायः इति व्याख्यातवन्तः[1]। अयं च विषयः इन्द्रवज्रावृत्ते सूचितश्च। अत्र श्रीपराशरार्याणां श्रीलक्ष्मीकल्याणनाटकवचनप्रमाणेन "दैवं" नाम न पुरुषकाररूपादृष्टविशेषः। परन्तु भगवद्गीतादि शास्त्रेषु दैवं नाम साक्षात् अन्तर्यामिदेवतेति। स एवान्तर्यामि भवति इति अनेकप्रमाणान्युक्तवन्तः । तस्मिन् समये श्रीपराशराणां नाटक-वचनमपि स्मरन्ति। अत्र नाटके भगवतीं महालक्ष्मीं भगवान् नारायणः उद्वहति। विशिष्टाद्वैतसिद्धान्तानुगुणं लक्ष्मीं (जीवात्मानम्) आकारत्रय-सम्पन्नां नारायणः परमात्मा स्वयं स्वीकरोतीति ज्ञायते। नवविध-सम्बन्धेषु पतिपत्निभावसम्बन्धः अनुसन्धीयते। नाटकेत्र कति अङ्काः? को वा रसः इत्यादीनि नाटकविशेषानि नोपलभ्यन्ते।

सुबालोपनिषद्व्याख्या -

सुबालोपनिषदः व्याख्यास्तीति श्रीमता वेदान्ताचार्येणैव स्वग्रन्थे "सर्वार्थसिद्धि"नामके "यदुक्तं भट्टपराशरपादैः [सुबालो-

---

[1] श्री श्री श्री त्रिदण्डिश्रीमन्नारायणरामानुजजीयर्स्वामिनपादैः प्रकाशितायाः श्रीमद्भगवद्गीतीयाः भगवद्रामानुजभाष्यम्। वेदान्ताचार्यविरचिततात्पर्यचन्द्रिका टीका च प्रमाणाकराः पाठभेदश्च। श्रीमदुभयवेदान्ताचार्यपीठम्। वासुदासाश्रमम्, १९७६.

निषद्विविवरणे] यदि भूतानामपि प्रकृतित्वं तर्हि अस्तु प्रकृतयः षोडशविकाराः इति श्रुतेः का गतिरिति चेत् वेदोपबृम्हण पुराणनिपुणतरपरामर्शिसन्दर्शितैव गतिः नास्माभिः तद्विरुद्धनिर्वहणेऽभिनिवेष्टव्यम्। इतीमानि वाक्यानि उट्टङ्कितवन्तः। अत्र कथं अष्टौ प्रकृतयः षोडश विकाराः इत्यत्र विवरणे कापि चर्चा समागता। तत्र इमां व्याख्यां श्रीपराशरभट्टार्याः उपन्यस्ताः। अतःपरं नोपलभ्यते।

संस्कृते मुक्तकानि।।

श्रीपराशरभट्टार्याः तत्तत्समयेषु श्रीरङ्गादिक्षेत्रेषु आशुवेगेन हर्षोत्कर्षेण भक्तिपारवश्येन च सन्दर्भानुगुणं च भगवन्तं स्तुवन्ति स्म। तान्येव एव मुक्तकानीत्युच्यन्ते[1]। अधुनापि एते श्लोकाः श्रीरङ्गे एकादश्यां, अमायां, अयनेषु, तेलुगुतमिळनूतनवत्सरेषु दिवसेषु ब्रह्मोत्सवादिषु पठ्यन्ते। श्रीपराशरभट्टार्याणां वंशपरम्परपुरुषाः अष्टाविंशतिश्लोकानेव पठ्यन्ते। ते मुद्रणेऽपि दृश्यन्ते। [उदाहरणरूपेणात्र कांश्चन श्लोकान् दर्शयामः।] तत्र प्रसिद्धश्लोकस्तु श्रीमद्भिः परवस्तुगोविन्दाचार्यैः प्रकटिते श्रीनिवासग्रन्थमालायामपि प्रचुरितमस्ति।

१. त्वमेऽहं मे कुतस्तत् तदपि कुत इदं वेदमूलप्रमाणात्
एतच्चानादि सिद्धात् अनुभवविभवात् तर्हि साक्रोश एव।
क्वाक्रोशः कस्य गीतादिषु मम विदितः कोत्र साक्षीसुधी स्यात्
हन्तत्वत्पक्षपाती इति नृकलहे मृग्यमध्यस्थवत् त्वम्।।

२. सर्वस्मात् परसाम्परायसवने शक्तिस्तवेच्छात्मिका
पत्नी पात्रगणाश्च हेतिपतयः प्राप्तर्त्विजो बाहवः।
पौलस्त्याः पशवो दशाननमुखाः रक्षा फलं ज्ञानिनां
श्रीमन्! मज्जनकैतवादवभृथस्नातेव रङ्गेश्वर।।

३. वृत्तिर्वेगवती समाश्रितजनत्राणो भरच्चेतसः
ताम्रा कुङ्कुमपत्रिका भुजतटी ते तुङ्गभद्रोज्ज्वला।

---

[1] तिरुवञ्जन कळ्यङ्गल् तिरुमञ्जनकवि द्रमिड भाषायां वदन्ति

रङ्गाधीश्वर! नर्मदा च भणितिः शोणः सुजातोऽधरः
तस्मात् स्नानविधौ जनोऽभिमनुते त्वां सर्वतीर्थात्मकम्।।

४. रङ्गेश रजननी चर्चा राजते तव वक्षसि।
देव्या हिरण्यवर्णाया देहकान्तिरिवोदिता।।

५. अनोकशाखाश्रितमाश्रितेभ्यो दत्ताभिकाङ्क्ष्यं त्रिदशैकभोग्यम्।
सुपर्णरम्यं सुमनस्समेतं सुरद्रुमं त्वां सुधियो वदन्ति।।

इत्यादयः मनोहरभावपूर्णाः अभिषेकसमये भगवद्भागवतगोष्ठ्यां च श्रीपराशरभट्टार्यैः मङ्गळाशासनरूपेण कीर्त्यन्ते स्म।

❖ ❖ ❖

।। तृतीयः प्राकारः ।।

वेदस्वरूपम -

योवै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवो आत्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये।।
(श्वेताश्वतरोपनिषत्- अ.६ मं-१८)
"तस्मै नूनमभिद्यवे वाचा नित्यया वृष्णे चोदस्व सुष्ठुतिम्।।
(ऋग्वेद ८-७५-६)

श्रीमदखिलाण्डकोटिब्रह्माणडनायकः श्रियःपतिः भगवान् नारायणः

"संसारमरुकान्तारे दुर्व्याधिव्याघ्रभीषणे।
विषयक्षुद्रगुल्माढ्ये मृगतृष्णापापदशालिनि।।
पुत्रदारगृहक्षेत्रतृष्णाम्बुपुष्कले।
कृत्याकृत्यविवेकान्धं परिभ्रान्तमितस्ततः।।"

इति इतस्ततः परिभ्रमणमानानां मानवानां खेदमसहमानः परमकारुणिको भूत्वा समीचीनोपदेशपरम्परया अखिलबाधानिवृत्तिविशिष्टस्वसायुज्यावाप्तिरूपमोक्षमार्गं ददर्शयिषुरादौ स्वनाभिकमलात् चतुर्मुखब्रह्माणं सृष्ट्वा तस्मै परब्रह्मप्रतिपादकरूपां वेदविद्यामुपादिशत्। "विदन्ति अनेन धर्माधर्मौ" इति वेदः। "वेदयतीति वेदः" इति वदन्ति मनीषिणः। विद-ज्ञाने इति धातोः समुत्पन्नोऽयं वेदशब्दः। "अपौरुषेयः वेदः", "अनन्ता वै वेदाः" इति च समामनन्ति। स हि सर्वज्ञकल्पः। वर्णाश्रमप्रविभागहेतुः अतीन्द्रियधर्माधर्मव्यवस्थापकः। भारतीयानां प्रधानभूतयागस्वरूपनिरूपकः प्रधानपुरुषार्थरूपमोक्षप्रतिपादकश्च भवति। "अजान् ह वै पृथ्वीं स्तापस्यमानान् ब्रह्म स्वयं भ्वभ्यानर्षत्" (तै. आ. २-९) अपौरुषेयाः वेदाः इति भारतीयानां सिद्धान्तः। अत एव भ्रमविप्रलम्भप्रमादा-शक्तिरूपचतुष्टयदोषविधुरः भगवतो नारायणस्य मुखारविन्दादुद्भूतः सर्वोन्नतस्थानमभजत्। वेदनित्यत्वमपि सिद्धम्।

वेदाध्ययनं सर्वं गुर्वध्ययनपूर्वकम्।
वेदाध्ययनसामान्यात् अधुनाध्ययनं यथा।।

इत्यादिना वेदापौरुषेयत्वस्य साधितत्वात् "यः कल्पः स कल्पपूर्वः" इति न्यायेन संसारस्य अनादित्वात् ईश्वरस्य सर्वज्ञत्वात् ईश्वरो गतकल्पीयं वेदमस्मिन्कल्पे स्मृत्वा उपदिशतीत्येतावतैवोपपत्तौ प्रमाणान्तरेणार्थ-मुपलभ्य रचितत्वकल्पनानुपपत्तेश्च। ततश्च पुरुषाभावात् शब्दनिष्ठैव। इत्यापदेववचनानि स्मरणीयानि भवन्ति। वेदास्तावत् सर्वेषां वैदिकधर्माणां धर्मग्रन्थाः, ते च नित्याः अपौरुषेयाश्च इति पूर्वमीमांसा-दर्शनादौ आचार्यजैमिनिना साधितम्। सोऽयं वेदः एकस्मिन् अध्ययनसौकर्याय महर्षिणा व्यासेन चतुर्धा विभक्तः। ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदश्चेति क्रमेण वदन्ति। केचन अथर्ववेदस्य वेदत्वं कालक्रमेणाङ्गीकृतमिति भावयन्ति। ते तु "त्रयी" शब्दः ऋग्यजुस्सम्ना-मेवेति। इति वेदास्त्रयः त्रयी इति निघण्टुवचनं प्रदर्शयन्ति। अस्तु नाम। वेदाः अध्ययनपरम्पराभेदेन तासु तासु शाखासु अंशतः पाठभेदेनोपलभ्यन्ते। काश्चन शाखाः अध्ययनपरम्परायामभावात् लुप्ताः। तासु कासांचन नामानि तत्र तत्र प्रकरणानुसारं निर्दिष्टान्युपलभ्यन्ते। यासामध्ययनपरंपरा इयता कालेनापि जागर्ति ता वर्णाक्षरस्वरभेदरहिताः शुद्धस्वरूपेणावतीर्णाः। गुरोः शिष्यं प्रति पितुश्च पुत्रं प्रति एवं मुखं परम्परामात्रेण अलिखितस्वरूपाः वेदाः यथातथ्येन सुदीर्घं कालं यावत् कथं सम्प्राप्ता इति विषये भारतीयेतराः महदाश्चर्यं कुर्वन्ति। वेदस्यानित्यत्वं साधयितुं संरम्भमाणापि नैयायिकादायः पुरुषकर्तृकत्वं साधयितुमसमर्थाः ईश्वरकर्तृत्वमेवान्ततो गत्वा प्रतिपद्यन्ते। पौरुषेयत्वे प्रमाणाभाव एवापौरुषेयत्वे प्रमाणम्। वेदस्य स्वरूपं द्विविधम्। शब्दरूपम् अर्थरूपं चेति। मन्त्राः स्वरप्रधानभूयिष्ठाः शब्दाः अर्थप्रधाना भवन्ति। वेदार्थज्ञानपूर्वकश्रौतस्मार्तकर्मानुष्ठानमिदानीमपि पश्यामः। "वेदा हि यज्ञार्थम् अभिप्रवृत्ताः" इति वेदाङ्गज्योतिषे उक्तः। "योऽर्थज्ञः इत् सकलं भद्रमश्नुते" इति श्रुतिः यास्काचार्यैः निरुक्ते उदाहृता। श्रौतकर्मणः अनुष्ठानेन यत् फलं प्राप्यते तत्तस्य कर्मणो ज्ञानेनापि

लभ्यत इति ब्राह्मणेषु "य एवं वेद" इति शब्दैः वारं वारं स्पष्टीकृतम्। वेदस्य वेदोक्तकर्मणश्च सम्यक् ज्ञानार्थं वेदाङ्गानि रचितानि। तानि च मुण्डकोपनिषत् श्रुतिः-

"द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा यया तदक्षरमधिगम्यते" इति।।

शिक्षादिवेदाङ्गानि वेदार्थज्ञानसम्पादने श्रौतकर्मविषयकज्ञानसम्पादने च साहाय्यं कुर्वन्ति। वेदाङ्गविषये ऋक्संहिताभाष्यस्योपोद्घातेऽपि याज्ञवल्क्येन स्मर्यते।

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।
इतिहासपुराणाभ्यां वेदं समुपबृम्हयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति।।

एवं वेदेषु इतिहासपुराणानामंशाः तेषामेव विस्तरो महाभारत-पुराणादिषु कृतास्तीति तेऽपि ग्रन्थाः वेदार्थज्ञानोपकारकाः इति सायणाचार्याणा-माशयः। न्यायशास्त्रं पूर्वोत्तरमीमांसे कर्मशास्त्रं चेत्येतेषामपि वेदाङ्गैः वेदैश्च सह विद्यास्थानेष्वन्तर्भावः कृतोऽस्ति याज्ञवल्क्येन। "अजान् ह वै श्नीं स्तपस्यामानान् ब्रह्मस्वयं भ्वभ्यनार्षत्" (तैत्तिरीय. आ २.९) इति तैत्तिरीयारण्यकवाक्यमपि वेदनित्यत्वं स्पष्टमाह। एतानि सर्वाणि साधनानि सन्दर्भानुसारेणोपयुज्य वेदार्थज्ञाने प्रयासः कर्तव्यः इति प्राचीनाचार्याणामाशयः। अतः शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति इति महतामाशयः । शब्दानुशासनप्रयोजनाधिकरणे भगवान् पतञ्जलिः "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इति रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यक् वेदान् परिपालयिष्यतीति ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति वेदाध्ययनं वेदाध्ययनप्रयोजनं चोपदिदेश। एवमेव

दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतो पराधात्।।

(महाभाष्यम् - पस्पशाह्निकम्)

इति वेदस्य स्वरप्रधानमुदाजहार। अतः वेदार्थनिर्णये षडङ्गादीनां पुराणोपनिषदां च ज्ञानं परमावश्यकम्। वेदाः सत्यार्थप्रतिपादकाः, सर्वशङ्कानिवारकाः सर्वचेतनोद्धारकाः भवन्ति। अतएव वेदाः दैवीवाच" इति, श्रीमन्नारायणस्य निश्वासाः इति आनन्ताः प्रज्ञान-निलयाः अपौरुषेयाः परिपूर्णाः नित्यसत्याः इति सर्वे प्रणमन्ति। वेदाः परम्परारूपेणागताः। अतः श्रुतयः इति नाम्ना प्रथन्ते।

"यस्मात् ऋचो आपातक्षन् यजुर्यस्मादपाकषन्
सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम्।।

(अथर्वकाण्ड १०)

स्कम्भं तं बूहि कतमस्वि देव सः।।

इत्यस्मिन् मन्त्रे ऋग्वेदः येन विनिर्मितः, येन वा यजुर्वेदः विनिर्मितः, यस्य वा रोमाणि सामवेदजलानि भवन्ति, तेजोमयः अथर्ववेदः, यस्य मुखं भवेत् तं स्कम्भं इति ब्रूहि। स एषोत्तममोत्तमः इति प्रतिपादितः अस्ति। एवमेव

कविर्मनीषी परिभूः स्वयम्भूः यथातथ्यतोऽर्थान्
व्यदधाच्छाश्वतीभ्यः समाभयः।।

(यजुर्वेदः। अ.४०, म.८)

स्वयम्भूः सर्वव्यापकः शुद्धः सनातनः लोककल्याणाय यथातथं वेदमूलात् समस्ताः विद्याः उपदिशतीति सर्वकार्यदुरन्धर इति च प्रशस्यते।

यस्मिन् ऋचः सामयजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिन्श्चित्तं सर्वमेतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु।।

(यजुर्वेदः। मं ५)

इत्यस्मिन् मन्त्रे यत्र चक्रे नेमयः संभवन्ति तद्वत् मे मनसि च ऋग्यजुस्सामाथर्वणवेदाः प्रतिष्ठिताः भवन्ति। तेन मे मनः अविद्यां विहाय सर्वदा विद्याप्रियं च भवेतेति प्रार्थयन्ति स्म मनीषिणः।

तस्मात् यज्ञात् सर्वहुतः ऋचस्समानि जज्ञिरे।

छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मदजायत।।
(पुरुषसूक्तम्)

तस्य ह वा एतस्य महतो भूतस्य निःश्वसितमेततद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः। यथा उच्छ्वासनिःश्वासयोरभावे शरीरस्य सत्ता न भवति। तथा वेदानामभावे परमात्मनः सत्ताऽपि न भवतीति तेन ध्वन्यते स चायं वेदः। एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः एकविंशतिधा बाह्वच्यं नवधा अथर्वणो वेदः इति वेदानां स्वरूपं प्रतिपादितम्। {महाभाष्यवचनम्।} चतुर्विधः प्रत्येकं बहुशाखाश्चासीद ध्ययनपरम्परायाम्। श्रीपराशरभट्टाः एवं प्रतिपादयन्ति स्म -

आदौ वेदाः प्रमाणं स्मृतिरुपकुरुते सेतिहासैः पुराणैः
न्यायैस्सार्थं त्वदर्चाविधिमुपरि परिक्षीयते पूर्वभागः।
ऊर्ध्वो भागः त्वदीहागुणविभवपरिज्ञापनैस्त्वपदाप्तौ
वेद्यो वेदैश्च सर्वैरहमिति भगवान् स्वेन च व्याचकर्थ।।
(श्रीरङ्गराजस्तवः। उत्तरशतक१९)

केचन मन्त्रब्राह्मणारण्यकोपनिषदः मिलित्वा वेदः इत्यूचुः। अपरे तु मन्त्रब्राह्मणावेव वेदस्वरूपत्वं भजतेति विवदन्ते। परन्तु शिष्टाचारवन्तः चत्वारो वेदाः ऋग्यजुस्सामाथर्वणो वेदाः इति सिद्धान्तयन्ति स्म।

वेदवेद्यः नारायणः -

तस्मिन् वेदे पूर्वभागोत्तरभागरूपेणोपवर्णितः विषयस्तु। पूर्वभागे जगच्छरीरिणः परमात्मनः सद्वारकाराधनपूर्वकविषयः उत्तरभागे तु साक्षात्परमात्मनः स्वरूपरूपगुणविभूत्यादि प्रतिपादनपूर्वकः भवति। वेदेन प्रतिपादितस्य विषयस्य तु

"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति ।
यत् प्रयन्ति अभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म ।।"
(तै. आ.)

इत्यपि श्रुतिवाक्ये जगज्जन्मादिकारणत्वं प्रत्यपादि। तज्जगज्जन्मादिकारणं वस्तु "कारणं तु ध्येयः" इति उपास्यरूपेण निर्धारितः।

तच्च ध्येयं ब्रह्म "सदेव सोम्य इदमग्र आसीत्" ब्रह्म वा इदमग्र आसीत्", "आत्म वा इदमग्र आसीत्" इत्यादिषु श्रुतिषु सद्ब्रह्मात्मादिसामान्यशब्दविहितः अन्ते निस्संशयेन "एको ह वै नारायण आसीत् न ब्रह्म नेशानः" इति सृष्ट्यादौ ब्रह्मादयो न भवन्तीति नारायण एक एवासीदिति प्रत्यपादयत्। अतः नारायणशब्दे एव सद्ब्रह्मात्मादिशब्दाः पर्यवस्यन्ते। एवमेव कारणवस्तुबोधकाः शिवरुद्रेन्द्रप्राणाकाशादिशब्दाः नारायणे पर्यवस्यन्तीति कृत्वा परब्रह्म नारायणः इति सिध्यति। अत्र कल्पे तत्तत्सर्गीयप्राथमिक उच्चारण-विषयत्वरूपोत्पत्तिसुखमेव वेदानां सम्पद्यते। भगवतैव प्रथमतः चतुर्मुखं प्रत्युपदेशात् वेदानां तदुत्पन्नत्वोपपत्तेः। अनुगृहीतं च भगवता भाष्यकृता देवाधिकरणभाष्ये एतदेव च वेदस्यापौरुषेयत्वं नित्यत्वं च यत्पूर्वपूर्वक्रम-जनितसंस्कारेण तमेव क्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यत्वम् । इयांस्तु विशेषः संस्कारानपेक्ष एव स्वयमेवानिसन्धत्ते पुरुषोत्तमः इति। अतः वेदस्य नित्यत्वं नाम प्रत्युच्चारणपूर्वपूर्वक्रमसदृशानुपूर्वी विशिष्टतयोच्चार्यमाणत्वमिति। न चैवं वेदस्य गवादिशब्दतुल्यत्वा-पत्तिरिति वाच्यम्। इष्टत्वात् लोके व्यवह्रियमाणानां गवादिशब्दानामपि हि वेदघटकतया सर्वसम्प्रतिपन्ना। अत एवस्य सर्वस्य भूतजातस्य वेदशब्देभ्य एव नामनिर्माणं स्मर्यते।

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ पृथक्संस्थांश्च निर्ममे।।

इति "नामरूपं च भूतानां कृत्यानां च प्रपञ्चनम्। वेदशब्देभ्य एवादौ देवादीनां चकार सः।।" इति तस्मात् वेदस्यानादित्वम् अपौरुषेयत्व-मुपपन्नतरमिति पुरुषसूक्तव्याख्याने दशम्यां ऋचिव्याख्यातम्। इत्थं वेदे सर्वत्र

"यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृतिलीलस्य यः परस्समहेश्वरः।।

इत्यादौ वेदादौ मध्ये चान्ते हरिः नारायणः सूच्यते इति प्रत्यक्षमेव। यथा वेदपाठस्यारम्भवेलायां हरिः ओम् इति वेदपाठपारायणा-

नन्तरसमाप्तौ च हरिः ओम् इति सर्वैः वेदपण्डितैः अनादिकालात् गुरुपरम्पराज्ञया पठ्यते च। अतः वेदस्य पूर्वोत्तरभागयोः आरम्भे मध्ये अन्ते भगवान्नायणः एव सूच्यते। इममेवार्थं

"वेदैश्च सर्वैरहमेव वेद्यः वेदान्तकृद्वेदविदेव चाऽहम्।"

(भ.गी. अ.१०)

"वेदानां सामवेदोऽस्मि देवानामस्मि वासवः।"

(भ. गी. १५)

भगवद्गीताशास्त्रे भगवान् स्वयमेव पार्थाय स्वभक्ताय परमं रहस्यज्ञानमित्युपदिदेश। एवमेव सर्ववेदेषु प्रतिपादिते पुरुषसूक्ते जगत्कारणत्वं भगवति नारायणे प्रदर्शितत्वात् वेदवेद्यः साक्षात् नारायण एवेति सिध्यति। पुरुषशब्दश्च सकलजगत्कारणभूतं नारायणमाह। तत्र सकलजगत्कारणत्वं तत्पुरुषस्य पुरुषत्वं इति श्रौतनिर्वचनात् सिद्धम्। तस्य नारायणत्वं च उत्तरनारायणे "वेदाहमेतं पुरुषं महान्तम्" इति प्रस्तुतस्य पुरुषस्यैव "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इति·लक्ष्मीपतित्वोक्त्या सिध्यति।

"सहस्रशीर्षं देवं विश्वाक्षं विश्वसम्भुवम्।
विश्वं नारायणं देवमक्षरं परमं पदम्।।

इत्युत्तरनारायणे नारायणवृत्तितया प्रतिपादितस्य सहस्रशीर्षत्वादेरत्र प्रतिपादनाच्च पुरुषो नारायण एवेति सिद्धान्तितः। वेदपुराणादिशब्दप्रपञ्चे यत्र यत्र पुरुषशब्दः पठ्यते सः शब्दः श्रीमति नारायणे विशेषशक्तिं साधयति। वेदपुरुषः भगवान् श्रीमन्नारायणः इत्यत्र इमे श्लोकाः स्मरणीयाः भवन्ति।

पुंसञ्ज्ञे तु शरीरेस्मिन् शयनात् पुरुषो हरिः।
शकारस्य षकारोऽयं व्यत्ययेन प्रयुज्यते।।
यद्वा पुरे शरीरेऽस्मिन् आस्ते स पुरुषो हरिः।
यदि वा पुर्वमेवासीति पुरुषः प्रोच्यते हरिः।।
यदि वा पूर्वे वासमिहेति पुरुषं विदुः।।
यदि वा बहुदानाद्वै विष्णुः पुरुषोच्यते।

पूर्णत्वात् पुरुषो विष्णुः पुराणत्वाच्च शार्ङ्गिणः।।
पुराणभजनाच्चापि विष्णुः पुरुष ईर्यते।
यद्वा पुरुषशब्दोऽयं रूढ्यावक्तिजनार्दनम्।।

इत्यादिपाद्मगतनामनिर्वचनाध्यायवचनैरन्यैश्चेतादृशैः पूर्णत्वसकलजगत्कारणत्वादिविशिष्टनारायणत्वावच्छिन्ने पुरुषशब्दस्य योगरूढिरप्यवगम्यते। एवमेव

ब्रह्माद्याः सकला वेदाः यक्षतुम्बुरनारदाः।
ते सर्वे पुरुषांशत्वात् उच्यते पुरुषा इति।।

इति पाद्मवचनेन

स एव वासुदेवोऽयं साक्षात् पुरुष उच्यते।

इति नारसिंहपुराणवचनेन।

भगवानिति यश्शब्दः तथा पुरुष इत्यपि।
निरुपाधी च वर्तेते वासुदेवे सनातने।।
सर्वलोकप्रतिस्साक्षात्पुरुषः प्रोच्यते हरिः।
तं विना पुण्डरीकाक्षं केऽन्यः पुरुषशब्दभाक्।।

इति वचनाभ्यां पुरुषशब्दस्य भगवच्छब्दस्येव नारायण एव मुख्यवृत्तिसद्भावः। श्रुतिस्मृतीतिहासपुराणादिषु सहस्रशो भगवति नारायणे प्रयुक्तत्वात् तद्बलाद्विशेषशक्तिसिद्धिः केन वार्यते? "तमुवाच पुरुषः प्रजायते" (तपनीयोपनिषत्), "शृणु सृष्टेरुपायम्" (सुबालोपनिषत्), "पुरुष एवेदं सर्वम्। विश्वमेवेदं पुरुषः' (महोपनिषदि नारायणानुवाके) 'पुरुषो ह वै नारायणोऽकामयत। पुरुषो ह वै नारायणोऽकामयत। पुरुषं हि नारायणम्।' (शतपथब्राह्मणम्) 'प्रजापतिरुवाच। सहस्रशीर्षा पुरुषः सहस्राक्षस्सहस्रपात् " (आरुणकेतुके) इत्यत्र पुरुषशब्दो भगवति नारायणे प्रयुक्तः।

श्रीमद्रामायणे, अग्निपुराणे, महाकाव्येषु, स्तोत्रपाठेषु च वेदवेद्यः वेदपुरुषः भगवान् श्रीमन्नारायणः एवेति निर्णयः कृतः।[1]

वेदेषु पौरुषं सूक्तं पुराणेषु च वैष्णवम्।
भारते भगवद्गीता धर्मशास्त्रेषु मानवम्।।

इति पुरुषसूक्तस्य सर्ववेदप्रशस्तिः। इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते।

द्रविडवेदस्वरूपम् - श्रीमन्नारायणः ।

"श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम्।
यदीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम्।।

श्रियःपतेः परब्रह्मणः स्वरूपः, तस्य सृष्टेः रचनाविधानं, यज्ञयागादि क्रियाः, अनेकानेकरहस्याः, पुरुषार्थचतुष्टयोपायाः, भगवद्गुणानुग्रहविशेषाः, स्तोत्ररूपसूक्त्यादयः यथा संस्कृतवेदचतुष्टये प्रतिपादिताः। ते च पदक्रमजटघनयुताः प्रश्नाष्टकाः तदुपबृम्हणानां अंशपर्वस्कन्धादि भेदाः पदवाक्यपादवृत्तकाण्डाध्यायाः, गम्भीरार्थप्रतिपादकाः श्रुतयः अपौरुषेयाः, अनादिकालप्रवृत्ताः, जात्याधिकारिवैलक्षण्यसहिताः विश्वकल्याणाय प्रवृत्ताः न केवलं भूमण्डले अपि च श्रीवैकुण्ठेऽपि नित्यसूरिगणादयः निरन्तरमध्ययनं कुर्वन्तीति, अहो वेदानां महत्वम्। वेदवेद्यस्य वेदप्रियत्वम्। जीवसंरक्षणोदारता।। एवं सत्स्वपि वेदवेदाङ्गपुराणेतिहासादिषु जीववर्गः अप्राप्तब्रह्मानन्दाः तेन च भगवदनुभवजनितप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यनिर -वद्यनिरतिशयानन्दरूपभगवत् कैङ्कर्यमहाविभूतिरहिताः, अनादिवासनादोषदूषिताः संसारचक्रे भ्रमन्तीति वारं वारं विचार्य परमपुरुषः स

1 । श्रीकाञ्चीप्रतिवादिभयङ्करानन्ताचार्यैः विरचितस्यानुवादः पुरुषसूक्तमु, ते. के. गोपालाचार्याः, १९६६.

भगवान् कारुण्यात् सकलजनसंरक्षणाय श्रिया युतः एवं संकल्पयामास[1]। तदनु महालक्ष्मीं प्रति एवमुवाच। तद्यथा -

नानावतारं प्राप्तं मामवधीर्य नरा भुवि।
आसुरप्रकृतित्वाच्च बलात् पूर्वाघसन्ततेः।।
वासनावशतो मूढाः शासनार्हताङ्गताः।
घटीयन्त्रघटन्यायात् निरयोत्पत्तिगामिनः।।
करणैस्ते मया दत्तैः विषयाननुभुञ्जते।
समिच्छेदार्थशस्त्रेण गोपुच्छछेदनीतितः।।
तानिदानीं समुद्धर्तुं सङ्कल्पं कल्पयाम्यहम्।
उपायो निरपायो मे रोचते सर्वसङ्ग्रहात्।।
परत्वव्यूहविभवैरपर्याप्तश्च संग्रहः।
अन्तर्यामी तदद्याहमर्चारूपेण तं लभे।।
इतोऽहं दिव्यदेशेषु श्रीरङ्गादिषु कल्पये।
अर्चावतार सान्निध्यं त्वया भूम्ना च नीलया।।
शेषशेषाशनाद्याश्च सूरयो भूरिबुद्धयः।
नानावर्णसमुत्पन्नाः नानादेशेषु वासिनः।।
नानाप्रबन्धनिर्माणैः नाना कैङ्कर्यवृत्तिभिः।
आम्नायान्तविवर्तैश्च सर्ववर्णोचितक्रमैः।।
मुद्गुणाशंशिभिः स्तोत्रैः द्राविडैः गोयमाश्रितैः।
शब्दादिविषयासक्तान् दुर्दर्शनपरायणान्।।

---

[1] चिह्निताः श्लोकाः श्रीकाश्यपकुलतिलकस्य रङ्गाधिपारोग्यशालावल्लभस्य कविवैद्यपुरन्दरापरनामधेयस्य गरुडवाहनपण्डितस्य श्रीनिवासकवेः कृतौ दिव्यसूरिचरिते महाकाव्ये प्रथमसर्गे ७९ तः ९३ पर्यन्ताः। श्रीमान् मैसूरसंस्थान सहायचालकः आळ्कोण्डविल्लि गोविन्दाचार्यैः द्रव्यशोधन-सहकारिभिः मैसूरविद्यातरङ्गिणी मुद्राक्षरशालायां मुद्रापिते श्रीदिव्यसूरिचरिते ग्रन्थे उपलब्धाः। printed कल्यब्दाः 4978 पार्थिववर्षम् 1885April 10 इति मुखपत्रे वर्तते। अयं महात्मा गरुडवाहनपण्डितः श्रीरामानुजाचार्याणां समकालिक इति वदन्ति ।

बाह्यराद्धान्तदुर्ध्वान्तनिरन्तरविमोहितान्।
संसारवनसम्भ्रान्तकरिकल्पांच्छनैर्नरान्।।
प्रापय्य भक्तेः पदवीं प्रपत्तेश्च ततो मम।
उपनेष्यन्ति सङ्काशे महानाले गजानिव।।
अङ्गीकृत्य तमोऽहं तान् सूरिभिस्सदृशानिह।
सदानुभविता तेषां कैङ्कर्ये ज्यामिति प्रिये।।
नित्यसूरींश्च मुक्तांश्च हेतींश्च कमलां भुवम्।
सम्प्रेष्य स यथास्थानमवताराय भूतले।।
स्वयं चकार भगवांछ्रीरङ्गादिषु धामसु।
सान्निध्यमर्चारूपेण सर्वं भूतानुकम्पया।।
निर्दिष्टा मधुरिपुणा दयाकरेण
श्रीरङ्गादिषु बहुधाम सुक्षमायाम् ।
मुक्तास्ते पुनरपि सूरयोऽवतीर्णा-
स्संसारे न गुरुवचो हि लङ्घनीयम्।।

श्रीमहाविष्णोः सङ्कल्पानुगुणं भगवतः दिव्यायुधदिव्याभरणविशेषाः दिव्यसूरयः इव भूमौ समागताः इति। कदाचित् महेश्वरस्य कल्याणावसरे सप्तर्षयः समागताः । दक्षिणप्रान्तादपि अगस्त्योऽपि समागतः। ऋषिमगस्त्यं दृष्ट्वा विश्वकर्मा देवशिल्पी परिहासमकरोत्। कुब्जोऽयं भारभूयिष्ठेऽयमिति। तदनु कृद्धो अगस्त्यः विश्वकर्मणे शशाप। तदा देवशिल्पी विश्वकर्मा अपि अस्त्यादृता द्रामिडी भाषा शिष्टदूषिता भवत्विति" शशाप। तदनु व्याकुलीभूते महर्षितल्लजे भगवान् श्रियःपतिः एवं जगाद। सदाशिवकल्याणाय समागता कलहायमाना मा भवन्तु। हे अगस्त्य ! कुम्भसम्भव महर्षिन् मा शोकमुपैहि। तवाभिमतां दक्षिणप्रान्तमयीं द्रामिडीं भाषाम् अहं मम परिवारा इमे च पुनः पुष्टिं गमिष्यामः। द्रामिडदेशस्थां भाषां पुष्टिं कल्पयिष्यामः। "अनन्ता वै वेदाः" इति श्रुत्युक्तप्रमाणेन वेदाः द्रमिडभाषामयाऽ-चिरेणैव सम्पत्स्यन्ते, तदर्थं मदीयदिव्यायुधादयः दिव्यसूरयो भूत्वा संस्कृतवेदान् वेदसारभूतोपनिषदः द्रामिड्यां गानमारचयन्तः लोकानु-

द्वरिष्यन्तीत्याश्वासयामास। महर्षेः दत्तवचनानुगुणं द्रमिडेषु नारायणपरा महाभागवताः भगवदंशारूपेणावतरन्।।

संस्कृतवेदस्य यावन्तः नियमाः सन्ति तावन्तः न द्रविडवेदाय। यथा संस्कृतवेदस्य उदात्तनुदात्तस्वरितप्लुतास्वराः भवन्ति द्रविडवेदस्य न तथा स्वरनियमः। संस्कृवेदस्य उपनयनसंस्कारः अपेक्षते। द्रविडवेदस्य न तथा भवति । संस्कृतवेदस्य स्त्रीशूद्राधिकारो नास्ति। द्रविडवेदाध्ययने सर्वेषामपि स्त्रीशूद्राणामपि अधिकारः वर्तते। संस्कृतवेदः त्रैगुण्यविषयः।. बहुदेवतास्तुतिरूपः। द्रविडवेदः सत्वगुणभूयिष्ठः श्रीमन्नारायणपारम्यमेव जगौ। द्रविडवेदः अनन्याव्यभिचारशरणागतिप्रधानः सर्वसुलभः । भगवतः सन्निधौ सदा संकीर्त्यते। संस्कृतवेदे स्तम्भनमोहनमारणादयः काम्यकर्मकलापः पुरुषार्थचतुष्टयभूयिष्ठो प्रस्तुतः। द्रविडवेदे निष्कामरूपेण श्रीमन्नारायणचरणारविन्दसंसेवनारूप दिव्यगानाध्ययनरूपमेव प्रतिपादितः। "वेदरूपमिदं कृतम्", "द्रामिडीं ब्रह्मसंहिताम्", "द्राविडवेदसूक्तैः", "वेदं तमिळ्शय्द मारन्" इत्युक्तरूपेण दिव्यसूरिणां दिव्यप्रबन्धाः संस्कृतवेदतदुपबृम्हणादिभिः समानाः सर्वजनसुलभविश्वजनामनुमोदनभक्तामृताः सर्वार्थदाः १. एळुत्तु [ह्रस्वदीर्घाद्यक्षराः] २. अशै [अव्ययानि] ३. शीर् [गणयुताः] ४. पन्दम् [बन्धाः] ५. अडि [पादविशेषाः] ६. तोडै [पादसन्दर्भविशेषाः] ७. निरै पेरनिलै ८. ओशै शेप्पलोशै ९. तलैवेरोन्नाशिरयित्तळै १०. इनं तळिशै [छन्दो भूयिष्ठाः] ११. याप्पु [प्रबन्धायमानाः] १२. पा [वेण्वा आशिरयप्पदयो वृत्तविशेषाः] १३. पण् [नाटादिरागयुक्ताः] १४. इशै [निषादादि सप्तस्वभूयिषाः] १५. ताळम् [जम्पे गजकर्णताळयुक्ताः] १६. पत्तु [दशकरूपेण] १७. नूरु [शतकरूपेण] १८. आयिरम् [सहस्त्ररूपेण] सर्वालङ्कारशब्दार्थगुणगणरसमयाः विशिष्टलक्षणलक्षिताः प्राचीनकालादाद्रियन्ते।

द्रविडवेदेषु प्रायशः जीवपरभेदः, जीवानां परस्परभेदः, जीवप्रकृतिभेदः, प्रकृतीश्वरभेदः, आत्मनः नित्यत्वादयंः, देहानित्यत्वम्,

सर्वेश्वरस्य नारायणस्य सर्वशरीरित्व-सर्वान्तर्यामित्व-सर्वनियन्तृत्वादयः सौलभ्यसौशील्यस्वामित्ववात्सल्यकारुण्यौदार्यादयः सर्वसमत्वसर्वविभूति-योगादयः विशदीकृताः कर्मज्ञानभक्तिप्रपत्त्यादियोगैश्च संयुतः अध्यात्म-विद्यारहस्यः, भगवतः अवताराश्चर्यचेष्टाः लीलादयः, दिव्यकल्याण-गुणगणकीर्तनम्, वेदवेदान्तोपबृम्हणविषयाः रामायण-महाभारत-भागवत-भगवद्गीतादिसात्विकपुराणप्रचुरविषयभूयिष्ठः प्रमाणसारतमवाक्य-शोभितः अष्टाक्षरद्वयमन्त्रचरमश्लोकार्थयुततत्त्वत्रयार्थपञ्चकज्ञानप्रदाः दिव्यदेशस्तुतिपराः दीर्घशरणागतिप्रतिपादकविषयभूयिष्ठाः भवन्ति।

द्रविडवेदविभागः -

दिव्यायुधाभरणांशाः	दिव्यसूरयः	गाथासंख्या	दिव्यप्रबन्धाः
१. श्रीपाञ्चजन्यम्	पोय्गौयाळ्वार् (सरोयोगि)	१००	मुदल्तिरुवन्दादि
२. कौमोदकी	पूदत्ताळ्वार् (भूतयोगि)	१००	इरण्डांन्तिरुवन्दादि
३. नन्दकम्	पेयाळ्वार् (भ्रान्तयोगि)	१००	मून्रां तिरुवन्दादि
४. सुदर्शनम्	तिरुमडिशैयाळ्वार् (भक्तिसारः)	९६४	नान्मुगन्तिरुवन्दादि,
		१२०	तिरुच्चन्दविरुत्तम्
५. विष्वक्सेनांशः	नम्माळ्वार् (श्रीशठकोपमुनिः)	१००	तिरुविरुत्तम्,
		७	तिरुवाशिरियम्,
		८७	पेरियतिरुवन्दादि,
		१०२	तिरुवाय्मोळि
६. गदांशः	मधुरकवियाळ्वार्	११	कण्णिनुण् शिरुत्ताम्बु
७. कौस्तुभांशः	श्रीकुलशेखराळ्वार्	१०५	पेरुमाळ्तिरुमळि, मुकुन्दमाला
८. गरुडांशः	पेरियाळ्वार्	१२	तिरुप्पल्लाण्डु,

	(श्रीविष्णुचित्ता:)	४६१	पेरियाळ्वार्तिरुमोळि
९. भूदेवी	आण्डाळ्	३०	तिरुप्पावै
	(गोदादेवी)	१४३,	नाच्चियार्तिरुमोळि
१०. वनमालांश:	तोण्डरडिप्पोडियाळ्वार्	१०	तिरुमालै
	(विप्रनारायण:)	४५	तिरुप्पळ्ळियोळुच्चि
११. श्रीवत्सांशजा:	तिरुप्पाणियाळ्वार्	१०	अमलनादपिरान्
	(मुनिवाहन:)		
१२. शाङ्गांशजा:	तिरुमङ्गैयाळ्वार्	१०२४	पेरियतिरुमोळि
	(परकालकवि:)	२०	तिरुक्कुरुन्दाण्कम्
		१	तिरुवेरुक्तिरुक्कै,
		१	शिरियतिरुमडल्,
		१	पेरियतिरुमडल्,
		३०	तिरुनेडुन्दाण्डगम्

एते द्वादशदिव्यसूरय: [पन्निद्दराळ्वार्] इति नाम्ना द्रविडवेदप्रकाशका: इति कीर्त्यन्ते। एतेषां प्रबन्धा: चतुर्धा विभक्ता: [नालायिरम्]। चतुर्णां वेदानां समाना: प्रकाशन्ते।

श्रीपराशरभट्टार्यै: दिव्यसूरिविषये रचित: श्लोक:- (प्रार्थनारूप:)

भूतं सरश्च महदाह्वयभट्टनाथ-
श्रीभक्तिसारकुलशेखरयोगिवाहान्।
भक्ताङ्घ्रिरेणु परकालयतीन्द्रमिश्रान्
श्रीमत्पराङ्कुशमुनिं प्रणतोऽस्मि नित्यम्।। (मुक्तक: श्लोक:)

एते च दिव्यसूरयः द्रमिडभाषायां आळ्वारिति नाम्ना व्यवह्रियन्ते। आळ्वार् शब्दस्य "भगवद्गुणानुभवदास्यसागरनिमग्नाः" इत्यर्थः महद्भिः निगद्यते[1]। पुरुषशब्दश्च सकलजगत्कारणभूतं नारायणमाह।

१. प्रथमे पुमांसः एते च त्रयः द्वापरयुगे ८६२९६२ सिद्धार्थे वर्षे, सञ्जाता इति ज्ञायते।

२. भक्तिसारयोगी अपि द्वापरे युगे सञ्जाताः। (सिद्धार्थे वत्सरे)

३. श्रीशठकोपमुनिः कलियुगादौ ४३ दिने प्रमादिवर्षे सञ्जाताः।

४. मधुरकवयस्तुद्वापरे ८६३८७९ ईश्वरवर्षे सञ्जाताः।

५. कुलशेखरसूरिस्तु कलियुगे पराभववर्षे सञ्जाताः।

६. पेरियळ्वार् कलियुगे ४८ क्रोधनवर्षे सञ्जाताः।

७. आण्डाळ्देवी कलियुगे ९८ नलनामसंवत्लरे सञ्जाताः।

८. तोण्डरडिप्पोडियाळ्वार् कलियुगे २८९ प्रभवसंवत्सरे सञ्जाताः।

९. मुनिवाहनः (तिरुप्पाणियाळ्वार्) कलियुगे ३४३ दुर्मतीवर्षे सञ्जाताः।

१०. तिरुमङ्गैयाळ्वार् कलियुगे ३९८ नळनामसंवत्सरे सञ्जाताः।

इत्थं महात्मनां दिव्यसूरिणां परमानुग्रहेण समाधिगताः चत्वारो द्रमिडवेदाः केनापि कारणेनाप्रकाशं गताः, गच्छत्सु दिनेषु महाभागवतः गजननांशः श्रीमन्नाथमुनयः कलियुगे ३६८५ शोभकृत् वत्सरे वीरनारायणपुर नाम्ना प्रसिद्धिंगते काट्टुमन्नारसन्निधौ दिव्यजन्म लेभिरे। एते च दिव्ययात्रापरिक्रमणं कुर्वन्तः तिरुक्कुडन्दै [कुम्भकोणम्] दिव्यदेशमुपगताः, तत्रस्थाः देवदासीजनमुखात् श्रावितशठकोपमुनि-प्रणीतदिव्यगाथाः परिमितमात्रं निशम्य महतानन्देन सम्पूर्णप्रबन्धान् जिज्ञासया च नम्माळवारदिव्यदेशं आळ्वारतिरुनगरिं प्राप्य मधुरकविसूरिप्रणीतं कण्णिनुम् शिरुत्ताम्बु दिव्यप्रबन्धः द्वादशसहस्रवारं

---

1 श्रीमत्तृतीयब्रह्मतन्त्रस्वतन्त्रस्वामीशेयदरुळिनमुव्वायिरप्पडि गुरुपरम्परा प्रभावम् १८७७. ईश्वरवर्षे चित्तरैमासं सरस्वतीनिलयमेग्नुरु एवेति मुद्राक्षरशालायां प्रकाशितग्रन्थाधारेण सिध्यति।

पारायणं कृत्वा श्रीशठकोपदिव्यसूरिदर्शनमुपलब्धवन्तः। ते च कृपया निर्हेतुककटाक्षेण अस्मै नाथमुनये समस्तं द्रविडवेदमुपादिशन्। तदारभ्य लोके सर्वत्र द्रविडवेदः उपलब्धोऽभूत्। अत एव "नाथोपज्ञं वैष्णवम्" इति प्रसिद्धम् ।

द्रविडवेदसारः -

एते दिव्यप्रबन्धाः निगमविकृतयः प्राग्भिरेव प्रणीताः
ते सर्वाधिक्रियार्थं द्रविडफणितिभिः प्राप्तरूपान्तराश्च।
स्वातन्त्र्याम्नायभावोप्यथतदभिमतस्तादृशैस्सत्प्रमाणैः
किञ्चैषां भारतादेरिव निगमशिरोबृम्हणत्वं च सिद्धम्।।

द्रविडवेदाः श्रीमन्नारायणपरा तत्त्वप्रतिपादकाः भवन्ति। द्रविडवेदेष्वीषण्मात्रं देवतान्तरस्तोत्राणि न उपलभ्यन्ते। द्रविडवेदाः श्रीमन्नारायणस्य स्वरूपरूपगुणविभूतीः प्रतिपादयन्ति। परव्यूहविभवार्चावतारविवरणप्रतिपादका मनोहराश्च भवन्ति। तत्त्वत्रयप्रतिपादका विराजन्ते, अन्यदैवाराधनं न कदापि सहन्ते। भगवतो नारायणस्य नित्यमुक्तदिव्यसूरिसंसेव्यमानश्रीमन्नारायणचरणारविन्दयुगळं शरणं प्रतिपादयन्तः। अष्टाक्षरद्वयमन्त्रचरमश्लोकविवरणात्मकाः चिदचिद्विशिष्टपरब्रह्ममेव प्रतिपादयन्ति, विशिष्टाद्वैततत्त्वं प्रकटयन्ति च। द्रमिडवेदाध्ययने स्त्रीणां शूद्राणां च अधिकारः प्रदत्तः। अतः सर्वजनकल्याणावहाः संस्कृतवेदवत् सर्वत्र श्रीवैष्णवालयेषु, तथैव दिव्यदेशेषु च श्रीरङ्गादिषु प्रथमं स्थानं भजन्ते। अतः प्रपन्नानां भागवतोत्तमानां वैदिकसार्वभौमानां "उभयवेदान्तप्रवर्तकाः" इति महत्स्थानं लोके सुप्रसिद्धम्। उभयवेदान्तज्ञानरहिताः न कदापि श्रीमहाविष्णोः पारम्यं श्रीविशिष्टाद्वैतसिद्धान्तं न जानीयुः। तथैव श्रीवैष्णवत्वापूर्तिः सम्भवतीति सिद्धान्तः।

श्रीविशिष्टाद्वैतसिद्धान्तस्वरूपम् -

आस्तिकजनानां समस्तानां समुद्धरणाय भगवता महर्षिणा व्यासेन ब्रह्मसूत्राणि विनिर्मितानि। एवमेव वेदान् विभज्य वेदार्थनिर्णयाय

इमानि ब्रह्मसूत्राणि लोकेभ्यः कृपयाऽनुगृहीतवान्। व्यासमहर्षेः शिष्येभ्यः बोधायनऋषिप्रमुखेभ्यः ब्रह्मसूत्राणां वार्तिकव्याख्यानानि प्रकाशितानि। एतेषां ब्रह्मसूत्राणामेव शारीरकमीमांसासूत्राणि इति नाम्ना व्यवहारः सुप्रसिद्धः। एतेषां ब्रह्मसूत्राणां एकविंशतिसंख्याकानि भाष्यानि जगति प्रसिद्धानि सन्ति। तेषु द्वैताद्वैतविशिष्टाद्वैतभाष्यानि एव भारते ख्यातिमुपलब्धानि, तत्तन्मतानुयायिभिः भाक्त्याऽऽद्रियन्ते। तत्र भगवता श्रीमद्रामानुजाचार्येण बोधायनवृत्तिमनुसृत्याद्भुतरूपेण "श्रीभाष्यम्" इति ग्रन्थस्य रचना परिकल्पिता। तत्र स्थूलसूक्ष्मावस्थासु चिदचिद्विशिष्टः परब्रह्म श्रीमन्नरायणः एक एवेति सिद्धान्तः प्रत्यपादि। बोधायनवृत्तिश्च षष्ठिसहस्रग्रन्थत्वात् [श्रीभाष्यार्थसंग्रहे, page १५] जनसौकर्याय कलियुगारम्भे श्रीटङ्काचार्याः षट्सहस्रवाक्यपरिमितं कृत्वा सङ्ग्रहरूपेण ग्रन्थमेकं व्यरचितवन्तः। ग्रन्थस्यास्य श्रीगुहदेवाः टीकामकुर्वन्। ब्रह्मनन्दिनाम्ना कश्चन महात्माऽपरां टीकां च व्यरचयत्। अतः एते त्रयः शारीरकमीमांसाशास्त्रस्य प्रवर्तकाः सञ्जाताः। अनन्तरकाले भगवन्तः श्रीनाथमुनिभ्यः प्रसन्ना भूत्वा मीमांसाशास्त्रार्थाननुगृहीतवन्तः। तदनु श्रीमन्नाथमुनयः "न्यायतत्त्वम्" इति शास्त्रग्रन्थं च विरच्य, अध्यात्मसम्प्रदायस्य अङ्कुरार्पणमकुर्वन्। एतेषां पौत्राः भगवद्यामुनमुनीन्द्राः "सिद्धित्रयम्", "आगमप्रामाण्यम्", "महापुरुषनिर्णयः", "गीतार्थसंग्रहः"इत्यादिग्रन्थान् विरच्य, शारीरकमीमांसाशास्त्रार्थस्थापनमकुर्वन्। गच्छति काले श्रीशङ्करभगवत्पादाः शारीरकमीमांसाशास्त्रस्य अद्वैतपरं भाष्यं विलिखितवन्तः। भास्करयादवप्रकाशाचार्यवर्यौ शङ्कराचार्यभाष्यं किञ्चित् विभेद्य स्वस्वभाष्ये प्रकटीकृतवन्तौ। "ब्रह्म सत्यं जगन्मिथ्या" इति जीवब्रह्मणोरभेद एवेति श्रीशङ्कराचार्याणामाशयः। औपाधिकभेदाऽभेदवादिनः भास्कराचार्याः। स्वाभाविकभेदाऽभेदवादिनः यादवप्रकाशाः। तार्किकस्तु स्वनिष्ठभेदवादी। आधुनिकेषु अद्वैतानन्दतीर्थाः अद्वैतयतयः श्रीशङ्कराभिप्रायस्य भेदेन 'ब्रह्मसूत्रार्थतात्पर्यदीपिका' इति ग्रन्थमरचयन्। श्रीशङ्कारा-

चार्येभ्योऽपि प्राचीनाः औडुलोमि-बादरि-काशकृत्स्नाश्मरथ्यादयः परस्परमतभेदानुयायिनः अद्वैतिनः एव।

विशिष्टद्वैतसिद्धान्तप्रवर्तकाः - भगवद्रामानुजाचार्यमुनयः -

श्रीमति दक्षिणे भारते श्रीकाञ्चीपुरतः नातिदूरे "श्रीपेरम्बुदूर्" (भूतपुरि) इति प्रसिद्धं क्षेत्रमासीत्। एतत् क्षेत्रमधिकृत्य वेङ्कटाध्वरिः बहुधा प्राशंसत् स्वकीये विश्वगुणादर्शचम्पू प्रबन्धे। तद्यथा रामानुजदर्शने

एषा भूतपुरी निरीक्षितचरी दोषापहन्त्री मया
श्रीमानत्रगुणाब्धिराविरभवद्रामानुजार्यो मुनिः।
त्रय्यन्तामृतसिन्धुमन्थनभवद्धयङ्गवीनात्मकं
विज्ञानं यदुपज्ञमेव विदुषामद्यापि विद्योतते।।
पुण्यम्भोजविकासाय पापध्वान्तक्षयाय च।
श्रीमानाविरभूद्भूमौ रामानुजदिवाकरः।। इति।
मेषार्द्रा सम्भवं विष्णोः दर्शनस्थापनोत्सुकम्।
तुण्डीरमण्डले शेषमूर्तिं रामानुजं भजे।। इति।
कल्यब्दे दिव्यकुम्भे बहुजनविदिते वत्सरे पिङ्गळाख्ये
चैत्रे मासे गते च त्रियुतदशदिने दीप्यमाने हिमांशौ।
पञ्चम्यार्द्रासमेते सुरगुरुदिवसे कर्कटाख्ये च लग्ने
श्रीमान् रामानुजार्यस्समजनि निगमान्तार्थसंरक्षणार्थम्।।

इति सर्वैः संस्तुताः श्रीरामानुजाचार्याः आसूरिकेशवसोमयाजिमहाभागानां कलियुगे ४११९ पिङ्गळनाम संवत्सरे क्री. श. १०१७ वत्सरे आदिशेषांशत्वेन सञ्जाताः।

वेदान्तसिद्धान्तसमर्थनाय बाह्यन्तरभ्रान्तमतापुनत्यै।
शेषांशकः केशवयज्व देव्यां तेजोनिधिः कश्चिदिहाविरासीत्।।
(यतिराजवैभवम्-७)

श्रीकेशवसोमयाजिनः अस्मै शिशवे "लक्ष्मणः" इति "रामानुजः" इति दिव्यनाम्ना नामकरणमहोत्सवं कृतवन्तः। कालक्रमेण चोपनयनानन्तरं

साङ्गोपाङ्गं वेदाध्ययनं, द्रविडवेदरहस्यं चाध्यापयामासु:। अध्ययन-काले यादवप्रकाशको नाम कश्चनाद्वैती गुरुरूपेणावसत्। ते च वेदवाक्यानामभेदत्वेन, भगवत: कल्याणगुणगणानां निर्गुणत्वमिति, जगन्मिथ्यात्मकमिति बोधयन्ति स्म। तच्चोपदेशं रामानुजार्याय न रोचते स्म। वेदे च न केवलं अभेदश्रुतय: सन्ति। भेदश्रुतयो बह्व्य: सन्ति। घटकश्रुतीनां संख्यापि समीचीना दृश्यते। "तस्य यथा कप्यासं पुण्डरीकमेवाक्षिणी" इत्यादि श्रुते: यादवप्रकाशेन विपरीतार्थ: प्रतिपादित:। तत्र प्रतिपादित: कपिशब्दस्य न वानर: इति, भगवान् सूर्य एवेति। स: भगवान् ."गम्भीराम्भस्समुद्भूतसमृष्टनाळरविकरविकसित-पुण्डरीकदळायतेक्षण:" इति भगवद्रामानुजाचार्याणां अभिप्राय:। सर्वश्रुतिस्मृतिपुराणानुगुणेति सर्वै: सोऽभिप्राय: प्रशंसित:। गच्छति काले रामानुजार्या: विपरीतार्थोपदेशदेशिकं यादवप्रकाशं विहाय यामुनमुने: शिष्यतल्लजानां महापूर्णानां सविधे सम्प्रदायसिद्धं पञ्चसंस्कारमुपलभ्य गोष्ठीपूर्णश्रीशैलपूर्णादिमहाभागवतशिखामणिभ्य: अधिगतविवधशास्त्र-रहस्या: कञ्चनकालं गृहस्थाश्रमे उषित्वा वैराग्यंपूर्णा: तुर्याश्रमं स्वीचक्रु:। ततो यादवप्रकाशकाण्डूरुयज्ञमूर्त्यादीन् अद्वैतपण्डितान् वादे अवनतान् चक्रिरे। तेभ्य: आचर्यत्वं च ऊढ्वा भगवद्यामुनमुने: अन्तिमामतृप्तिं दूरीकरणाय वेदार्थानां सदर्थप्रतिपादनाय च ब्रह्मसूत्राणां बोधायनवृत्तिमनुसृत्य विशिष्टाद्वैतभाष्यं व्यरचयन्। तद्यथा-

आदौ भेदश्रुतीनामनृतविषयता लक्षणा चैक्यवाचां
दूरे तावत्प्राहणं तदुभयघटनातत्पराणां च वाचाम्।
प्रत्यक्षादिप्रमाणस्वरसगतिहतिस्ततर्कबाधश्च भूयान्
मायावादे तदेतन्निखिलमितरथा लक्ष्मणाचार्यपक्षे।।

इत्युक्तदिशा "ज्ञाऽज्ञौ द्वावजावीशनीशौ" इत्यादिषु जीवेश्वरयो: जीव: परतन्त्र: ईश्वर: स्वतन्त्रेति। "नित्यो नित्यानां चेतनश्चेतनानां एको बहूनां यो विदधाति कामान्" इत्यादिषु नित्यानामनेकानां जीवानां

श्चाद्वितीयः कश्चन परमचेतनः समस्तानभिमतान् प्रयच्छतीति भोक्ताभोग्यं प्रेरितारञ्चं मत्वा" इत्यादिषु भोक्ता जीवः, अनुभाव्यमान प्रकृतिः प्राकृतिकं वा, सर्वनियामकः परमपुरुषः पृथक् रूपेण व्यवस्थितः इति "पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनाऽमृतत्व-मेवेति" इत्यादिषु अनुभवितारं जीवं चोदयन्तं परमात्मानं पृथक् अनुसन्धाय प्रीतिं विन्दन् भेदानुसन्धात् मोक्षमुपैति इति।

"द्वौ सुपर्णौ सयुजौ सखायौ समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति।।"

इत्यादिषु जीवपरमात्मानौ पक्षिरूपिणौ भूत्वा वृक्षरूपं शरीरमाश्रयेते इति तत्र एकः जीवः कर्मफलानि भुङ्क्ते इति,

भुङ्क्ते वैषयिकं सुखमन्यः प्रचकास्त्येवानश्नन्नन्यः।
इति य तत्त्वं प्राह वदान्यः तस्मादधिकः कोऽनुवदान्यः।।
(भजयतिराजस्तोत्रम् - ३)

अन्यः पक्षी परमात्मा कर्मफलानि अनश्नन् देदीप्यमानेन चकास्तिती अनेकश्रुतिवाक्येषु जीवेश्वरयोः भेदः एव स्पष्टं प्रतिपाद्यमानेऽपि मायावादिनः अभेद एव सिद्धान्तः इति, भेदः कल्पितः इति, अतः मिथ्यात्मकमिति, तत्प्रतिपादकवेदवाक्यानि असत्यानीति च वदन्ति।

गुणगुणिनोर्भेदः किल नित्यः चिदचिद्द्वयपरभेदः सत्यः।
तद्द्वयदेहो हरिरिति तत्त्वं पश्यविशिष्टाद्वैतं तत्त्वम्।।
(भजयतिराजस्तोत्रम् - १८)

"नेह नानास्ति", "निर्गुणं निरञ्जनम्", "एकमेवाद्वितीयम्" इत्यत्र निर्गुणमेव तत्त्वमिति वदन्ति। अत्र भगवद्रामानुजाचार्याणां मतं एवं वदन्ति विख्याते विश्वगुणादर्शचम्पूप्रबन्धे-

नित्यं हेयगुणावविधूननपराः नैर्गुण्यवादाश्रुतौ
सत्यार्थास्सगुणोक्तयश्शुभगुणप्रख्यापनाद्ब्रह्मणः।
अद्वैतश्रुतयो विशिष्टविषयाः निष्कृष्टवेषाश्रया
भेदोक्तिस्तदिहाखिलश्रुतिमतं रामानुजीयं मतम्।।
(२४८ श्लो.)

इत्थं विशिष्टाद्वैतसिद्धान्तं प्रत्यपादयन्। द्विधा न भवतीति अद्वैतम्। विशिष्टस्य अद्वैतं विशिष्टाद्वैतम्। नाम समस्तचेतनाचेतनविशिष्टः ब्रह्म एक एवेति अङ्गीकृतत्वात् दर्शनस्यास्य विशिष्टाद्वैतमिति व्यवहारः। चिदचित् तत्त्वे न पारमार्थिकसत्याविति ब्रह्मैव सत्यमिति प्रतिपादितवतां मतानि निरस्य, त्रीणि तत्त्वानि पारमार्थिकसत्यानीति प्रतिपादनमेवास्य दर्शनस्य सारः। "ब्रह्म सत्यं जगन्मिथ्या" इति वदन्तः अद्वैतिनः ब्रह्म चिदचिद्विशिष्टमिति नाङ्गीकुर्वन्ति। ब्रह्मवत् जगदपि सत्यमित्यङ्गीकुर्वन्तः द्वैताः (माध्वाः) चेतनाचेतनस्य ब्रह्मणश्च रक्ष्यरक्षकभावसम्बन्धं विना ऐक्यव्यपदेशोचितसम्बन्धविशेषं न अङ्गीकुर्वन्ति। अतः तेऽपि ब्रह्मणः चिदचिद्विशिष्टैक्यं नाङ्गीकुर्वन्तीति ज्ञायते। श्रीवैष्णवदर्शने तु चेतनाचेतनात्मकं अचिदीश्वरौ च सत्यस्वभावपूर्णौ इति, तयोर्निर्वहणरूपशरीरशरीरिभावरूपसम्बन्धविशेषावङ्गीकृतत्वात् लोके च देहात्मनोः भेदः अपरिदृश्यमानोऽपि "चैत्रः कश्चित्", "चैत्रः एकः" इति व्यवहारो दृश्यते, तद्वत् चेतनाचेतनविशिष्टस्य ब्रह्मणः एकः इति व्यपदेशे परस्परस्वरूपभेदे न कापि विप्रतिपत्तिः। अमुमेवार्थं प्रतिपाद्यमानं "विशिष्टस्य अद्वैतं विशिष्टाद्वैतम्" इति व्युत्पत्तिरेव युक्तेति ग्राह्या।

तत्त्वत्रयम् -

विशिष्टाद्वैतसिद्धान्ते मुमुक्षुजनानां तत्त्वहितपुरुषार्थावगमनं प्रधानमिति ज्ञेयम्। नाथमुनिप्रभृतिपरमाचार्यैः परमादृतमिदं तत्त्वत्रयम्। श्रीविष्णुपुराणे पराशरमहर्षिणा भगवता निरूपितानि चिदचिदीश्वरतत्त्वानि, तद्भेदाः, स्वस्वभावाश्च "तत्त्वत्रयम्" नामके ग्रन्थे श्रीपिळ्ळै लोकाचार्यैः[1] महाभागवतशिखामणिभिः मणिप्रवाळशैल्या निरूपिताः। श्रीवैष्णवसम्प्रदाये निगूढरूपेण निक्षिप्ताः वेदवेदान्तविषयाः। अनेन

---

1 १३शताब्दीयाः श्रीमता वेदान्ताचार्येण समकालीनाः लोकाचार्याः इति प्रसिद्धिमुपागताः।

भागवतशिखामणिना पूर्वाचार्याणां दिव्यकरुणाकटाक्षेण अष्टादश-पुराणानि यथा संस्कृतसाहित्ये प्रसिद्धानि तद्वत् अष्टादशश्रीवैष्णव-सम्प्रदायरहस्यानि प्रकाशितानि। ते यथा-

१. मुमुक्षुप्पडि २. परन्दपडि ३. श्रियःपतिपडि
४. यादृच्छिकपडि ५. तनिद्वयम् ६. तनिचरमम्
७. तनिप्रणवम् ८. तत्त्वत्रयम् ९. तत्त्वशेखरम्
१०. सारसङ्ग्रहम् ११. संसारसाम्राज्यम्
१२. प्रमेयशेखरम् १३. प्रपन्नपरित्राणम्
१४. नवरत्नमालै १५. नवविधसम्बन्धम्
१६. श्रीवचनभूषणम् १७. अर्थपञ्चकम् १८. अर्चिरादिः

एतानि अष्टादशरहस्यानि सम्प्रदायप्रवर्तकैः आचार्यपुरुषैः कालक्षेपरूपेणाध्ययनं गुरुमुखात् क्रियन्त इति अहो ! पिळ्ळै लोकाचार्याणां महिमा। तत्र तत्त्वत्रये प्रथमं सूत्रम्- "मुमुक्षुवान चेतनुक्कु मोक्षमुण्डाम्पोदु तत्त्वत्रयज्ञानमुण्डागवेणुम्" इत्यत्र मुमुक्षूणां तत्त्वत्रयज्ञानं परमावश्यकमिति प्रतिपादितवन्तः।

तत्त्वत्रयं नाम "चित्तुम्, अचित्तुम्, ईश्वरनुम्" इति सूत्रेण निर्धारिताः।

चित्तत्त्वम् -

ज्ञानवान् जीवात्मा चेतनः इत्यभिधीयते। अस्य ज्ञानमेव गुणः भवति। अस्य धर्मभूतज्ञानमिति नाम। धर्मी जीवात्मा ज्ञानमयः एव। अतः स आत्मा धर्मिभूतज्ञानवानित्युच्यते। अयमात्मा स्वयं प्रकाशते। आत्मेतरसमस्तवस्तुविज्ञानं धर्मभूतज्ञानेन सम्भवति। स्वस्वरूपं धर्मभूतज्ञानेन ज्ञातुं शक्यते। जीवः अणुः, आनन्दस्वरूपश्च भवति। स च शरीरेन्द्रियविशिष्टः, उत्पत्तिविनाशरहितः। भगवतः सर्वदा शेषभूतः।

जीवात्मानः असंख्येयाः। एते तु बद्धाः, मुक्ताः, नित्याः इति त्रिविधा भवन्ति।

१. {बद्धरेन्गिरदु संसारिगै ४३सूत्रम्}
य: अनादि कर्मबन्धनेन संसारे परिभ्रमति सः बद्धः।
२. {मुक्तरेन्गिरदु संसारबन्धमत्तवरगळ् ४४सूत्रम्}
कर्मभूमौ सदाचारसम्बन्धात् भक्तिप्रपत्तिभ्यामनन्तरं मोक्षोपायमनुष्ठीय मोक्षमुपागताः मुक्ताः।
३. {नित्यरेन्गिरदु ओरिनाळुं संसारियाद शेषशेषाशनादिगळै}
भगवानिव कर्मसम्बन्धरहिताः मोक्षे श्रीवैकुण्ठनिकेतने श्रीमन्नारायण-स्यैवानवरतकैङ्कर्यं समर्पयन्तः तमेव हावु हावु हावु इति अनुभवन्तः अनन्तगरुड-विष्वक्सेनादयः नित्याः इति कथ्यन्ते।

अचित्तत्त्वम् -

ज्ञानशून्यं वस्तु तावदचेतनमिति कथ्यते। अचेतनेनोत्पद्यमानं फलं, ईश्वरसङ्कल्पानुगुण्येन चेतनः अनुभवत्येव। अचेतनमिदं त्रिगुणः, कालः, शुद्धसत्त्वरूपेण त्रिवधं भवति।

त्रिगुणम् -

त्रिगुणस्य मूलप्रकृतिः इति नाम। इयं च सत्त्वं रजस्तम इति त्रिविधं भवति। अतः त्रिगुणमिति कथ्यते। निरन्तरपरिणामवती चेयं प्रकृतिः। त्रिगुणेषु समानत्वोपपन्नेषु महाप्रळयो भवति। तेषु च ह्रासोन्नतिमापन्नेषु इयं प्रकृतितत्त्वबाहुळ्यं भजते। इयमेव "महत्" इति नाम्ना तत्त्वं भवति। तस्मात् महत्तत्त्वात् "अहङ्कारः" इति तत्त्वं संजायते। तच्चाहङ्कारः सात्त्विकराजसतामसभेदेन त्रिविधः भवति। तेषु सात्विकाहङ्कारात् एकादशेन्द्रियाणि जायन्ते। ते यथा पञ्च ज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनश्च । तामसाहङ्कारतन्मात्रेभ्यः पञ्चभूतोत्पत्तिकुरुते । राजसाहङ्कारपूर्वोक्ताहङ्कारयोः स्वकार्य-रचनावेलायां सहकारो भवति। अचेतनपदार्थाः सर्वेऽपि शरीरादयः पञ्चभूतमयाः एव।

काल: -

अयं विभु:। जडमयं वस्तुमयं च भवति। काले सत्त्वादिगुणा: न भवन्ति।भूतभविष्यद्वर्तमानादिव्यवहाराणामयमेव निदानभूत:। निमेषादि-युगान्तविभागा: कालसम्बन्धिन: एव। कर्मलोकेऽस्मिन् परिणामा: सर्वेऽपि (भगवत्सङ्कल्पानुगुणं) कालमहिम्ना सम्भवन्त्येव। कालपरिणामोऽयं श्रीवैकुण्ठे नास्ति। तत्र स काल: केवलं भगवत: इच्छामात्रेणैवोत्पद्यते।

शुद्धसत्त्वम् -

रजस्तमसो: सम्बन्धं विना केवलसत्त्वगुणस्यैवाधारभूतं विलक्षणं द्रव्यमिदम्। एतच्च श्रीवैकुण्ठे भवति। कदाचिदेतत् प्राकृत-लोकेऽस्मिन्नपि भगवद्विग्रहादिरूपेणावतरति। श्रीवैकुण्ठे विद्यमानानां सर्वेषां शरीराणि मण्डपगोपुरप्राकारादिसकलवस्तूनि शुद्धसत्त्व-द्रव्यमयाण्येव।

ईश्वरतत्त्वम् -

श्रीमन्नारायण:[1] एव सर्वेश्वर:। ज्ञानानन्दस्वरूप:, अविकार: शुद्ध: भवति। त्रिविधपरिच्छेदरहित:। अत्रैव देशेऽस्मिन् काले अनेन वस्तुस्वरूपेण भवतीति नियमरहित:, सर्वदेशसर्ववस्तुस्वस्वरूपो भवति। दोषरहित:। चेतनाचेतनात्मकं जगत्तस्य शरीरं भवति। सकलजगतां जन्मस्थेमभङ्गादिलील:, सर्वोत्कृष्ट:, सर्वाधर:, सर्वनियामक:, सर्वस्वामी च भवति। स्वाश्रितानां सर्वकर्माणि नाशयति।

---

[1] ईश्वरन् अखिलहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूपनाय्, ज्ञानशक्त्यादि-कल्याणगुणगणविभूषितनाय्, कालजगत्सर्गस्थितिसंहारकर्तनाय्, आर्तो जिज्ञासुरर्थार्थी एन्निर चतुर्विधपुरुषर्कळुक्कुमाश्रयणीयनाम्, धर्मार्थकाम-मोक्षाख्यचतुर्विधफलप्रदनाय् विलक्षणविग्रहयुक्तनाय्, । लक्ष्मीभूमिनीला-नायकनाय् इरुक्कुम्। (ईश्वप्रकरणे - तत्त्वत्रयम्)

सर्ववेदप्रतिपाद्यः सर्वान्तर्यामी सर्वशब्दवाच्यः सर्वकर्मसमाराध्यः सर्वफलप्रदः भवति। ब्रह्मरुद्रादयः सर्वेऽपि अस्य किङ्कराः भवन्ति। अयं स्वस्वरूपेण, गुणेन, रूपेण, विलासचेष्टया स्वेतरसमस्त-वस्तुभ्योऽपि विलक्षणः स्वभावकल्याणगुणामृतोदधिः अवाप्तसमस्तकामः भवति। श्रीमहालक्ष्मीः सर्वदा भगवन्तमेनं सहभावं भजते। भगवतः विग्रहस्तु परव्यूहविभवान्तर्याम्यर्चावताररूपेण पञ्चविधः भवति[1]। एतेषु सर्वेषु अर्चावतारः एव रुचिजनकः शुभाश्रयः अशेषलोकशरण्यः अनुभाव्यत्वेन मुमुक्षुजनानां भक्तानाञ्च भवतीति कृत्वा स एव आश्रयणीयः भवति।

हितस्वरूपः परमात्मा -

हितं नाम मोक्षार्थं साधनभूतः उपायः। स तु भक्ति-प्रपत्तिभेदेन द्विविधः। भक्तियोगस्तु नानाविधः भवति। मोक्षपर्यन्तमनुष्ठेया च भवति। अस्याः कर्मयोगज्ञानयोगात्मावलोकनानि अङ्गानि भवन्ति। एषा च चिरकालसाध्या। अस्याः अङ्गानुष्ठानञ्च कठिनं भवति। एनां चाष्टङ्गयोगमिति प्रवदन्ति।

प्रपत्तिः -

भक्तियोगानुष्ठाने सर्वधाऽशक्ताः प्रपत्तिमेव मोक्षोपायत्वेन समाश्रयन्ते। प्रपत्तिमेव भरन्यास इति शरणागतिरिति भरसमर्पणमिति नानाप्रकारेण महान्तः स्मरन्ति। उभावपि भक्तिप्रपत्ती न केवलं मोक्षपदवीं अपि तु त्रिवर्गरूपधर्मार्थकामानपि प्रदास्यतः। एषा प्रपत्तिः षडङ्गयोग इति कीर्त्यते। यथा -

१. आनुकूल्यसङ्कल्पः २. प्रातिकूल्यवर्जनम् ३. महाविश्वसः ४. गोप्तृत्ववरणम् ५. कार्पण्यरूपपञ्चाङ्गयुक्तम् ६. आत्मसमर्पणम्

---

[1] [ईश्वरस्वरूपन्दान् परत्वं व्यूहं विभवमन्तर्यामित्वमर्चावतारमेन्नुं अञ्जि प्रकारत्तोडे कूडियिरुक्कुम् तत्त्वत्रये - ईश्वरप्रकरणम्]

[अङ्गी] इत्युच्यन्ते। सकृदेव फलमुद्दिश्य अनुष्ठेया च भवति। एकस्मै फलाय बहुवारमनुष्ठानञ्च त्याज्यं भवति। प्रपत्तिकरणे जात्यादिनियमाः न भवन्ति। सकलप्राणिसुलभानुष्ठानयुक्ता च भवति। एनां च प्रपत्तिं विशिष्टाद्वैतसिद्धान्तस्थापनाचार्याः श्रीमन्तः नाथमुनि-यामुन-रामानुज-मुनिप्रभृतयः, दिव्यसूरिणः महाभागवताः अनुष्ठितवन्तः। "मुमुक्षैर्वै शरणमहं प्रपद्ये" इति वेदादिषु श्रीरामायण-भारत-भागवत-भगवद्गीतादिनिखिलशास्त्रेषु प्रपत्तिः सुलभमार्गेण उपदिष्टा। फलप्रदा च विजयते[1]।

अर्थपञ्चकतत्त्वज्ञाः पञ्चसंस्कारतत्पराः।
आकारत्रयसम्पन्नाः महाभागवताः स्मृताः।।
"वदन्ति सकला वेदाः सेतिहासपुराणकाः।
मुनयश्च महात्मानः वेदवेदार्थवेदिनः।।"

प्रपत्तिः प्रपन्नः इति शब्दौ उभावपि श्रुतिस्मृतिपुराणादिषु बहुत्र बहुवारं श्रूयन्ते। श्रुतौ - न्यास इति ब्रह्मा हि परः। परो हि ब्रह्मा तानि वा एतान्यपराणि तपांसि न्यास एवात्यरेचयत्। जितन्तास्तोत्रे २.२ -

देवानां दानवानां च सामान्यं अधिदैवतम्।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव।।

श्रीमद्रामायणे -

"लोकविक्रान्तचरणौ शरणं तेऽव्रजं विभो।" इति
स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः।
सीतामुवाचातियशाः राघवश्च महाव्रतम्।। (२-३२-२)

स्तोत्ररत्ने यामुनार्यैः-

अकिञ्चनोऽनन्यगतिश्शरण्यः त्वत्पादमूलं शरणं प्रपद्ये।" (२२) इति।

---

[1] (तत्त्वत्रयविषयाः कोळियाळम् शठकोपाचार्यैः तिरुपतिश्रीवेङ्कटेश्वरसंस्कृत-कळाशालान्ययमीमांसाध्यापकैः १९५८वर्षे प्रकाशितायाः दयाशतकस्य भूमिकातः स्वीकृताः।)

"मुमुक्षुर्वै शरणमहं प्रपद्ये"। (श्वेताश्वेतरोपनिषत् ६-१८) इति।

यजुर्वेदे-

"देवा वै त्वष्टारमजिघांसन्। सपत्नीः प्रापद्यत। तन्न प्रतिप्रायच्छन्। तस्मादपि वध्यं प्रपन्नं न प्रयच्छन्ति।" देवा वै यज्ञात् रुद्रमन्तरायन् स आदित्यानन्वाक्रमत। ते द्विदैवत्यान् प्रापद्यन्त। तान्न प्रति प्रायच्छन्। तस्मादपि वध्यं प्रपन्नं न प्रति प्रयच्छति।" इति प्रपत्तेः अमोघत्वं दर्शितम्।

मनुस्मृत्यादयश्च -

सर्वोपाधिविनिर्मुक्तं क्षेत्रज्ञं ब्रह्मणि न्यसेत्।
एतत् ज्ञानं च ज्ञेयं च शेषोऽन्यो ग्रन्थविस्तरः।।

महाभारते-

सर्वेषामपि लोकानां पिता माता च माधवः।
गच्छध्वमेन शरणं शरण्यं पुरुषर्षभाः।। इति।

विष्णुपुराणे-

विजितास्त्रिदशा दैत्यैः इन्द्राद्या शरणं ययुः।
पितामहं महाभागं हुताशनपुरोगमाः।।
यथावत् कथितो देवैः ब्रह्मा प्राह ततः सुरान्।
परावरेशं शरणं व्रजध्वमसुरार्दनम्।।
उत्पत्तिस्थितिनाशानामहेतुं हेतुमीश्वरम्।
प्रजापतिपतिं विष्णुमनन्तमपराजितम्।।
प्रधानपुंसो रजयोः कारणं कर्मभूतयोः।
प्रणतार्तिहरं विष्णुं स वः श्रेयो विधास्यति।।

भगवान् रघुनन्दनः श्रीरामायणे युद्धकाण्डे (१८-३) -

मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन।
दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम्।।

एवमेव,

श्रूयते हि कपोतेन शत्रुः शरणमागतः ।
एवं दोषो महानत्र प्रपन्नानामरक्षणे।।

अस्वर्गश्चाऽयशस्याश्च बलवीर्यविनाशनः ।
करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम्।।

इत्यादिभिः सर्वैरधिकारिभिः सर्वाभीष्टसिद्ध्यर्थं प्रपत्तिप्रतिहितसाधनेन विधीयमाना कर्तव्यतया प्रतिपाद्यते। विशेषतः भगवत्प्रपत्तिप्रतिपादकस्य श्लोकस्य प्रकरणे च

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते। (श्री.भ.गी ७-१४)
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः।। (श्री.भ.गी ४-११)
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्ता प्रसृताः पुराणी।
(श्री.भ.गी १५-४)
ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।।(श्री.भ.गी १८-८)
तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यति शाश्वतम्।।

इति अनिष्टनिवृत्त्यर्थम् इष्टप्राप्त्यर्थं च प्रपत्तिः बहुशो विहिता । अत एवास्य श्लोकस्य शरणागतिविधाने शास्त्रविरोधः अनुष्ठानविरोधः प्रकरणविरोधश्च न प्रसज्यते ।

श्रीशठारेः प्रपत्तिः-

द्रविडवाङ्मयप्रवर्तकाः दिव्यसूरयः नालायिरदिव्यप्रबन्धेषु सर्वत्र प्रपत्तेः विशिष्टस्थानं प्रतिपादितवन्तः। तत्र प्रपन्नजनकूटस्थाः श्रीशठकोपमुनयः स्वदिव्यप्रबन्धे तिरुवाय्मोजिनामके ग्रन्थे-

वीडुमिन् मुत्तुवुम् वीडुशेयदु उम्मुयिर।
वीडुडैयानिडै वीडुशेय्म्मिने।। ....
एण्पोरुकण्णलत्तु ओण्पोरुळीरिल।
वण्पुगजुं नारणन् तिण्कडले शेरे।।
(तिरुवाय्मोजि प्रथमशतके द्वितीयदशके प्रथमम्)

इत्यत्र ज्ञानानन्दरूपिणां सर्वेषां जीवात्मनां सकलकल्याणगुणविशिष्टः श्रीमन्नारायणः एक एव समाश्रयणीयः इति आश्रितरक्षकस्य तस्य चरणौ शरणं भजेति द्वयमन्त्रार्थसारमनुगृहीताः।

ओळिविल् कालमेल्लाम् उडनाय्मन्नि

....

.................एन्दतन्दतन्दक्कै।।

(तिरुवाय्मोजि तृतीयशतके ३)

इत्यादिषु श्रीवेङ्कटाचलाधीशं तेजोमयसुन्दरविग्रहं कुलक्रमागतं दैवं जगत्कारणभूतं सर्वकालसर्वावस्थासु शरणं भजामीति-

उलगमुण्डपेरुवाया उलिप्पिल् कीर्ति एम्माने

....

कुलतोल्लडियेनुनपादं कूडुमारु कूराये।।

(तिरुवाय्मोळि ६शतके १०दशकम्)

अगलकिल्लेनिरैयु मेन्नलस्कमेल्मङ्गैयुरैमास्वा
निगरिल् पुगळा युलगम्मून्नुडयायेन्नै यळ्वाने ।
निगरिलमरस्समुनिक्कणङ्गल् विरुम्बुम् तिरुवेङ्गडत्ताने
पुगलोन्निल्लावडियेन् उन्नडिकीङ्गमरुन्दु पुगुन्देने।।

इत्यादिषु बहुस्थलेषु हे श्रीनिवास! स्वाभिमतानुरूपस्वंरूपरूपगुणगणां त्वत्क्षान्तिसंवर्धिनीम् महालक्ष्मीं क्षणमपि विश्लेषितुमसहमानः स्ववक्षः-स्थलनित्यवासमुद्राङ्कितनिरुपमानवात्सल्यादिकल्याणगुणगणसमेतो सकलजगद्रक्षकः नित्यसूरिसंसेव्यः श्रीवेङ्कटाचलमहाक्षेत्रे अत्यन्त-सुलभो भूत्वा नः प्रत्यक्षतामुपगतोऽसि। अहं तु सकलोपायान् सर्वधर्मान् च परित्यज्य तव चरणौ उपायत्वेन स्वीकृत्य शरणमुपागममिति प्रपत्तिमुद्घोषितवन्तः। इमाः गाथाः वेदवेदान्तोपनिषद्रहस्यबोधकाः द्वयार्थप्रतिपादकाः सकलजीवसंरक्षणसुलभमार्गोपदेशकाः तदनन्तरदिव्य-सूरिभिः समादृताः श्लाघिताः। अत एव दिव्यसूरिणामनन्तरकाले श्रीवैष्णवसम्प्रदायप्रवर्तकाः यतिपति-यामुन-प्रभृतयः प्रपन्नजनकूटस्थमेनं

शठकोपमुनिं बहुधा प्रमाणत्वेन स्वीकृतवन्तः । यथा द्वादशसूरयः चिदचिद्विशिष्टं वेदान्तवेद्यं श्रीमन्नारायणं महालक्ष्म्याः पुरुषाकारेण शरणागतिं कृतवन्तः तद्वत् पूर्वाचार्याः अपि स्वकृतिषु द्वयार्थमेव प्रतिपादितवन्तः। यथा श्रीमन्नाथमुनयः लब्धश्रीशठारिपरमानुग्रहाः भगवतो नारायणस्याद्भुताद्भुतं विशेषजालम् अवताररहस्ययुतं परमं च तत्त्वं १.न्यायतत्त्वम् २. पुरुषनिर्णयः ३. योगरहस्यम् इति नामकेषु ग्रन्थेषु प्रत्यपादयन् । तदनु तेषां पौत्राः महाप्रभावशलिनः श्रीमन्तः यामुनदेशिकचरणाः १. सिद्धित्रयम् २. आगमप्रामाण्यम् ३. गीतार्थ-सङ्ग्रहः ४. स्तोत्ररत्नम् इत्यादिषु ग्रन्थेषु श्रीविशिष्टाद्वैततत्त्वरहस्यान् भगवतः कल्याणगुणस्थापनञ्च वेदोक्तमार्गेण द्रविडवेदानुगुणञ्च भक्तिप्रवाहैः वचोभिः स्थापयामासुः। तदनु पूर्वाचार्याणाम् अर्वाचीना-चार्याणां मकुटायमानाः श्रीमन्तः आदिशेषांशसम्भूताः भगवन्तः श्रीभाष्यकारबिरुदभाजाः भगवद्रामानुजाचार्याः श्रीवैष्णवदर्शनं श्रीविशिष्टाद्वैततत्त्वं प्राचीनकालपरम्परागतमत्युज्वलः सकलजीवसमु-द्धरणायानितरसाध्यमार्गेण स्थापयित्वा इतरमतनिरसनपूर्वकस्वमत-स्थापकाः "एम्बेरुमानार्" इति जगत्प्रसिद्धिं प्राप्तवन्तः -

अबाधितार्थैः अनपायवाचां तद्व्याससूत्रस्य यथार्थभाष्यम्।
कृत्वा यतीन्द्रो धुरि यामुनार्यमनोरथं पूरितवान् स आद्यम्।।
भट्टारकं तं च पराशराख्यं कृत्वा कृतं तेन सहस्रनाम्नाम्।
भाष्यं प्रतिष्ठाप्य च यामुनार्यमनोरथं पूरितवान् द्वितीयम्।।
पिळ्ळानभिख्यं कुरुकेश्वराख्यं कृत्वा कृतं तेन च षट्सहस्रम्।
भाष्यं प्रतिष्ठाप्य स यामुनार्यमनोरथं पूरितवान् तृतीयम्।।

इति श्रीयामुनमुनेः मनोरथान् पूरितवन्तः। समस्ते सुविशाले भारते पर्यटनाञ्च कृत्वा वेदवेदान्तन्यायव्याकरणादिशास्त्रशस्त्राः कुमतीन् नास्तिकादीन् वेदबाह्यांश्च निरस्य पाषण्डद्रुमषण्डदावदहनाः मायावादि-भुजङ्गभङ्गगरुडाः श्रीरङ्गेश्वरजयध्वजाः वेदमार्गप्रतिष्ठापकाचार्याः समभवन्। वेदस्य भेदाभेदश्रुतीनां परस्पविरोधपरिहरणे कुशलाः

जगज्जन्मादिकारणत्वे श्रीमन्नारायणमेव प्रतिपादितवन्तः। एते च श्रीभाष्यं शारीरकमीमांसायाः बोधायनवृत्त्यनुगुणं कृत्वा शारदासत्कारं "श्रीभाष्यकाराः" इति बिरुदं तयैव सरस्वत्या काश्मीरे लब्धवन्तः। तयैव लब्धश्रीहयग्रीवदिव्यार्चाविग्रहाः मतत्रयाचार्येषु महान्तं स्थानमधिजग्मुः। स्वेनैव प्रतिष्ठापितस्य विशिष्टाद्वैतमतस्य भगवता श्रीरङ्गनाथेन "एम्बेरुमानार् दर्शनम्", "रामानुजदर्शनम्" इत्यनुगृहीतवन्तः[1]। चिदचिद्विशिष्टः श्रीमन्नारायणः एक एव प्राप्यः। स तु शरणागतवत्सलः आष्टाक्षरीमन्त्राधिष्ठानः द्वयार्थप्रतिपादकः चरमश्लोकप्रदाता भगवान् दयापरिपूर्णः सायुज्यम् अनुगृण्हातीति स्थापयन्तः श्रुतिस्मृतिपुराणेतिहासपाञ्चरात्रागमादीन् प्रमाणत्वेन स्वीकृत्य -

१. श्रीभाष्यम् - [सहेतुकं पूर्वोत्तरमीमांसाशास्त्रैक्यं, कर्मविचारस्य साधनचतुष्टयपूर्वभावितानिरासपूर्वकसाधनसप्तकपूर्वभावित्वादि]

२.वेदार्थसङ्ग्रहः- [वेदान्तभागभेदाभेदघटकश्रुतिसमन्वयसगुणस्थापनम्]

३. वेदान्तसारः (वेदान्तदीपः) - [ब्रह्मसूत्राणां पूर्वपक्षसिद्धान्ताः]

४. भगवद्गीताभाष्यम् - [चिदचिद्वैलक्षण्येन भगवद्विषयभूतकर्मज्ञानप्रपत्त्यादयः प्रतिपादिताः]

५. श्रीरङ्गगद्यम् - [नम्बेरुमाल् भोग्यभोगोपकरणभोगस्थानविशेषवैलक्षण्यप्रतिपादकम्]

६. शरणागतिगद्यम्- [प्रपदनस्य सर्वप्रकारवैलक्षण्यं प्रपन्नजनवैभवञ्च]

७. श्रीवैकुण्ठगद्यम् - [नित्यविभूतौ सर्वप्रकारकैङ्कर्यं परमपदनाथस्य]

८. नित्यग्रन्थः- [भगवदाराधनविशेषप्रकारादि वैलक्षण्यम्]

इत्यादिग्रन्थाः दर्शनस्थापका तदनन्तराचार्याणां मार्गनिर्देशाः सञ्जाताः। सर्वस्य वेदजातस्य प्रकृतिः प्रणव एव। प्रणवस्य च प्रकृतिः अकारः। प्रणवविवेकः वेदः। स्वप्रकृतिभूते प्रणवे लीनः । तस्य प्रणवप्रकृतिभूतस्य अकारस्य यः परः वाच्यः स एव महेश्वरः इति सर्ववाचकजातप्रकृतिभूताकारवाच्यसर्ववाच्यजातप्रकृतिभूतनारायणो यः सः महेश्वरः

---

[1] एन्नुवड्डुगनन्बु यतिराजविभववत्तिल् अरुळिच्चैदार् गुरुपरम्पराप्रभावे (७८पुटं)

इत्यर्थेति ... मनोहररूपेण कस्यापि अविरोधेन स्वग्रन्थेषु श्रीमन्नारायण-पारम्यं स्थापितवन्तः जीवाः शेषभूताः दासाश्च इति च कृत्वा तस्य शरणागतिः सर्वात्मना कर्तव्येति च प्रत्यपादयन्। भगवद्रामानुजा-चार्याणामनन्तरं प्रसिद्धाः अनेके आचार्याः रामानुजदिव्याज्ञारूपेण ग्रन्थान् विरच्य लोके श्रीविशिष्टाद्वैतसिद्धान्तं स्थापयामासुः। तत्र श्रीमन्तः कूरेशमिश्राः मुख्याः, वेदान्तदेशिकाः श्रीवेङ्कटेश्वरस्य घण्टावताराः श्रीरामानुजाभाष्यादीनां विवरणं शताधिकग्रन्थनिर्माणं च रामानुजा-चार्याणां सिद्धान्तानुसारं कृतवन्तः। तेषु दयाशतकं, पादुकासहस्रंञ्च शरणागतिवैभवं प्रपत्तिवैभवञ्च प्रकाशयतः उत्तमां कोटिमापतुः।

श्रीवैष्णवस्तोत्राणि -

कुलशेखरसूरिणां मुकुन्दमाला दास्य भक्तिं ज्ञापयामास। यामुनाचार्याणां स्तोत्ररत्नं प्रपन्नस्यार्तिं विज्ञापयति। कूरेशानां पञ्चस्तवाः अर्थपञ्चकज्ञानं प्रदास्यन्ति। यामुनार्याणां चतुश्श्लोकी महालक्ष्म्याः पुरुषकारं भगवद्वर्णनं शरणागतिवरणञ्च ज्ञापयति। वेदान्ताचार्याणां क्षमाशोडशी भगवतः क्षान्तिगुणं प्रकाशयति। काञ्चीपूर्णानां देवराजाष्टकं नैच्यानुसन्धानमुद्घोषयति। प्रतिवादिभयङ्करअण्णन् कृतयः श्रीवेङ्कटेश्वसुप्रभातस्तोत्रं प्रपत्तिमङ्गळाशासनादयः भगवद्-भागवतकृत्यान् आत्मस्वरूपविषयान् विशदीकुर्वन्ति। इत्थं श्रीवैष्णव-स्तोत्राणि न केवलं विष्णोः स्तुतिपराणि परन्तु वेदवेदान्तो-पनिषद्वाक्यदिव्यार्थप्रकाशकानि, शरणागतिमन्त्रसाराणि, अर्चावैभव-प्रकाशकानि पुरुषार्थपराणि नामसंकीर्तनपराणि च भूत्वा कलियुगे दिव्यसूरिणां अभिमतानुसारेण सकलमानवकल्याणभाजनानि भवन्ति।

श्रीरङ्गराजस्तवः -

एवं प्रकारेण श्रीपराशरभट्टार्यैः विरचितस्य श्रीरङ्गराज-स्तवस्य श्रीवैष्णवलोके साहित्ये सिद्धान्ते महद्विशिष्टं स्थानं राराजते। पूर्वोक्तश्रीवैष्णवस्तोत्राणां सारांशत्वेन विशिष्टाद्वैततत्त्वस्थापनाय कुमत-

निरसनाय प्रपत्त्युपायदर्शनाय च स्तवोऽयं श्रीपराशरभट्टार्यैः श्रीरङ्ग-राजस्तवः शतकद्वयभूयिष्टः समारब्धः द्वयमन्त्रस्य पूर्वखण्डोत्तर-खण्डार्थप्रतिपादकः प्रपन्नजनेभ्यः परमादरणीयः समस्तदर्शनाचार्यैः स्वस्वग्रन्थरचनाकाले विशेषरूपेण उदाहृतश्च। श्रीरङ्गराज-स्तवप्रणेतारश्च एते श्रीरङ्गेशपुरोहिताः प्रमाणनखनिर्भिन्नवादिमत्तेभ-मस्तकाः श्रीमन्नारायणपारम्यं भगवद्रामानुजसिद्धान्तानुगुणं गर्जयन्ति स्म। वेदान्तकेसरिणः रससिद्धाः दिव्यात्मानः एते श्रीरङ्गनाथस्य भोग्यभूताः नितरां जयन्ति। अत एवास्य स्तवस्य समीक्षात्मकमध्ययनं समञ्जसम

❖ ❖ ❖

चतुर्थः प्राकारः

श्रीमते रामानुजाय नमः ।

।। चतुर्थः प्राकारः ।।

विमानं प्रणवाकारं वेदाश्शृङ्गं चतुष्टयम्।
स वासुदेवो भगवान् प्रणवार्थप्रदायकः।।
कावेरी विरजा सेयं वैकुण्ठं रङ्गमन्दिरम्।
स वासुदेवो रङ्गेशः प्रत्यक्षं परमं पदम्।।
श्रीवेङ्कटाचलाधीशं श्रियाध्यसितवक्षसम्।
श्रितचेतनमन्दारं श्रीनिवासमहं भजे।।

श्रीरङ्गक्षेत्रम् -

श्रीपराशरभट्टार्याः श्रीरङ्गक्षेत्रवासरसिकाश्च।

१. पुराणविषयाः।

२. दिव्यसूरिणाम् अनुभूतयः।

३. चारित्रकविषयाः।

४. श्रीपराशरार्यप्रवेशः।

अत्र भूमण्डले श्रियःपतिः परमकारुणिको भूत्वा अर्चावताररूपेणास्माकं नयनयोः विषयतांगतः इतीदं महच्चित्रम्। अर्चावतारेषु श्रीरङ्गनाथस्य दिव्यमङ्गळविग्रहः प्रथम इति सकलकल्याणगुणालङ्कृत इति साक्षात् क्षीरार्णवनिकेतनसदृश इति परमपदनाथ इति वदन्ति, यथा श्रीमति वैकुण्ठे विरजानद्या समेतः श्रीभूनीळादिदिव्यमहिषीभिः संसेव्यमानदिव्यपादारविन्दः वेदघोषैः स्तूयमानः सप्तावरणात्मके महति दिव्यायतने शुकपिकालापमञ्जुल-ध्वनिभूयिष्ठदिव्यमन्दारवनान्ते अनन्तशयने धृतदिव्यपञ्चायुधः अवाङ्मनसगोचरः नयनगोचरो भवति, तद्वत् मांसचक्षुषां जननमरण-संसृतिचक्रबंभ्रम्यमाणानामपि बद्धानाम् अत्रैव भूलोके पूर्वोक्तसमस्त-

लक्षणैः अनादिकालात् कृपावशात् कल्पितसन्निधिः स्वयं व्यक्ते श्रीरङ्गमहाक्षेत्रे षाड्गुण्यैश्वर्ययुक्तः आश्रितसौकर्यापादकगुणैः साक्षात् करोति।

श्रीपतिं पद्मजाराध्यं इक्ष्वाकुकुलदैवतम्।
पूर्वदेशिकनिक्षेपं वन्दे श्रीरङ्गनायकम्।।
कावेरी विरजा सेयं वैकुण्ठं रङ्गमन्दिरम्।
स वासुदेवो रङ्गेशः प्रत्यक्षं परमं पदम्।।

इति प्रत्यक्षपरमपदत्वेन सर्वैः महानुभावैः परिकीर्तितः श्रीरङ्गं नाम दिव्यदेशः। श्रियः जगज्जनन्याः रङ्गस्थलमिति केचन परिकीर्तिताः भगवतः दिव्यवक्षः एव श्रियः रङ्गस्थलं भवतीति। अत एव भगवान् श्रीरङ्गनायकः इति, तस्य स्थानमेव श्रीरङ्गमिति च भावयन्ति। श्रीरङ्गनाथस्य प्रथमार्चकः साक्षात् पद्मजः चतुर्मुखब्रह्मैव। तदनु देवार्चनां स्वीकृत्य स्वयंव्यक्तो भूत्वा स्वाज्ञयैव इक्ष्वाकोः श्रीरङ्ग-विमानप्रदानञ्च कल्पितवान्। तदनु कालक्रमागतार्चामूर्तिणं दाशरथ-नन्दनः श्रीरघुनन्दनः स्वयमर्चयित्वा स्वपट्टाभिषेकवेलायां दशाननानु-जाय महाभागवताय प्रेम्णा स्वाराध्यमिमं श्रीरङ्गनायकमर्चा-मूर्तिणमनुजग्राह। तेन च कावेर्याः नदीतीरे प्रतिष्ठापितः। स चाधुना नः चक्षुषोः साक्षात्क्रियत इति सम्प्रदायः। श्रीवैष्णवदिव्यदेशेषु श्रीरङ्गमेव प्रथमं स्थानं भजते। श्रीवैष्णवसिद्धान्तस्य विशिष्टाद्वैतस्य च प्रधानं स्थानं च इदं श्रीरङ्गक्षेत्रमेव। भगवद्रामानुजाचार्याणां श्रीरङ्गनाथ-स्वामिना अविनाभावसम्बन्धः अपूर्व एव। सर्वेऽपि द्वादशसङ्ख्याकाः दिव्यसूरयः स्वनालायिरदिव्यप्रबन्धे भगवन्तं श्रीरङ्गनाथममन्दा-नन्दसन्दोहं वारं वारं कीर्तितवन्तः। श्रीवैष्णवाचार्याणां सर्वेषामपि प्राप्यं स्थानमिदमेव। अस्य महामहिमभूयिष्ठस्य क्षेत्रस्याधिनायकः रङ्गनायकः श्रीमन्नारायण एव। देवदेवी रङ्गनायकीति च कीर्त्यते। "प्रत्यक्षं परमं पदम्" इति बहुधा श्लाघ्यते। श्रीवैकुण्ठस्य बदरिकाश्रमः उत्तमद्वारमिति, श्रीरङ्गं च दक्षिणद्वारमिति साम्प्रदायिनां वचनम्। विशिष्टाद्वैतस्य प्रधानकेन्द्रत्वेन पूर्वाचार्यैः संस्तुतमिदं श्रीरङ्गक्षेत्रम् । अस्मिन्

चतुर्थप्राकारे क्षेत्रविशेषाः चारित्रकप्रमाणैश्च पश्यामः। इदं च क्षेत्रमधुना Tamil Nadu प्रान्ते तिरुचिनापल्लितः नातिदूरे विराजते।

पुराणेषु श्रीरङ्गमहाक्षेत्रम् -

सृष्ट्यादौ सचराचरं जगदिदं ब्रह्मादिदेवव्रजान्
इन्द्राद्यैः परिपालयन् दिगधिपैः क्षीरार्णवाभ्यन्तरे।
निद्रां योगमयीं श्रिया सह मुदा संभाव्य शेषे सदा
श्रीमत्पश्चिमरङ्गनाथ भगवंस्ते सुप्रभातं प्रभो।।

[श्रीमत्पश्चिमरङ्गनाथस्तोत्रम्-२]

आदौ पद्मभुवार्चितोऽसि परमे सत्याख्यलोके भवान्
कावेर्या कपिलेन चासि तपसा लब्धार्चितश्चातले।
प्रादुर्भूत इहार्चितेऽथ भुवि श्रीगौतमेनार्चितः
श्रीमत्पश्चिमरङ्गनाथ भगवंस्ते सुप्रभातं प्रभो।। (३)

श्रीरङ्गनाथदेवस्य विषये प्राचीनाचार्यैः सुप्रभातमिदं विरचितम् । कोऽयमाचार्यः इति न जानीमः, किन्तु श्रीमद्भिः प्रतिवादिभयङ्कर-अण्णङ्गराचार्यैः प्रकाशिते स्तोत्रार्णवे श्रीमत्पश्चिमरङ्गनाथसुप्रभाते इमौ श्लोकौ चकासतः श्रीरङ्गस्य पुराणकथां सूचयतः स्तः। भगवान् श्रियःपतिः श्रीवैकुण्ठे योगनिद्राम् अनुभवतीति, तस्याज्ञया इन्द्रादयः परिपालनं कुर्वन्तीति ज्ञायते। पुरा सत्यलोके ब्रह्मणा अर्चितः कावेर्या कपिलमहर्षिणाऽतले समर्चित इति स एव गौतममहर्षिणाऽत्र लोके समर्चितः भुवि प्रादुरभूदिति च श्लोकसारांशेन ज्ञायते। श्रीपराशर-भट्टार्येभ्यः अपि प्राचीनाः श्रीरङ्गनाथं कथमनुभूतवन्तः, कथं वा स्वप्रबन्धेषु कीर्तितवन्तः इति विचारणीयो भवति। पूर्वाचार्याणां प्रबन्धाध्ययनद्वारैव पराशरभट्टार्याः श्रीरङ्गनाथे बद्धादरा भूत्वा "श्रीरङ्गराजस्तवम्' इत्यद्भुताद्भुतं ग्रन्थं विरचितवन्तः। अतः उभयवेदान्तिनां श्रीरङ्गानुभवः भूमिकारूपः भवत्येव।

दिव्यसूरिचरिते श्रीरङ्गनाथवैभवम् -

अथ श्रीदिव्यसूरिचरिताख्ये प्राचीने प्रामाणिके ग्रन्थे दशमसर्गे श्रीविष्णुचित्तदिव्यसूरिभिः स्वतनयायै गोदादेव्यै श्रीरङ्गनाथक्षेत्रमहिमा एवमुक्तम् । तद्यथा -

श्रूयतामादितो वक्ष्ये त्वया दत्तावधानया।
दयाकरस्य चरितं देवदेवस्य रङ्गिणः।। १४ ।।
तत्तादृशेन तपसा सन्तुष्ठः परमेष्ठिनः।
उदगादुदरात्सिन्धोः उरगेन्द्रशयस्स्वयम्।। १५ ।।
चतुर्वेदमयोत्तुङ्गशृङ्गशृङ्गारिणा हरिः।
रङ्गसञ्ज्ञविमानेन सङ्गतः प्रणवात्मना।। १६ ।।
समस्तोपनिषत्कन्धं संभूतं क्षीरसागरात्।
प्रीतस्तमर्चयामास सत्यलोके सरोजभूः।। १७ ।।
सत्रमारभत ब्रह्मा तत्र तत्प्रीतिकारणम्।
तदर्थमाययुस्सर्वे सुरासुरनरर्षयः।। १८ ।।
ईश्वरस्सूर्यवंशानामिक्ष्वाकुर्मनुनन्दनः।
इष्टिं पैतामहीं प्रापदिन्धानगुणविक्रमः।। १९ ।।
तत्र संसेव्य रङ्गेशं भगवन्तं परात्परम्।
इक्ष्वाकुस्तपसा कर्तुमियेष कुलदैवतम्।। २० ।।
विताने विरते सम्यग्विरिञ्चेन विसर्जितः ।
अयोध्यां रङ्गनिलयं ययौ ध्यायन् धरापतिः ।। २१ ।।
अवाप्तकामस्तं देवमरविन्दासनादसौ।
तत्प्रसादफलाकाङ्क्षी तपस्तेपे सुदुश्चरम्।। २२ ।।
तत्तपःप्रभावेन तं लब्ध्वा कुलदैवतम्।
ईशं रङ्गपतिं साक्षादिक्ष्वाकुस्सममोदत ।। २३ ।।
इक्ष्वाकुप्रमुखैर्भूपैरिनवंश्यैः परः पुमान्।
पङ्क्तिस्यन्दनपर्यन्तैरयोध्यायामपूज्यत।। २४ ।।
रामेण स्वस्वरूपेण रावणप्राणहारिणा।
विभीषणाय यद्रङ्गं प्रादायि सह लङ्कया।। २५ ।।

सैकते सह्यकन्यायाः चन्द्रपुष्करिणीतटे।
मध्ये पद्धतितन्यस्तं रक्षसा नियमेषिणा।। २६ ।।
निर्वृत्तनियमे तस्मिन् तत्समुद्धर्तुमक्षमे।
विषण्णे व्योमनीयं वागशरीरिण्यजृम्भत २७ ।।
मद्विमानापरिस्पन्दात् मा विषीद विभीषण।
ममैषा सह्यजामध्यमहीह्वद्या महीयसी।। २८ ।।
तपस्यां सफलीकर्तुमाद्रिये धर्मवर्णिनः।
नवतीर्थनिविष्टानामृषीणामपि तादृशीम्।। २९ ।।
एतस्मिन् पुलिनाभोगे भोगे गन्धवहान्धसः।
समीक्ष्य तावकीं लङ्कां शयेयं योगमुद्रया।। ३० ।।
इति प्रस्थाप्य तं लङ्कां भक्तिप्रह्वं विभीषणम्।
प्राशस्त्यद्यापि रङ्गेशो भुवनानि चतुर्दश।। ३१ ।।
चन्द्रपुष्करिणीतीरे चञ्चत्पुन्नागभूषिते।
रङ्गधाम्नि वसन्विष्णुः सप्तावरणभूषिते।। ३२ ।।
कन्यां चोलेन्द्रसिंहस्य कमलां भूविहारिणीम्।
उपयेमे स रङ्गेन्दुः निचुळापुरवल्लरीम्।। ३३ ।।
तत्परिग्रहतः प्राप भगवान् रङ्गनायकः।
जगद्विमोहनो नाम्ना सौम्यजामातृनाथताम्।। ३४ ।।
अष्टोत्तरशते धाम्नां विष्णो रङ्गं विशिष्यते।[1]

तत्र ब्रह्माण्डपुराणे श्रीरङ्गमहाक्षेत्रमुद्दिश्य अनेके विषयाः व्यक्तीकृताः। ब्रह्माण्डपुराणस्यानुवादः आन्ध्रभाषायां वङ्गीपुरं रामकृष्णमाचार्याः (१८७३ संवत्सरे) मनोहररूपेण अकुर्वन् । ते च स्वग्रन्थस्य श्रीरङ्गमहात्म्यमिति पवित्रं नाम निक्षिपुः। अयं ग्रन्थः पञ्चभिराश्वासैः शोभते स्म। श्रीरङ्गनाथस्य श्रीरङ्गक्षेत्रस्य अनेके विषयाः

---

[1] एते चिन्हिताः श्लोकाः श्रीदिव्यसूरिचरितप्रबन्धात् दशमसर्गातः स्वीकृताः ।
--श्रीदिव्यसूरिचरितम्।

पुराणोक्तदिशा पञ्चसु विभागेषु विरचिताः। तथा च प्रथमाश्वासे भूमिकामेवं स्थापितवन्तः।

అల బ్రహ్మాండపురాణమౌళిని దశాధ్యాయాధికోపేతమై
కలహాన్న ప్రమథాదినాథబలయుక్ ప్రశ్నోత్తరంబై సుధా
ప్రలగద్వ్యాసవచో ప్రమేయమగు శ్రీరంగప్రభావంబు మ
త్కులజాభీష్టవిధాయకంబుగను దెన్గుంజేయుమార్యోత్తమా ||[1]

(శ్రీరంగమాహాత్మ్యమ్ - ప్రథమశతకమ్)

स्वयं श्रीनिवासः श्रीरामकृष्णमाचार्याणां स्वप्ने प्रादुर्भूय श्रीरङ्गमहात्म्यं भणेति समाज्ञापयामास। तदनु स्वगुरोः वेनिचर्ल सुब्बरायमहाकवेः अङ्गीकरणे च ब्रह्माण्डपुराणस्यांशत्वेन विराजमानस्याय श्रीरङ्ग-महाक्षेत्रस्य माहात्म्यं प्रणीतवन्तः। अथ सकलेतिहासप्रसङ्गेषु भगवान् सूतः नैमिशारण्ये शौनकादिमुनीनुद्दिश्य श्रीरङ्गमहिमानं ब्रह्माण्ड-पुराणाध्यायेषु विवृणोति स्म। लोकहितैषी भगवान् नारदः कैलासाचले महादेवं श्रीरङ्गक्षेत्रप्रभावं प्रतिशुश्रूषुः प्रार्थयति स्म। तदा परमेश्वरः प्रसन्नो भूत्वा नारदाय श्रीरङ्गस्य गोप्यविषयान् प्रकाशयामास। बहुरमणीयमिदं श्रीरङ्गक्षेत्रमिति वर्णयन् - ।

శ్రీమహనీయమై శుభవిశేషములంగనుపట్టు రంగరాట్-
సీమకు నొక్కసారి చను శిష్టునికంతకదర్శనంబు
నానామృగకీటకాదిజననం బవివేకము నారకంబునే
బాములు లేవు గాన గుణపాత్రుడు రంగము గాంచకుండునే || 7 ||[2]

---

[1] "अल ब्रह्माण्डपुराणमौळिनि दशाध्यायाधिकोपेतमै
कलहान्नप्रमथादि नाथबलयुक् प्रश्नोत्तरम्बौ सुधा
प्रलगत्व्यासवचोप्रमेयमगु श्रीरङ्गप्रभावम्बु म
त्कुलजाभीष्टविधायकम्बुगनु देन्गुं जेयुमार्योत्तमा।।"

[2] श्रीमहनीयमै शुभविशेषमुलंगनुपट्टुरङ्गराट्-
सीमकु नोक्कसारि चनु शिष्टुनि कंतकदर्शनंबु।
नानामृगकीटकादिजननं बविवेकमु नारकंबुने
बामुलुलेवु गानकपात्रुडु रंगमु गांचकुण्डुने।।

यः श्रीरङ्गयात्रां एकवारं करोति सः कदापि नानायोनिषु जनिं, नरकं, पापं वा न गच्छेदिति व्याहरति।

అనృతములాడినప్పుడుదురాత్ములనంటినచోట జారి ప్రమ
గ్గినతరిం దుమ్ము కాలమునంగెవల దుర్జనవాక్ప్రసంగము -
బ్బిన సమయంబులందుమియువేళల రంగము రంగమంచు
బల్కిన జనుడాత్మపాపమవలీలంగ ద్రోచి లభించు మోక్షమున్ ॥ 8 ॥[1]

अनृतसमये वा, दुर्जनसमूहे वा, पतनावस्थायां वा, अपवित्रसमयेषु वा, रङ्ग रङ्ग इति यः स्मरति पापभाक् न भवति प्रत्युत मोक्षमाप्नुयादिति।

ఏకరాత్రి రంగవాసము ప్రకటితముగ జేయు బహుతరపాప।
ప్రకారంబు జేసెనేనియు సుకరంబుగ ముక్తినొందు సుమ్ము మునీశ ॥[2]

एकस्मिन् दिने निशाकाले रङ्गमाधिशेते सः अवश्यं मुक्तिं विन्दति इति प्रकटयति। द्वितीयाश्वासे तदनु नारदः श्रीरङ्गनाथविषये ब्रह्मणा कृतां सपर्यां प्रति पृच्छति सति भगवान् सदाशिवः कल्पान्तलक्षणानि पितामहोत्पत्तिं नारायणस्य हंसावतारवृत्तान्तं चतुर्मुखस्य ब्रह्मणः क इति नामकरणं तस्मै स्वनाम हरिरिति विवरणं ब्रह्मणः प्रश्नानुगुणं तस्मै प्रणवोपदेशः हरिशब्दपूर्वः प्रणवः वक्तव्यः इति, एवमेव कमलासनतपश्चर्याविशेषः वेदापहारः हयग्रीवावतारेण मधुकैटभसंहारवृत्तान्तः, भगवतः कूर्मावतारवृत्तान्तः, ब्रह्मणः तपः प्रकारः, तदनु श्रीरङ्गविमानाविर्भावः श्रीरङ्गराट्सन्दर्शनेन पुलकिततनुः पितामहः दिव्यस्तोत्रसंकीर्तनं, तस्मै नारायणानुग्रश्च बहु विपुलं जगाद।

ఓ చతురాస్య నీసలువునుగ్ర తపంబునకున్ ఫలంబుగా

---

1 अनृतमुलाडिनप्पुड्डु दुरात्मुलनंटिन चोट जारि म्र
ग्गिमतरिदुम्मु कालमुनंगेवल दुर्जनवाक्प्रसंगम।
ब्बिनसमयंबुलन्दुमियुवेरुल रंगमुरंगमंचु ब
ल्किन जनुडात्म पापमवलीलगंद्रोचि लभिंचु मोक्षमुन्॥

2 एकरात्रि रंगवासमु प्रकटितमुगजेयु बहुतरपाप।
प्रकारंबु जेसेनेनियु सुकरंबुग मुक्तिनोंदु सुम्मु मुनीश॥

గోచరమయ్యె వేదములకుం బ్రథమంబయి యక్షరత్రయీ ।
సూచకమై ప్రకాశలెడు శుద్ధతమప్రణవంబు రంగసం
జ్ఞాచిరగేహరూపముగ సంతసమొప్పగ దీని జూడుమీ ॥ 10 ॥[1]

तृतीयाश्वासे तु परमशिवः भगवतः नारायणस्य निर्हेतुककृपाप्रकारं, अन्तर्यामिवैभवं, त्रिधामशब्दनिर्वचनम्, अर्चाविग्रहसर्वव्यापकत्वं, पर-व्यूहविभवादितारतम्यम्, अर्चाविग्रहनिन्दकस्य नरकप्राप्तिम्, अर्चाविग्रहार्चनरताय मोक्षप्राप्तिः, स्वयंव्यक्तस्थलनिर्णयम्,-

रंगक्षेत्रमु वेंकटाचलमुसालग्राममुन् नैमिशो
त्तुंगारण्यमु पुष्कराख्यतलमुन् तोताद्रि श्रीमुष्णमुन्।
रंगद्दिव्यमहाप्रभाव बदरी नारायणस्थानमु
वंगीकारमुगागनेन्मिदि स्वयंव्यक्तस्थलंबुल् भुविन्।।

इत्यर्चाविग्रहविरहितग्रामनिराकरणं पाञ्चरात्रशास्त्रनिर्णयं, द्वादशाक्षर-मन्त्रप्रभावं, भागवतदूषकदीक्षाविधानम्, अर्चाविग्रहपूजाविधानं, द्वादशाक्षरमन्त्रोपदेशं च उपावर्णयन्। पितामहः कदाचित् विमानवरेण्यं स्वीकृत्य सत्यलोकं समागतवानिति, तदनु विश्वकर्मणायुतः, तुलामासि कृष्णपक्षे तृतीये वासरे रोहिणि अनुरक्ते शशाङ्के विरजानद्याः तीरे शास्त्रानुगुणं सत्यलोके प्रतिष्ठापयामास। श्रीपाञ्चरात्रागमानुगुणसपर्यां च कुरुते स्म। गच्छति काले मधुजिन्नक्षेत्रे उत्सवविशेषं कुर्वता ब्रह्मणा अवबृथस्नानं च परमानन्देन निर्वर्तितमासीत् । तस्मात् एवमेव सप्तर्षयः नवब्रह्माणः सूर्यः पूजां कुर्वन्ति स्म। कदाचित् श्रीनाथः दयया सूर्याय पाञ्चरात्रानुष्ठानमुपदिदेश। तदनुसारं भुजगेन्द्रशयानं पूजयन् कमलबान्धवः स्वसुताय मनवे सर्वमुपादिशत्। ततः मनुः इक्ष्वाकवे समर्पितवान्।

---

[1] ओचतुरास्य नीसलुपुनुग्र तपंबुनकुन् फलंबुगा
गोचरमय्ये वेदमुलकुंब्रथमंबैयि यक्षरत्रयी।
सूचकमै प्रकाशिलेडु शुद्धतम प्रणवंबु रंगसं-
ज्ञाचिर गेहरूपमुग संतसमोप्पग दीनि जूडुमी।।

इक्ष्वाकुवल्लभुंडिदिशरमणाङ्घ्रिपंकजध्यानसंपन्नुडगुचु
नधिकतपंबुचे नजुकुरंगटनन्नरंगबयोध्यकु ब्रतिनदेच्चे।
नदि यादिगा गददन्वयसंभवुल् पूजचेसिरि रामभूवरुंडु
स्वप्रियुंडगु विभीषणुनकु रंगनिकाय्यं बोसंगन घनुंडु.दानि ।।

फाल्गुणमंबनु नेलशुक्लपक्षमंदुसप्तमिनि शानिदिनमुनं चन्द्रगुरुलु
रोहिणीरेवतुलनण्टु रोजुननडि पगटनभिजित्तुनन् सह्यभवनुनिल्पे।।

वचनं - इट्लु विभीषणुंडु पितामहघोरतपोलब्धंबुनु प्रथमस्वयंव्यक्तबुनु निक्ष्वाकुराजमहाप्रयत्न वसुंधरानीतंबुनुसूर्यवंशराजपरंपरामूल्यधनंबुनु श्रीराम-निरवधिककृपात्तंबुनुनगु श्रीरंगनगरदिव्यविमानंबु कावेरीतीरंबुन संस्थापिंचु टंजेसि तदारंभंबुगा रंगनायकुंडु कल्पांतस्थायियै मानवपूजनंगीकरिंचुचुनिप्टिकि नच्चट परिदृश्यमानुंडैयुंडु नाकमुनि चूडामणी।।

इति नारदाय श्रीरङ्गविमानस्य भूलोकावतरणवृत्तान्तः सविस्तरं जगादेति सूतः शौनकादिभ्यो विवृतवान्। स एव. श्रीमन्नारायणः कावेरीतीरे इदानीं नयनगोचरः दयानिधिः श्रीरङ्गविमाने चकास्तीति अहो भाग्यमहोभाग्यम्। अत एव श्रीरङ्गनाथः रामप्रियः इति कीर्त्यते।

श्रीरङ्गमाहात्म्ये चतुर्थाश्वासान्ते

फाल्गुणाह्वयमगुनेल पांडुपक्षमंदु रोहिणीनक्षत्रमंदु
मंदवारगुरुलग्नवेळ कावेरीचेन्त रंगमुन्निल्पे विश्रवो ब्रह्मसुतुंडु।।

भुवि राजुलकग्रजुलकु दिवि वेल्पुलकुरुविभूति दिवुदटकुन् जो
ळ वसुंधरेशुलकु वैभव मिडुटकु रंगमेनसेंबदु कावेरिन्।

एवंरीत्या भूमण्डले श्रीरङ्गक्षेत्रावतरणमुपवर्णितम्। देवान् मानवान् च कटाक्षयितुं चोळवंशराजान् पावनाय चात्र कावेरी तीरेऽधिशयानः अस्ति। श्रीरङ्गनाथस्याज्ञया चतुर्मुखः इक्ष्वाकवे श्रीरङ्गविमानं प्रादात्। कालक्रमेण राजा दशरथोऽपि अश्वमेधयागादीनकरोत्। तदनु धर्मवर्मनामा कश्चन महीपालः श्रीरङ्गविमानाय कृतोद्योगः सफलोऽभवत् । तस्मै राज्ञे विभीषणेन रङ्गप्रदानं कृतम्। तदेव कावेरीमध्ये संस्थापितमित्येतावत्पर्यन्तम् उपवर्णितम्। पञ्चमाश्वासे तु श्रीरङ्गविमानस्थापनेन विभीषणः रिक्तहस्तः लङ्कां गच्छन् महतीं बाधामनुबभूव। श्रीरङ्गनाथः तमाश्वसिति स्म। विभीषणः लङ्कां प्रयाति। धर्मवर्मा नित्यं भगवते परिचर्यां च करोति स्म। रङ्गस्थलप्रभावनिर्वचनं चन्द्रपुष्करिण्यादिनवतीर्थस्नानविधिः तत्फलं च कथयन् सदाशिवः -

अशेषजगदाधार शङ्खचर्कगदाधर।
अनुज्ञां देहि मे देव युष्मत्तीर्थनिषेविणे ।।

इति मन्त्रेण मूलमन्त्रेणाथ वा पुरुषसूक्तेन च स्नानादिकं कर्तव्यमिति कृष्णद्वैपायनाय महर्षये भगवते चन्द्राय सैन्यनाथाय विष्वक्सेनाय च तर्पयित्वा तदैव महर्षिजनान् च नत्वा श्रीरङ्गशायिनं पूजयन्तु इति। श्रीरङ्गमाहात्म्यपठनपाठनश्रवणेन सकलश्रेयांसि भवन्तीति

एतद्रङ्गपुरी महामहिम मेंते मन्मनीषालस
द्रीतिन् देल्पितिनीकु दीनि विनवर्णिचंग नेव्वारिकिं ।
जेतश्शक्तिघटिल्लकुंडुनिदि वासिंगांचुगल्पांतवि
द्योतंबैतमिविंटिवे श्रवणकण्डूतुल् तोलंगन् मुनी ।।

श्रीरङ्गमाहात्म्यपठनेन महाफलं लभत इति निरूपयति ।

इलने नव्वडेनि ई रंगमहिमंबु
व्रासि वैष्णवुलकु श्रद्धनिच्चि
नतडु सर्वकामवितरणक्षमुडगुचु
हरिकपारहर्ष भरमुचेयु।।
एवडनिशमु प्रतिपर्वं

बविरळमुग दीनि जदुवुनापुण्युंडे
डव परियज्ञमोनर्चिन
दविलेडु फलमोन्दु नवितथमुग मुनीशा।।

श्रीरङ्गमाहात्म्यलेखनेन च श्रीहरेः कटाक्षैकलक्ष्यो भवतीति-

मगळकरमगुनत
द्रंगस्थलवैभवंबु व्रासिनविन मौ
ळिंगोनिन वंचिंचिननु
त्तुंगशुशाशुभमुलूड्चिदोरयु हरिदरिन्।।

पुण्यपापे विधूय श्रीमन्नारायणसायुज्यभाग्भवतीति श्रीरङ्गक्षेत्रप्रभाव-पठनश्रवणलेखनादिकर्मकुर्वतां महाभागवतानां धनकनकवस्तुवाहनादि-सम्पत् सिद्ध्यतीति, मङ्गळमाशंसयन् भगवान् शम्भुः इति नारदाय सुबोधितां कथां सूतमहर्षिः शौनकादिभ्यः विज्ञापयामास।

स्कन्दपुराणोक्तदिशा श्रीरङ्गमहिमा -

श्रीरङ्गमहाक्षेत्रविषये पुराणानि सर्वाण्यपि तत्तत्सन्दर्भेषु बहुधा प्रशंसितानि। सात्त्विकराजसतामसपुराणेष्वपि श्रीरङ्गप्रशंसा दृश्यते। स्कन्धपुराणान्तर्गतसनत्कुमारसंहितापरिगणितश्रीकार्तीकमाहात्म्यखण्डे षष्ठेऽध्याये (वशिष्ठः जनकाय एवं उपदिशति - कार्तिके मासे दीपादानं करणीयमिति दीपमाहात्म्यकथाप्रसङ्गे)

यः कार्तीकमासे राजन् स्नानं पञ्चामृतेन च।
कस्तूरीगन्धतोयेन विष्णोरमिततेजसः।।

....

इत्थमज्ञानसम्पन्नामाह कश्चिद्द्विजोत्तमः।
दैवयोगात्समायातः श्रीरङ्गं द्रष्टुमिच्छया।।

श्रीरङ्गयात्री श्रीविष्णोः दीपदानमहिमानमुवाच। अत्र श्रीरङ्गयात्रिकः कार्तीकमासे कावेरीम् अवगाहनाय श्रीरङ्गं यास्यतीति इयान् विशेषः। स्कन्धपुराणग्रथनवेलायामपि श्रीरङ्गस्य महत् प्राधान्यमस्तीति ज्ञायते। तत्रैव त्रयोविंशतितमाध्याये अगस्त्यात्रिसंवादे पुरंजन्योपाख्याने --

वैष्णवः सत्त्वसम्पन्नः जितषड्वर्गको नृपः।
तस्य बुद्धिसमुत्पन्ना विष्णोराराधने मुने।।

....

चिन्तायुक्तमनसं नृपं प्राहाशरीरवाक्।
कावेरीं गच्छ भोः भद्रं कार्तिक्यां कमलापतिम्।।
(६-१३श्लोकाः)

श्रीरङ्गाख्यं परं धाम वैकुण्ठं रङ्गमन्दिरम् ।

....

कावेरीमध्यनिलयं भुजगा भोगशायिनम्।
ऊर्जेमासि सपर्यां च विधिवद्विश्वमङ्गळम्।।

एवमेव कार्तिक्यां कावेरीस्नानं महाफलप्रदमिति सूतः शौनकादिभ्यो नैमिशारण्ये उद्घोषयति। अस्मिन्नेव कार्तीकमाहात्म्ये त्रयोदशाधयाये -

कार्तिकं प्राप्य कावेरीसलिले यो निमज्जति।
स केशवपुरं याति स्तूयमानोऽमरादिभिः।।

इत्थं सर्वात्मना तामसादिपुराणेष्वपि श्रीरङ्गस्य कावेर्याश्च संकीर्तनं बहुवारं श्रूयते। पुराणकालादारभ्य महावैशिष्ट्यमस्य श्रीरङ्गस्या-स्तीति नातिशयोक्तिः। नापि विवादात्मकः।

विश्वगुणादर्शे श्रीरङ्गक्षेत्रवर्णनम् -

अथ विश्वगुणादर्शचम्पूप्रबन्धकारः श्रीरङ्गक्षेत्रवर्णनावसरे -

श्रीरङ्गे शोभते यस्य श्रीरङ्गे शोभते च यः।
नमोऽहं कलये तस्मै न मोहं कलये ततः।। -- ४००

इति बहुचमत्कारमुपवर्णितवान्। इत्थं पुराणवाङ्मये बहूत्रेदं क्षेत्रमुपवर्णितम्। अथ द्रविडवेदे दिव्यसूरयः सर्वात्मना श्रीरङ्गयात्रां श्रीरङ्गनाथं कावेरी नदीं सप्तप्राकारयुतं श्रीरङ्गनाथमन्दिरं बहुधा कीर्तितवन्तः। श्रीरङ्ग इति नामस्मरणेनैव पापहरणमिति मन्यन्ते स्म।

श्रीरङ्गम् - पेरियाळ्वार् -

कलेरनन्तरं ४७वत्सरे श्रीपेरियाळ्वार् (श्रीविष्णुचित्ताः) मुदलायिरे प्रथमशतके चतुर्थतिरुमोळिमहाप्रबन्धे श्रीकृष्णशिशुविषये स्वयं मातृभावनामुपेत्य यशोदायमानाः "माणिक्कङ्गट्टि" इति डोलारोपणं भगवतः नन्दशिशोः कुर्वन्ति स्म। तस्मिन् समये हे नन्दगोपाङ्ग-नाडिम्बक! मा रुद। चतुर्मुखब्रह्ममणिगणक्रीडनकं डोलाविशेषं तुभ्यं प्रेषितवान्। "तालेलौ" इति कीर्तयन्तः रुद्रेन्द्रादयः भवते नानाविधानि आभरणजालानि प्रेषितवन्तः। महालक्ष्मीः तुलसिमालिकाः प्रेषितवती। नीळादिदिव्यमहिष्यः चूडामण्याभरणादिजालं प्रेषितवत्यः मुमुदिरे। हे बालगोपाल! रङ्गशिशो मा रुद मा रुद इति आश्वासयन्तः -

मेयूति मिरु नानप्पोडियोडुमञ्जळुम् शय्यतडङ्गण्डुक्कञ्जनमुं शिन्दुरमुम्।
वेय्यकलैप्पाकिक्कोण्णुवलाय् नित्राळ् अय्यावळेळ् एळ तालेलो ।।

हे रङ्गशायिन्! रङ्गबालक! तव दिव्यदेहमङ्गळस्नानाय मङ्गळवस्तूनि कस्तूर्यादीनि दुर्गा माता स्वयमानीय अत्र तिष्ठति। सरस्वती तु रक्षां व्याहतवती तिष्ठति। मा रुद बालक रङ्गशायिन् मा रुदेति मात्रवस्थां भजन्ते रङ्गनाथविषये। एवमेव मुदलायिरे द्वितीयशतके सप्तमदशके पूच्चुडल् इति प्रबन्धे भगवतः वासुदेवडिम्भकस्य शिरोऽलङ्कारेण पुष्पाणि समर्पयन्तः विष्णुचित्ताः

करुवुडै मेकङ्गळ्
तिरुवुडयाल् मनवाळा ।
तिरुवरङ्गत्तेकिडन्दाय्
मरुविमणङ्गमकिन्नमल्लिकैप्पूच्चुट्ट वाराय् ।।[1]

---

[1] கருவுடை மேகங்கள்.......

हे नीलमेघवपुष! समस्तचेतनोज्जीवनाय श्रीरङ्गमन्दिरे सुखं शयानस्त्वम् इमानि पुष्पाणि स्वीकर्तुम् इत आगच्छेति यशोदा (पेरियाळ्वार्) आह्वयति।

श्रीरङ्गम् - तोण्डरडिप्पोडियाळ्वार् -

(कलियुगमारभ्य २९८संवत्यरेषु गतेषु) श्रीविप्रनारायणमहाभागवताः स्वकीये दिव्यप्रबन्धे तिरुप्पळ्ळियोजुच्चिनामके श्रीरङ्गनाथसुप्रभाते श्रीरङ्गदेवं जगज्जन्मादिकारणत्वेन सर्वान्तर्यामित्वेन देवता-सार्वभौमत्वेन यक्षगरुडगन्धर्वकिन्नरकिम्पुरुषादिऋषिगणसेव्यमानदिव्य-मङ्गळविग्रहवत्त्वेन सुप्रभातं प्रणीतवन्तः। एतच्च श्रीरङ्गनथसुप्रभातं जगत्प्रसिद्धम्। न केवलं श्रीरङ्गक्षेत्रसुप्रभातं श्रीरङ्गक्षेत्रे एव पठ्यते। अपि तु अष्टोत्तरशतदिव्यस्थलेषु प्रतिदिनं पठ्यत इति अहो प्रभावः तोण्डरडिप्पोडियाळ्वार्-विप्रनारायणसूरिणः। एतेषां रचना मनोहरा दिव्यगुणशोभिता रसभरा आर्द्रीकरोति चित्तमिति प्रत्यक्षं प्रत्यक्षर-प्रमाणमिति भक्तजनानां समयः। द्रमिडभाषामयः श्रीरङ्गनाथदेवस्य सुप्रभातस्तवः सर्वेष्वपि सुप्रभातस्तवेषु मूर्धन्येति कृत्वा श्रीवैष्णवदेवालयेषु प्रथमं स्थानं नीयते। तिरुपतिश्रीवेङ्कटेश्वरसन्निधौ अधुना यः सुप्रभातस्तवः पठ्यते सोऽयं स्तवः अर्वाचीनश्रीवैष्णवसम्प्रदाय-प्रवर्तकाचार्याणां श्रीप्रतिवादिभयङ्कर-अण्णन् स्वामिनां रचनाविशेष एव। प्रतिदिनं श्रीवेङ्कटेश्वरसन्निधौ पठ्यमानोऽपि धनुर्माससमये श्रीवेङ्कटेश्वरसुप्रभातस्तवः न पठ्यते। तत्समये तिरुप्पळ्ळियोजुच्चि, तिरुप्पावै श्रीतोण्डरडिप्पोडियाळ्वार्, श्रीआण्डाल् प्रबन्धद्वयं पठ्यते[1]। धनुर्मासवेळायां सर्वेष्वपि श्रीवैष्णवदेवालयेषु श्रीरङ्गनाथसुप्रभातस्तवः

திருவுடையால் மணவாளா
திருவரங்கத்தேகிடந்தாய்
மருவிமணங்கமகிந்நமல்லிகைப்பூச்சுட்டவாராய்..

[1] (श्रीश्रीश्री त्रिदण्डि- अप्पनक्केळि-तिरुपति-चिन्नजीयर्स्वामिपादानां श्रीसूक्त्यनुसारेण लिखितम्)

श्रीविप्रनारायणसूरिविरचित एव द्राविड्यां पठ्यते। प्राचीनगुरुपरम्परायां श्रीवैष्यदिव्यसूरिमध्ये भक्ताङ्घ्रिरेणुरिति प्रसिद्धाः विप्रनारायणाः श्रीरङ्गनाथस्य अपारकरुणाकटाक्षमुपलब्धवन्तः। एतेषां श्रीरङ्गनाथ-सुप्रभाततिरुप्पळ्ळियोजुच्चिप्रबन्धगन्थाः दशसख्याकाः श्रीरङ्गनाथा-र्चनावसरे प्रातःकाले सुप्रभातरूपेणानुसन्धीयते ।

कदिरवन् कुणतिशैच्चिकरम् वन्दणैन्तान्
कनयितुळकन्रतु कालयुं पोजुताय्
मतुविळिन्तोळुकिन मामलरेल्लाम्
वानवरर्षळ् वन्दु वन्दीण्डि
एतिर् तिशै निरैन्दनरि इवरोडुम् पुगुन्द
विरुङ्कळित्तीट्टमुम् पिडियोडु मुरशुम्
अतिर् तलिलौलकडल् पेन्रलतेङ्गुम्
अरङ्गत्तम्मा पळ्ळि एजुन्दरुळाये ।।[1]

इत्यस्यां गाथायां प्राच्यां दिशि कमलबान्धवः उदियाय । सर्वं तमः अस्तमयं प्राप्तम्। इदानीं भगवदाराधनाकालः सञ्जातः। अत एव विकसितानि सर्वाणि कुसुमानि मधु विकिरन्ति। देवताः राजानश्च भवत्पादारविन्दसेवनायाह - महमिकयागत्य द्वारि तिष्ठन्ति । एतेषां वाहनानां दिग्गजानां वाद्यानां च घोषः समुद्रघोष इव दिक्षु व्याप्तः । हे रङ्गशायिन् ! शेषशयनादुत्थायास्मान् पालय" इति प्रार्थयन्ति। एते श्रीरङ्गनाथं न कदापि अर्चामूर्तिरिव भावयन्ति। साक्षात् परमपदनाथः

---

[1] *கதிரவ் குணதிஸைச்சிகரம் வந்தணயிந்தாந்*
கநையிருளகந்ரது காலயிம் போஜுதாய்
மதுவிரிந்தோளுகிநமாமலரேல்லாம்
வாநவரார்ஷர்கள் வந்துவந்தீண்டி
ஏதிர் திஸை நிரைந்தநரி இவரோடும புகுந்த
விருங்களித்தீட்டமும் பிடியோடுமுரஷும்
அதிர் தலில் லலைகடல் போந்நளதேங்கும்
அரங்கத்தம்மா பள்ளியோஜுந்தருளாயே..

परवासुदेव एवात्राधिशेते इति सम्भावयन्ति स्म। श्रीरङ्गनाथ-सुप्रभातवर्णनावसरे प्रकृतिचित्रणं सर्वान् गुञ्जपति। यथा प्राक्दिशात् पुण्यसमीरणाः सुगन्धायमानाः सर्वत्र व्याप्तिं भजन्ते। कमलपत्रेषु सुखं शयानाः हंसमिथुनविशेषाः क्रमशः पक्ष्माणि प्रसार्य तुहिनं किरन्ति। ग्राहग्रस्ते करीन्द्रे तथाविधमनुग्रहमवार्षीः। इदानीमत्र भूमण्डले अनैके नक्राः इन्द्रियरूपाः वारं वारं संसारिणः ग्रसन्ते। अतः झटित्युत्थाय विहाय च शेषशय्यां कृपया पालयेति विज्ञापयन्ति। श्रीरङ्गनाथ-सुप्रभातवेलायां सर्वे देवताः समागताः इति श्रीरङ्गनाथस्य देवतासार्वभौमत्वं सूचयन्ति।

इरवियर् मणिनडुन्तेडुमिलरोल इरैयवर् मदिनरु विडयरुमिवरो
मरुविय मयलिन नरुमुगनिवनो मरुतरुम् वषुक्कळुम् वन्तु वन्दण्डि ।
पुरवियोडाडलुम् पाडलुम् तेरुम् कुमरदण्डम् पुकुन्दीण्डिय वेल्लम्
अरुवरय्य नैय्यनिन् कोयिल् मुन्निवरो अरङ्गत्तम्मा पळ्ळि येजुन्दरुळाये ।।[1]

इत्थं दिव्यसूरिरयं भक्ताङ्घ्रिरेणुः श्रीरङ्गनाथैकप्रपत्तयः स्वसुप्रभात-स्तवे श्रीरङ्गनाथस्य पारम्यं बहुधा प्रशंसन्ते स्म। यक्षगरुडगन्धर्व-किन्नरकिम्पुरुषनित्यसूरिणः, ऋषिगणाः, मुनिजनाः, सिद्धचारणाः श्रीरङ्गे सदा सुप्रभातस्तवाय सन्नद्धा भवन्तीति मङ्ळवाद्यैः गायन्तीति

---

1 இரவியர் மணிநடுந்தேருடுமிவரோ இறையவர் பதிநரு விடயருமிவரோ
மருவியமயலிந நருமுகநிவநோ · மருதரும் வஷுக்களும் வந்து வந்தீண்டி
புரவியோடாடலும்பாடலும்தேரும் குமரடண்டம் புகுந்தீண்டியவேள்ளம்
அருவரையணயநிந் கோயில் முந்நிவரோ அரங்கத்தம்மா பள்ளியோஜுந்தருளாயே..

च मनोहरं वर्णयन्ति। एते प्रतिदिनं तुलसिमालाः स्वीकृत्य देवाय समर्पयन्ति स्म। उभयकावेरीविकसितपद्मानां सौन्दर्यं सूर्योदयविशेषाः भागवतेन ध्वनिनातिगम्भीरेण प्रतिपादिता च द्रविडकवितागाथाः कविताप्रपञ्चे सर्वोत्तमस्थानं भजन्ते। श्रीपराशरभट्टार्याणाम् एते दिव्यसूरयः परमादरणीयाश्च भवन्ति। श्रीरङ्गे कदाचित् महाप्राकार-निर्माणावसरे वीरसुन्दरराजाज्ञया श्रीपिळ्ळप्पिळ्ळै याळ्वान् गृहोन्मूल-नायोद्युक्तान् राजभटान् पराशराः तेभ्यः भक्ताङ्घ्रिरेणुदिव्योदन्तं श्रावयन्तः निवारयन्ति स्म। अयमेव विषयः श्रीपराशराणां प्रतिपदमभिव्यनक्ति। श्रीरङ्गं श्रीरङ्गनाथः इति स्मरणानुपदमेव श्रीतोण्डरडिप्पोडि (भक्ताङ्घ्रिरेणु) वृत्तान्तः मनसि सर्वेषामवश्यं प्रतिभाति।

श्रीरङ्गविषयप्रस्तावे कुलशेखरसूरिणां प्रस्तावः -

श्रीरङ्गविषयप्रस्तावे कुलशेखरसूरिणां वृत्तान्तः सर्वेषामार्द्रीकरोति। एते च महानुभावाः महाविष्णोः कौस्तुभांशाः। चन्द्रवंशमहीपालस्य दृढव्रतस्य प्रियतनूजाः राजवंशतिलकायमाना इव विराजन्ते स्म। भगवतः निर्हेतुककृपया विभीषणवत् त्यक्तराजसुखवैभवाः, तृणीकृत-गजारोहणादिभ्रान्तिजनकसत्काराः सवासनया परित्यक्तकामादिगुणाः निरन्तरं श्रीमन्नारायणपुराणश्रवणजनितपरमानन्दश्रीरामसाक्षात्काराः श्रीरङ्गयात्राकरणाय परवशचित्ताः रङ्गयात्राघोषणां कारयन्ति स्म। तद्यथा

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने।
तमहं शिरसा वन्दे राजानं कुलशेखरम्।। (मुकुन्दमाला)

इति प्रपन्नजनैः हर्षोत्फुल्लहृदयैः कुलशेखरदिव्यसूरिः कीर्त्यत इति प्रभावोऽस्य रङ्गयात्रिणः केनापि वक्तुं न शक्यते। श्रीरामायण-श्रवणवेलायां श्रीरामचन्द्रं साक्षाद्दर्शितवन्त इति ऐतिह्यं भक्तान् परवशान् करोति। गङ्गादिसकलतीर्थेभ्योऽपि श्रीवेङ्कटाचलम्, स्वामिपुष्करिणी च सर्वोन्नतस्थानमिति भावयन्तः तत्रैव शुकपिकबकादिजन्म वा

तरुमृगपाषाणपल्यङ्क्कापर्युषितपात्रादिजन्म वा देवमन्दिरगेहळीत्वमेव वा स्वजन्म भवत्विति "बद्धेनाञ्जलिना नतेन शिरसा" इत्यादिना प्रार्थयति। भगवद्भागवतसेवनाय प्रतिबन्धकमिति स्वराज्यं तत्यजु:। संस्कृते श्रीवैष्णवसाहित्ये द्राक्षापाकभक्तिरसमिश्रितं मनोहरप्रपत्ति-परिमळकुसुमयुतां मुकुन्दमालां भगवते समर्पितवन्त: नितरां प्रसिद्धिमापु:। द्राविड्यां पेरुमाळ्तिरुमोजि नाम महाप्रबन्धरचनां कुरुते स्म। श्रीरङ्गनाथैकप्राणा: श्रीरङ्गनाथं बहुप्रकारं गाथाभि: कीर्तयन्ति स्म। तासु पद्धतीसु तालेलो इति डोलाक्रीडां अनुभवन्ति स्म। यथा-

तेवरैयुमशुररै युन्तिशै कलैयुं पडैत्तवने
यावरुं वन्दडीवणङ्गुवरङ्गनगरतुयिन्नवने।
काविरिनन्नदि पायुन्कणपुरत्तेन् करुमणिये
एवम् रिवेशिलैवलवा इरागवने तालेलो।।

देवदानवादिसमस्तपदार्थसृष्टिं करोषि। सर्वेषामपि भगवत्पादारविन्द-युगळप्रसादायात्र श्रीरङ्गे महाक्षेत्रे शेषशयनमधितिष्ठसि। कावेरी-परिचरितदिव्यधाम हे नीलमणि रघुवीर भवतां कोदण्डोद्यमनेनैव शत्रव: निरस्ता: इति तदेव भवत्पराक्रमं व्यनक्ति किल। 'डोलायाञ्चल डोलायां डोलायाञ्चल डोलायाम्' इचि प्रार्थितवन्त:। भक्ताङ्घ्रिरेणु: वनमालांशजा:

एरुयि वीर................................
अरुविलामनिशरेल्लां अरङ्गमेन्नुळै प्परागिल
पेरियिल् वाज नगरमेल्लम् पुल्ले सन्तेषयुमन्रे।

ये च ज्ञानयुता: श्रीरङ्गमिति नाम सङ्गिरन्ते ते कदापि न विषमविषयतोय निमग्ना: भवन्ति। संसारसागरं तरन्तीति च कीर्त्यन्ते स्म। श्रीरङ्गनाथदिव्यमुखारविन्दविकासायैव मदीयकैङ्कर्यकर्म इति च भावयन्ति स्म।

कावेरीतोयमाश्रित्य वातो यत्र वर्तते।
तद्देशवासिनां मुक्ति: किमुत तीर्थवासिनाम्।।

इति प्राचीनोक्ति: विजयते ।

मुनिवाहनसूरिणां श्रीरङ्गानुभवः -

श्रीलोकसारङ्गमहामुनिवाहनाः पाणसूरिः तिरुप्पाणिः।
याळ्वारश्रीरङ्गनाथविषये महतीं निष्ठां प्रादर्शुः।।

एते मुनिवाहनाः परत्वव्यूहविभवविशेषवैभवान् न प्रतिपादयन्ति केवलं श्रीरङ्गनाथदिव्यार्चासौन्दर्यम् आपादचूडमनुभूय मुदितान्तरात्मनः नयनयोः विषयान्ताराणामदृष्टतां निश्चकायुः। स्वेन विरचिते अमलनादिपिरान् नामके महाप्रबन्धे श्रीरङ्गनाथं -

अमलनादिपिरानाडियार्केन्नैयाट्पडुत्त
विमलन् विण्णवरकोन् विरैयारपोळिल् वेङ्गडवन्
निमलन् निन्मलन् नीदिवानवन् नीलमदिळरङ्गत्तम्मा
क्कमलपादंवन्दु एन् कण्णिनुळ्ळानपोक्किन्नदे।।

परिशुद्धोऽयं श्रीरङ्गनाथस्वामी ममोपकारकः अभूत्। प्रकृति परवशं मां कटाक्षितवान्। अयमेव श्रीवेङ्कटाद्रौ तिष्ठति। अकलङ्कः हेयगुणप्रतिभटः परमपदं धाम महाप्राकारभूयिष्ठे श्रीरङ्गे शयानः श्रीमहालक्ष्म्या परिचरितपादयुगळः मम नयनयोः गोचरो भवतीति अहो श्रीरङ्गनाथमहिमा! इति पादादिकिरीटं यावत्

एन्नमुदनै कण्ड कण्गळ् मत्तोन्निनै क्काणावे[1]

संसारसागरस्याभरणरूपः श्रीरङ्गशायी ब्रह्माण्डनिर्वहकः ममामृततुल्यः भवति। श्रीरङ्गनाथदिव्यमङ्गळमूर्तिसौन्दर्यदर्शनजनितलाभपरवशं मदीयनेत्रयुगळं नान्यत्किमपि वस्तु द्रष्टुं पारयति इति विज्ञापयन्ति।

श्रीरङ्गराजस्तवे परिकीर्तिताः परकालदिव्यसूरयः:-

श्रीपराशरार्याणां तु परकालसूरिविषये महानादरः सर्वत्र दृश्यते। श्रीपराशरार्याणां वेदान्तिदिग्विजयवादविषये श्रीपरकालसूरिमहाप्रबन्धः

---

1 *ஏந்நமுதைநகண்டகங்ள் மத்தோந்நிநை க்காணாவே*

திருநுநாண்கம் (महादण्डकः) सहायभूतोऽभवदिति। श्रीपरकालसूरिः तृणीकृतजीविताः श्रीरङ्गदेवालयमहाप्राकार निर्माणं कृतवन्तः। भट्टार्याणां वन्दनीयाः सञ्जाताः। अत एव स्वकीये श्रीरङ्गराजस्तवे पूर्वशतके-

जितबाह्यजिनादिमणिप्रतिमा अपि वैदिकयन्निव रङ्गपुरे।
मणिमण्डपविप्रगणान् विदधे परकालकविः प्रणमे महितान्।।
(पू.श. ३६)

इति अवोचयन्। परकालकविः स्वकीयश्रीसूक्तिमुखेन बाह्यादीनां काल इव स्थिताः। चौर्यतो विजितानां वेदबाह्यानां जिनाख्यबौद्धविशेषमुख्यानां मणिप्रतिमाः वैदिकं कुर्वन्निव अवैदिकाराधनोपयुक्तानां तासां प्रतिमानां वेदानुमतश्रीरङ्गगोपुरादिनिर्माणोपयुक्तताकरणं श्रीरङ्गपुरे मणिमण्टपानां वप्राणां विरचितवानिति विनयपुरस्सरं प्रणमन्ति।

परकालहरिं वन्दे हरिपादगुहाशयनम्।
उन्नतप्रतिकूलेभकुम्भसम्भेदविभ्रमम्।।
(नित्यानुसन्धानम् पु.२२९)

परकालसूरिः पेरियतिरुमडल्नाम महाप्रबन्धं विनिर्मितवन्तः। एते च

वाडि नेन् वाडि वरुवरुन्दिनन्मनत्ताळ् पेरुन्दिय रिन्डुम् वैयर् पिरन्दु
कूडि नेन कूडियिळैयवरदम्मीटवरतरुम् कलविये करुति
ओडिनेनोडियूय्वतोरप्पोरुळीळ् उनरवेणुम् पोरुम्पदम् तेरिन्तु
नाडिनेन नाडिनान्कण्डु कोण्डोन् नारायणनेन्नु नामम् ।।
(पे. ति. १११)[1]

---

1 *வாடிநேந் வாடி வருவருந்திநந்மநத்தாள்பேருந்தியரிந்டும்பையர்பிரந்து*
கூடிநேநகூடியிளையவரதம்மீடவரதரும்கலவியே கருதி
ஓடிநேநோடியுய்வதோரப்போருளாள் உநரவேணும் பேரும்பதம் தேரிந்து

अस्या: गाथाया: सारांश:-
दु:खास्पदे शरीरे जनित्वा विषयप्रवणो भूत्वा तदनधिगमनत्वात् मन:क्लेशमन्वभवम्। भगवत: निर्हेतुककृपया ज्ञानपदवीमधिष्ठाय नारायणायेति दिव्यं नाम परिज्ञातवानिति वदन्ति। अष्टाक्षरमहामन्त्र-वैभवं उपदिशन्ति।

पळ्ळै यावतु पार्कडल रङ्गमिरङ्गवन् पेयूमुलै
पिळ्ळैयादुयिरुण्डवैन्त पिरानवन् पेरुकुमिडम् ...[1]

इत्यादिषु पूतानाजीवितहरस्य श्रीकृष्णशिशो: शयनस्थानं इदं श्रीरङ्गक्षेत्रमेवेति। स्वदुहितरं कश्चन युवा अपहरदिति,

एन्दुणै एन्नोडु तोर्किरैयेनुमिरङ्गित्तिलळ्
तन्दुणैयाय वेन्नन् तनिमैक्कुविरङ्गित्तिलळ् ।
वण्दुणैवानवर्काय् वरङ्गेत्तरङ्गत्तुरैयु
मिण्तुणैयुवनोडुम् पोयोळालालि पुकुवरकोरुळो ।।[2]

एषा मदीयसहायभूता भविष्यतीति मत्वाऽपालयम् निघृणा सञ्जाता। एषा तु दानवनिहन्तारं श्रीरङ्गशायिनम् अन्वधावयत् आ: कष्टाम् तिरुवालिं प्रविशति इति विलपन् मात्रवस्थां प्राप्नुवन्ति। श्रीरङ्गनाथं श्रीरङ्गक्षेत्रमेवमनुभवन्ति।

सप्तप्राकारनिर्माणे व्ययीकृत: काल: -

प्रथमप्राकार: २ संवत्सरौ   भूमि: (तत्त्वम्)
द्वितीयप्राकार: ६ संवत्सरा:   जलम् (तत्त्वम्)

நாடிநேந நாடிநாந்கண்டு கோண்டேந் நாராயணாநேந்ரு நாமம்
பே. தி.111

1 *பிள்ளையாவது பார்கடல ரங்கமிரங்கவந் பேயூமுலை*
பிள்ளையாதுயிருண்டவைந்த பிராநவந் பேருகுமிடம்..

2 *ஏந்துணை ஏந்நேடுதோர்கிரையேநுமிரங்கித்திலள்*
தந்துணையாயவேந்நந் தநிமைக்குவிரங்கித்திளம்
வண்துணைவாநவர்காய் வரங்கேத்தரங்கத்துரைமு
மிண்துணையுவநோடும் போயோங்கலாலி புகுவரகோளீ

तृतीयप्राकार:	८ संवत्सरा:	अग्नि:
चतुर्थप्राकार:	१० संवत्सरा:	वायु:
पञ्चमप्राकार:	१२ संवत्सरा:	आकाश:
षष्ठः प्राकार:	१८ संवत्सरा:	बुद्धि:
सप्तमप्राकार:	४ संवत्सरा:	अन्तरात्मा

सप्तप्राकारेभ्य: व्ययित: काल: ६० संवत्सरा: ।[1]

सप्तप्राकारनिर्माणदक्षा: १०५ आयुपर्यन्तं लीलाविभूत्यां प्रकाशिता: एते अनितरसाधारणकैङ्कर्यं अकुर्वन् -

उन्दिमेल्नान्मुकनै प्पडैत्तानुलकुण्डव
नेन्दै पेण्मानियोरकल् तातैकिडमेन्बराल्
शन्दिनोडु मणियुम् कोळिक्कुम् पुनर्काविरि
अन्दिपोरुम् निरत्तारवयल् शूद तेन्नरङ्गमे

अस्या: गाथाया: संस्कृतछाया-

नाभ्यब्जे दिङ्मुखं द्राक्सृजत उरुजगत्कुक्षिसंस्थं विधातु:
अस्मत्तातस्य चास्मात्कुलजसुरगुरोरास्पदञ्च क्षेत्रया
कावेर्या चन्दनागप्रवरंमणिगणक्षेपिता: पूर्ववत्या
संवीता रङ्गपुरस्सरानिबिडपरिसरासान्ध्यरुक् क्षेत्रतत्या ।।

इत्थं चन्दनवृक्षादिभि: रत्नप्रवाहयुतकावेर्या रक्तवर्णयुतधान्ययुतक्षेत्रै: परिवृते श्रीरङ्गक्षेत्रे ब्रह्मण: पिता प्रळयकाले लोकानामुपसंहर्ता अस्मत्स्वामी नित्यसूरिणामधिप: नारायाण: अधिवसतीति।

चेय्यशान्दुं कलन्दिळि पुनल्शूळ् तेन्नरङ्गमे।।
(पेरियतिरुमोजि३-५-१२)

अण्डनाळम् पोलिल् शान्दळकार तेन्नरङ्गमे।।
(पे.ति ५-५-३)

....

[1](Dr. वेदव्यास: I.A.S श्रीरामानुजवैभवम्)

काविरडि तेन्रङ्गमे (५-५-४)

एवमेव श्रीरङ्गनाथः वेदः, यज्ञः, शब्दजालः, जीवसमिष्टिः अग्निः, जलं, मेघः, वायुः, सप्तसमुद्र भूयिष्टः सप्तकुलाचलरूपः आकाशः ब्रह्माण्डः इति, श्रीरङ्गे च महाक्षेत्रे भक्ताननुगृण्हातीति स्तुवन्ति।

पण्डैनान्मरैयुम् वेळ्वियुम् क्केळ्विप्पतङ्गळुम् पतङ्गळिन् पोरुळुम्।
पिण्डमाय् विरिन्द पिरङ्गोळियनलुम् पेरुकियपुनलोडु निलनुम्।।

....

आण्डमुम् तानाय् निन्नवेम्बेरुमानरङ्गमानकरमरन्दाने।।
(पेरियतिरुमोजि ५-७-१)

कदाचित् गजेन्द्रसंरक्षकः त्वमिति ध्यात्वा भवच्चरणद्वन्द्वं शरणमभजमिति श्रीरङ्गनाथं सचमत्कारं प्रार्थयन्ति।

कडिकोल् पूम्बोलिल् कामरूपोय् कैवैकुतामरैवाङ्गियवेळम्।
अडियेनुम् वन्दडि यिणैयडैन्देनाणिपोलिल् तिरुवरङ्गत्तम्माने।।
(पेरियतिरुमोजि ५-८-३)

इत्थं पेरियतिरुमोजि महाप्रबन्धे सर्वत्र समस्तार्चामूर्तिनां मङ्गळाशासनानि कुर्वन्तः।

एङ्गळडि कलिमैयेरु तलैवरुडयतिरुनामम्।
नङ्गळ् विनैकळ् तविरविरैमिन् नमो नारायणमे।।
(पे. ति. ९-१०-९)

सर्वेश्वरस्य नारायणनाम एव अस्माकं शरणं भवतीति पापघ्नं च भवतीति स्वदिव्यप्रबन्धसारांशत्वेन

आर्ताः विषण्णाश्शिधिलाश्च भीताः
घोरेषु च व्याधिषु वर्तमानाः।
संकीर्त्य नारायणशब्दमात्रं
विमुक्तदुःखाः सुखिनो भवन्ति।।

इति श्रीविष्णुसहस्रनामस्तोत्रोत्तरपीठिकाश्लोकं ज्ञापयन्ति। अष्टाक्षरमहामन्त्रवैभवम् एव पेरियतिरुमोजिसारांश इति ज्ञायते। तदेव वैभवं

श्रीरङ्गराजस्तवे श्रीपराशरभट्टार्याः पूर्वशतके विवृतवन्तः खलु। तोळवळक्कं-तालूदुवान्-नीलहलैमितियप्पन्-नीरमळनादरान्समेताः एते सूरयः तिरुक्कुरुन्दाण्डगम्, शिरियतिरुमडल्, पेरियतिरुमोडल्, तिरुनेडुन्दाण्डकम् इत्यादिप्रबन्धेषु श्रीरङ्गनाथं श्रीरङ्गक्षेत्रं च बहुधा कीर्तितवन्तः।[1]

प्रथमदिव्यसूरित्रयम् - श्रीरङ्गक्षेत्रम्-

द्वापरयुगे ८६२९०१ संवत्सरेषु गतेषु द्वापरान्ते सिद्धार्थी ४२११ B.C. भगवत्प्रसादादासादितसर्वज्ञत्वभद्रमूर्तयः दिव्यसूरयः द्वादश-संख्याकाः । तेषु आद्याः तत्र भवान् सरोयोगि (पेयाळ्वार्) महानुभावाः जगति प्रसिद्धाः। एतेषां सरोयोगिभूतयोगिमहायोगिनां रचनाः तृतीयसहस्रे श्रीमन्नाथमुनिभिः संग्रथिताः। एतेषां रचनाः मून्त्रांतिरु-वन्दादिनाम्ना प्रसिद्धिमुपगता। एते च भगवन्निर्हेतुक-कृपयाऽधि-गतभक्तिदशाः भगवतः स्वरूपरूपगुणविभूतीः अनुभवन्ति स्म। अज्ञान-ध्वान्तभञ्जनाय भूम्यादीन् पदार्थान् दीपपात्रमिव रूपयित्वा उभयविभूतियुक्तः सर्वेश्वरः सर्वशेषी इति शेषित्वस्वरूपमेव जीवानां लक्षणमिति आत्मस्वरूप इति च तत्कैङ्कर्यमिति तत्साधनोपायभूतञ्च भगवच्चरणारविन्दयुगळमेवेति श्रीसरोयोगी निष्कर्षितवन्तः। श्रीमता सरोयोगिना मिलितस्य भूतयोगेरपि भगवदनुग्रहेण पराभक्तिः परज्ञान-रूपेण परिणमिता। तेन च परज्ञानेन संजातप्रेमविशेषाः भगवन्तं प्रार्थितवन्तः। असङ्ख्येयकल्याणगुणगणमहार्णवं श्रीमन्नारायणं सन्दर्शितवन्तः। कौस्तुभं सुदर्शनं पाञ्चजन्यं च हर्षोत्कर्षेण दृष्टवानिति

---

1 [श्रीपरंकालसूरिणःअवतारसमये महोपकारकाः चत्वारःशिष्याः। एतेषां साहाय्येन श्रारङ्गमन्दिरनिर्माणं प्रारब्धवन्तः। १. तोलवळक्कम् (वादप्रसिद्धः), २. तारुदवन् (द्वारोद्घाटकः), ३. नील्हलै मितियप्पन् (छायाग्राहकः), ४. नीर्मल्नादप्पन् (जलेषु गन्ता)। एते चत्वारः चोरवृत्त्या धनं सम्पाद्य परकालसूरिणः महाकैङ्कर्ये समर्पितवन्तः। श्रीवैष्णवप्रासादेषु न कदापि चौर्यमकुर्वन्।]

ज्ञानवैशद्यानुगुणं स्वरूपोपायपुरुषार्थानामर्थविशेषान् उपवर्णयन्ति स्म। अन्यौ द्वौ दिव्यसूरिणौ दीपं ज्वलयतः स्तः। तद्दीपकान्तौ परमात्मानं साक्षात्कृतवन्तः। ददर्श ददर्शेति।

तिरुक्कण्डेन पोन्मेनिकण्डेन् तिकळुम्
अरुक्कनणिनिरमुम् कण्डेन् शेरुक्किरळरुम्
एन्नाळि वण्णन् पालिन्नु।।
(इयर्पा मून्रान् तिरुवन्दादि, २ गाथा)

इति हर्षध्वानेन प्रबन्धस्यारम्भमकुर्वन्।

विण्णगरम् वेळ्का विरितिरैनीर वेङ्गडम्
मण्णगरम्मामाडवेकुक्कै मण्णगत्त
तेन्कुडन्दै तेनार तिरुवरङ्गम् तेन कोट्टि
तन् कुडङ्गै नीरेत्तुत्तान् ताळ्वु।।
(इयर्पा मून्रान् तिरुवन्दादि)

बलेः सकाशात् भूदानं स्वकृत्य तिरुविण्णगरे वेह्कवेङ्कटशैले वेळुक्कुक्षेत्रे कुम्भकोणे श्रीरङ्गे मकरन्दनिर्भरे इदानीमाविरभूदिति।

कायिलैतिन्नुम् कानिलुरैन्दुम् गतितेडि
....
पायन् मुकुन्दन् कोयिलरङ्गम् पणिवीरे।।

कन्दमूलपर्णादीन् भुक्त्वा काननिरताः, अग्निनिष्ठाः भूप्रदक्षिणश्रद्धाः मन्दभाग्याः श्रीरङ्गशायिनं मुकुन्दं भजत। स तु मातुरपि अतिशयते। सर्वदा रक्षति स्निह्यतीति स्तुवन्ति।

वैय्यंतगळिया वारकडले नेय्याग वेय्य कदिरोन् विळक्काहा शेय्य।
शुडराळियाननडिक्के शूट्टिनेन् शोन्मालै इडराळिनीङ्गुग वेयन्नु।।
(पे. ति.)

एवमेव (पोय्गैयाळ्वार्) सरोयोगि श्रीरङ्गक्षेत्रं श्रीरङ्गनाथं च वारं वारं सुतवन्ति। एते च महायोगिनः पाञ्चजन्यांशाः पद्माकरे समुद्भूताः। मुदलाळ्वारसमूहे अन्तर्भवन्ति। भूमौ स्थिताज्ञानान्धकारनिरसनाय ज्ञान-

किरणप्रसरणाय च भक्तजनानुज्जीवयितुकामाः अरुन्तमिळ् नूत्तन्दादि-मुक्तपदग्रस्तशतकमनुगृहीतवन्तः। (मुतल्तिरुवन्दादि) एतेऽपि दिव्य-सूरिणावितराविव श्रीरङ्गनाथं श्रीरङ्गक्षेत्रे रसभरेण वर्णितवन्तः।

ओन्नुमरन्दरियेनोद नीर्वर्ण्णनैनान् शन्नुमरप्पनो वेळैगाळ्।
कुरुवङ्गत्तदकिडन्दु कैतोडुदेन् कण्डेन् तिरुवरङ्गमेयान् दिशै।।
(इयर्पा ६)

हे विषयान्तरप्रवणाः! विवेकहीनाः गर्भवासादिसमये ज्ञानाभाववेलायां मातृगर्भे स्थित्वा श्रीरङ्गशायिनः स्वभावं (साक्षात्कृतवानस्मि) ज्ञातवानस्मि। स एव निर्हेतुकदयया स्वस्य स्वरूपरूपगुणविभूती-र्दर्शयामास। तदारभ्य निरन्तरं तत्स्मरणानुभवरतोऽहं इदानीं तं श्रीरङ्गनाथं कथं विस्मरामि। एतेषां हृदयतादात्म्यं साहित्ये सर्वत्र दरीदृश्यते।

भक्तिसारयोगिनः श्रीरङ्गानुभवः-
(द्वापरयुगे ८५७४८९ विभववत्सरे)
भक्तिसारमहायोगी तिरुमडिशैयाळ्वारिति जगत्प्रसिद्धाः। द्वादशसूरिषु चतुर्थाः। चतुस्सहस्रपरिमितदिव्यप्रबन्धे तृतीये सहस्रे एतेषां रचनाः श्रीनाथमुनिचन्द्रैः सङ्कलिते इयर्पासहस्रे चतुर्थग्रन्थराशिः विलक्षण-रचनाभूयिष्ठः राराजते । नान्मुगन् तिरुवन्दादि इत्यपि व्यवहारः अस्य सूरेः प्रबन्धस्य प्रथमगाथा नान्मुगन् इति प्रथमशब्दवशात् समागतः।

नान्मुगनै नारायणनै पडैत्तान् नान्मुगनुम्
तान्मुगनाय् शङ्गरनैत्तान् पडैत्तान्.......
(इयर्पा ४सहस्रे)

भक्तसारमहायोगी मुदलाळ्वार् प्रबन्धानुगुणं भगवन्तं श्रीमन्नारायणं साक्षात्कुर्वाणाः स्वानुभवपरीवाहपरिमलद्रामिडगाथामालाभिः श्रीमन्ना-रायणः एक एव परं दैवतमिति निर्धारितवन्तः। बहुकालं यावत्

भूमण्डलम् अलञ्चक्रुः देवतान्तरपरत्वं सर्वदा निरसन्ति स्म। सर्वानपि भगवत्प्रवणान् कर्तुं स्वप्रबन्धं व्यरचयन्। एतेऽपि श्रीरङ्गनाथं बहुधा स्तुवन्ति स्म।

पालिल् किडन्ददुवुम् पण्डरङ्गम्मेयदुवुम्
आलिल् तुयिन्रदुवुमारारिवार ञालत्।
तोरुपोरुळै वानवरतम् मेम प्पोरुळै अप्पिळ्
अरिपोरुळैयानरिन्द वारु।।

(नान्मुगन् तिरुवन्दादि३)

भगवान् श्रियःपतिः समस्तचराचरस्याद्वितीयकारणभूतः। तं नित्यसूरिणः सदा पश्यन्ति। अहो भाग्यं एतेषाम्! सृष्ट्यादौ भगवान् जलानि ससर्ज। तासु शयनमधिष्ठितवान्। क्षीराब्दौ श्रीरङ्गे प्रळयोदधौ च शयानं तं तस्य सौन्दर्यभोग्यतां च तस्यैव निर्हेतुककृपयाऽनुभूय ज्ञातवानस्मि, अहं तु तत् भाग्यशाली समभवम्। कोवाऽन्यः जानातीत्थमिति श्रीरङ्गनाथममर्ज्ञाः सञ्जाताः।

अवनेन्नैयालि अरङ्गत्तरङ्गिळ् अवनेन्नैयेय दामल् काप्पान् अवन्नेन।
दुळ्ळत्तु निन्नानिरुन्दान् किडुक्कुमे वेळ्ळत्तरवणैयिन् मेल्।।

(नान्मुगन् तिरुवन्दादि ३०)

श्रीरङ्गे नागपर्यङ्के शयानः स भगवान् स्वस्याद्भुतसौन्दर्यं मह्यं प्रदर्श्य संसाररङ्गस्थलात् मामवश्यं रक्षिष्यति। स एव रङ्गनाथः मदीये हृदयान्तरङ्गे कदाचित्तिष्ठन् कदाचित् उपविशन् आनन्दमनुभवति। इतःपरं सः शेषशय्यायां कथं शयिष्यति? इति भगवतः श्रीरङ्गनाथस्यापि भागवतविरहावस्थां उपवर्णयन्ति। श्रीरङ्गनाथस्य स्वहृद्देशे रङ्गमण्डपं शेषशय्यायां च कल्पितवन्तः।

नागत्तणैक्कुडन्दै वेहकात्तिकवेव्वुळ् नागत्तणैयरङ्गम् पेरम्हिल् नाग
त्तणै पार्कडल् किडक्कुम् आदिनेडुमाल् अणैप्पार करुत्तनावान्।।

(नान्मुकन् तिरुवन्दादि३६)

अस्यां गाथायां कुम्भकोण-यथोक्ताकार-तिरुवळ्ळूर्-श्रीरङ्गम्-पेर्नगरम्-क्षीराब्धिरिति सप्तपुण्यस्थलेषु भगवान् शेषपर्यङ्के स्वपिति। एतेभ्यः स्थानेभ्यः अपि भक्तजनानां हृदयस्थानान्येव नारायणस्य प्रीतिपात्राणि। भगवान् भक्तजनहृदयप्रवेशाय निरीक्षते। अहो रङ्गपतेः हृदयङ्गमाभिलाषः।

आळ्वारुत्तरुळि तरुवाय् कण्डुकोळ्ळेन्नुम्
निन् ताळ् पारुत्तनि तरुवेन् तन्मैयै केट्पार् ।
क्करुम्बोरुळाय् नित्र अरङ्गदे उन्नै
विरुम्बुवदे विळ्ळेन् मनम् ।। (नान्. ति. ६०)[1]

अस्यां गाथायां भक्तिसारयोगी रङ्गनाथं एवं ब्रुवन्ति- हे! श्रीरङ्गनाथ! येषु तावकीना निर्हेतुककृपा प्रसरति ते एव त्वामभिजानन्ति। ये च स्वप्रयत्नेन भगवन्तं भवन्तं ज्ञातुं यतन्ते, ते कदापि भवन्तं न भजन्ते। यथा नष्टैश्वर्यः विभवमुपलब्धुं पुनः यतते। तद्वत् भवानपि चेतनानुपलब्धुं यत्नं करोषि इति चित्रम्। यदृच्छया मे भवत्पादारविन्दमकरन्दरसास्वादनाभिरुचिः सञ्जाता। सा च स्थिरा भवतु। भवद्दययेति प्रार्थये कटाक्षयेति रङ्गनाथस्य भक्तजनसम्पादनोद्यमं उपवर्णयन्ति स्म। भक्तिसारमहायोगिनां द्वितीयग्रन्थः अद्वितीयः तिरुच्चन्दविरुत्तम्नाम्ना प्रसिद्धिमुपगतः। तिरुच्चन्दविरुत्तम्नाम छन्दो विशेषः । द्राविड्यां प्रसिद्धानि छन्दांसि एतानि । आशिरियवृत्तविशेषे वेदान्तार्थतत्त्वरहस्यानि प्रकाशितवन्तः। देवतान्तराणामवरत्वम् श्रीमन्नारायणस्य सर्वान्तर्यामित्वं विशेषेण प्रतिपादितवन्तः। भगवतः अवतारविशेषाः दिव्यचेष्टानि दिव्यभूषण-दिव्यायुध-दिव्यमहिषीजनवैभववृत्तान्तानि च अनुभवपरीवाहरूपेण ग्रन्थेऽस्मिन् उपवर्णिताः। श्रीरङ्गनाथविषये-

---

[1] *ஆள்பருத்தருளி தருவாய் கண்டுகோளேந்நம் நிந் தாள்பாருத்தளி தருவேந் தந்மையை கேட்பார். கரும்போருளாய் நிந்ந அரங்கநே உந்நை விரும்புவதே விள்ளேந் மநம்.. (நாந். தி. 60)*

अरङ्गने करङ्गनीर् कलङ्गवन्दु कुन्नुषुळ्
मरङ्गळ् तेयमानिलम् कुळुङ्गमाषुणाचुलाय्
नेरुङ्ग नीकडैन्द पोदु निन्नशूररेन् चेय्तार्
कुरङ्के याणुकन्दवेन्दै चूरुतोवेरिते ।।

सुग्रीवादिवानरसंरक्षकरघुवीर श्रीरङ्गनाथ समुद्रसन्तरणवेलायाम् शरणागतानाम् देवानामुकाराय् महान्तम्[1] कष्टमनुभवः, तस्मिन् समये शूराः देवाः किमकुर्वन् तूष्णीं स्थिता खलु सत्यं ब्रूहीति प्रार्थयति। सुरनरतिर्यग्जलानां सर्वेषामपि शरणागतरक्षकः भवानेव।

कोण्डैकोण्डकोदैमीदु तेनुलावुकूनिकून्
........................अन्दणीररङ्गमे ४९

श्रीरङ्गे कावेरीतीरं जलजन्तुमिश्रितमिति बककुलीरवशफरमत्स्यादि-परिवेष्ठितमिति

वेण्डिरैक्करुङ्गडल् शिवन्दुवेव मुन्नोरत्राल्
............................वेलिमुन्नशीररङ्गमे।। ५०

यो वा कदाचित् स्वकोदण्डनिस्सृतबाणजालैः समुद्रेऽग्निं चिक्षेप स एव श्रीरङ्गे सुखमास्ते ।

शरङ्गळैत्तुरन्दु विल्वळैत्तिळङ्गै मन्नवन् .....
अरङ्गमेन्बर नान्मुगत्तु अयन् पणिन्द कोयिले।.। ५१

[1] அரங்கநே தரங்கநீர கலங்கவந்நு குந்நுஷூள்
மரங்கள் தேயமாநிலம் குளுங்கமஷுணசும்
நேருங்கநீகடைந்த போது நிந்நஷூரரேந் ஷேய்ஂதார
குரங்கை யாணுகந்தவேந்தை கூருதேரவேரிதே.. ஸுக்ரீவாதி வாநரஸந்ரக்ஷகரகுவீர! ஶ்ரீரங்கநாத! ஸமுத்ரமதநவேளாயாம் ஷரணாகதாநாம் தேவாநாமுபகாராய மஹாந்தம்

दशमुखमर्दनः श्रीरामचन्द्रः अत्रैव कावेरीनदीतीरे चतुर्मुखपरिसेवितचरणद्वन्द्वः श्रीरङ्गेऽस्तीति ज्ञानिनः वदन्ति।

पोत्तैयत्तमुत्तल् यानै पेरेन्दिर्दु वददै ...
अरुत्तपत्तरशुत्तिवाळुम् अन्दणीररङ्गमे। ५२

कुवलयापीडगजमदापहारी गोपबालः त्रिदण्डधारिणः यतिवराः एकान्तिनः निस्सङ्गा कावेरीयुतश्रीङ्गे वसन्ति।

मोडियोडिलच्चैयाय.......................
.... अरङ्गमेन्न पेरदे।। ५३

काली रुद्रादयः बाणासुरदर्पात् द्राविताऽभवन् तदा नारायणः तस्य सहस्रबाहुच्छेदमकरोत् तस्य निकेतनमिदं श्रीरङ्गम्।

...........................अरङ्गमेयवण्णले। ५४
पोण्णिशूळरङ्गमे पुण्डरीकवल्लैये।। ५५

सुनिशितबाणप्रयोगेण लङ्कामुन्मूलनं योवा वा रघुनायकः कृतवान् स एव सुगन्धकावेरीतीरे श्रीरङ्गेऽधिशेते। इयं गाथा श्रीवैष्णवैः स्नानसमये अनुसन्धीयते। भक्तिसारयोगी सदा कावेरीलहरीपरिवृत्तदिव्यमन्दिरं श्रीरङ्गनाथं स्वहृदयकमले प्रतिष्ठाप्य तेन सह सम्भाषणं प्रेम्णा कुर्वन्ति स्म। कुत्रचित् स्वप्रबन्धे संख्यावाचकशब्दैः वेदान्तमनुगृहीतवन्तः।

एट्टिटमेट्टुमेट्टुमाय् ओरेळुमेळु
मेळुमाय् एट्टुमून्नुमोन्नुमागि निन्नवादिदेवनै।
एट्टुनायपेदमोडु यिरैञ्जिनिन्नवन्
पेयर एट्टेळुत्तु मोदुवारकळ् वल्लरवानमाळवे।।

(तिरुच्चनन्दविरुत्तम्)

१. ८+८+८+ = २४ चतुर्विंशति तत्त्वनिर्वाहकः
२. ७+७+७ = २१सप्तद्वीपसप्तकुलाचलसप्तसागरनिर्वाहकेति
३. ८+३+१ = १२ द्वादशादित्यानामन्तरात्मेति

४. एट्टिट८नायपेदनोडु = साष्टाङ्गप्रणामं कृत्वा
एट्टोळुत्तु ओरुवार = ८ अष्टाक्षरमन्त्रानुष्टानतत्पराः

वैकुण्ठवासिनो भवेयुरिति श्रीरङ्गनाथं खण्डशर्करारूपेणाऽनुभवन्ति। संसारसागरात् मामुद्धरेति आक्रन्दन्ति स्म। "सर्वधर्मान् परित्यज्य" इति चरमश्लोकं स्वगाथासु सूचयन्ति। कावेरीपरिवेष्ठितश्रीरङ्गक्षेत्र-नित्यनिवासरसिक! अतसीकुसुमसुकुमार हे श्रीरङ्गनाथ! शृणुष्व पापभूयिष्टे मदीये आत्मरूपजलधौ भवता प्रेमरूपा लता सञ्जाता उप्ताऽभूत् । अधुना प्रशस्तपुष्पोद्गमा ग्लान्यभावा प्रकाशति। भवान् मां संश्लिष्य दिव्यानन्दमददाः मदीयात्मा चिरन्तनाविद्याग्रन्थितः मुक्तः महानन्दसन्दोहे अवगाहितोऽभवत् इति श्रीरङ्गनाथं भक्तिप्रवाह-वचोभिः स्तुवन्तीति महाद्भुतम्।

१. चतुर्विंशतितत्त्वाः- कर्मेन्द्रिय(५), ज्ञानेन्द्रिय(५), शब्दस्पर्श-रूपरसगन्ध(५), पृथिव्यप्तेजोवाय्व्याका शादि भूतानि(५), मनः(१), महः(१), अहङ्कार(१), प्रकृतयः = २४.

२. सप्तदावीपाः- जन्बू-प्लक्ष-कुश-क्रौञ्च-शाक-शाल्मल-पुष्कराद्याः।

३. सप्तकुलाचलाः- महेन्द्र-मलय-हिमालय-शुक्तिमन्त-गन्धमादन-विन्ध्यपारियात्राः।

४. सप्तसमुद्राः- लवण-इक्षु-सुरा-सर्पि-दधि-क्षीरमहार्णवाः।

५. द्वादशादित्याः- धाता-पर्जन्या-त्वष्टा-पूषन्-अर्यमन्-विष्णु-भग-विवस्वत्-अंशुमत्-वरुण- मित्राः।
६. साष्टाङ्गनमस्ताराः- मनोबुद्ध्यभिमानेन सहन्यस्य धरातले।
कूर्मवत् चतुरः पादान् शिरस्तत्रैव पञ्चमम्।।

७. अष्टाक्षरमन्त्रः- ॐ नमो नारायणाय।।
भक्तिसारमहायोगी परदैवस्थापने बद्धश्रद्धा भवन्ति तद्वत् पराशरार्याः स्वकीये श्रीरङ्गराजस्तवे श्रीरङ्गराजं परदैवतमिति बहुधा स्तुवन्ति।

श्रीशठारेः श्रीरङ्गानुभवः -

(कलियुगारम्भे प्रथमवत्सरे ३१०२ B.C. विशाखाशुद्धचतुर्दशि) समग्रस्यापि द्रविडवेदस्य तिलकायमानाः श्रीमन्तः वकुळभूषणभास्कराः शठकोपमुनयः नितरां प्रशंस्यन्ते। एते श्रीमन्नारायणस्य पादुकास्थानभूताः।

यद्गोसहस्रमपहन्ति तमांसि पुंसां
नारायणो वसति यत्र सशङ्खचक्रः।
यन्मण्डलं श्रुतिगतं प्रणमन्ति विप्राः
तस्मै नमो वकुळभूषणभास्कराय।।

(दिव्यसूरिचरितम्)

पत्युःश्रियः प्रसादेन प्राप्तसार्वज्ञसम्पदम्।
प्रपन्नजनकूटस्थं प्रपद्ये श्रीपराङ्कुशम्।।

इति सर्वैः श्रीवैष्णवाचार्यसार्वभौमैः पूर्वाचार्यैः अर्वाचीनाचार्यैश्च सदा संस्तूयमानविभवाः शठकोपमुनयः सर्वात्मा जयन्ति।

ततः कलियुगस्यादौ वैशाख्यां विश्वभावनः।
विष्णुभक्तिप्रतिष्ठार्थं सेनेशोऽवतरिष्यति।।

इति विष्वक्सेनांशत्वेन भुवि अवतरिताः प्रपन्नजकूटस्थास्समभवन्।

राधे कलिदिने लाभे वैशाखे काव्यवासरे।
लग्ने कर्कटके सूत तनयं नाथनायिका।।

श्रियःपतिः स्वयमेव श्रीभूनीळासमेतो भूत्वा समस्तपरिवारपरिवृतः गरुडवाहनमधिरुह्य श्रीमते शठकोपाय दिव्यसूरिणे स्वकं रूपं दर्शयामास। दिव्यमङ्गळविग्रहदिव्यकल्याणगुणविभूत्यादिदिव्यात्मकस्वरूपवैभवं सम्यगनुभूय तदनुभवजनितप्रीत्यतिशयविशेषं स्वदेहे गोपयितुमशक्ताः अभवन् । स्वमुखारविन्दात् तत्सर्वानुभवविशेषाः

श्रीसूक्तिरूपेण उत्प्लुत्योत्प्लुत्य ऋग्यजुस्सामाधर्वणवेदसारांशरूपेण तिरुविरुत्तं १०० गाथाः, तिरुवाशिरियम् ७ गाथाः, पेरियतिरुवन्दादि ८७ गाथाः, तिरुवाय्मोळि ११०२ गाथाः बहिरागताः । तदनु चेतनोज्जीवनाय मधुरकविभ्यः अनुगृहीताः। श्रीमन्नाथमुनिद्वारा लोके सर्वत्र व्याप्ताः बभूवुः। एतेषां महिमातिशयं श्रीमति वैकुण्ठलोके विराजमानाः नित्यसूरयः श्वेतद्वीपवासिनो ब्रह्मादयश्च श्रुत्वा महायोगिनमेनं दर्शयन्तः आश्चर्यमन्वभजन्। अष्टोत्तरशतदिव्य-तिरुपतिस्थानेषु द्वात्रिंशत्दिव्यदेशार्चामूर्तयः तिन्त्रिणीवृक्षमूल-स्थितस्यास्य महायोगेः स्वदिव्यमङ्गळविग्रहसौन्दर्यलाभमनुगृहीतवन्तः, एतेभ्यः महाभागवतवर्येभ्यः स्वस्य मङ्गलाशासनमाहात्म्यलाभं लब्धवन्तः स्वस्वक्षेत्राणि अलञ्चक्रुरिति अपूर्वोऽयं विषयः। (३२) द्वात्रिंशत् वर्षपर्यन्तमेव लीलाविभूत्याम् अत्र भूमौ स्वजन्मनाऽलञ्चक्रुः।

यस्स वा परकाले करुणाकरस्सन् भविष्यदाचार्यपरस्वरूपम्।
सन्दर्शयामास महानुभावं तं कारिसूनुं शरणं प्रपद्ये।।

इति श्लोकात् एते च महाभागवताः स्वावसानकाले चेतनेषु दयापरवशाः, इतः परं अवतरिष्यमाणान् यतिराजान् रामानुजार्यान् दिव्यमङ्गळविग्रहरूपेण प्रदर्शितवन्तः। भविष्यदाचार्याणां रामानुजा-चार्याणां विग्रहमनुगृहीताः। एतेषां महिमाऽवाङ्मनसगोचरा। गुरुपम्परादिमहाग्रन्थेषु भगवद्विषये (तिरुवाय्मोजि-व्याख्याने) आचार्यहृदये सद्ग्रन्थे विस्तरेण प्रकाशिता भवति। तिरुवाय्मोजि-महाप्रबन्धनिर्मातारः एते श्रीमन्नाथमुनिदयया पुनः कलौ सर्वकालेषु यशोरूपेण विराजन्ते।

भक्तामृतं विश्वजनानुमोदनं सर्वार्थदं श्रीशठकोपवाङ्मयम्।
सहस्रशाखोपनिषत् समागमं नमाम्यहं द्राविडवेदसागरम्।।

इत्येषां तिरुवाय्मोजिमहाप्रबन्धं महाभागवताः गानं कुर्वन्ति। एतेषां प्रबन्धाः श्रीरङ्गनाथस्य भोग्यभूताः प्रीतिजनकाः भवन्ति। श्रीरङ्ग-देवालये महाप्रबन्धास्यास्य कालक्षेपः अनूचानरूपेण

आचार्यगोष्ठीष्वधुनापि प्रवर्तत इति कृत्वा अहो श्रीरङ्गनाथस्यास्मिन् दिव्यसूरौ प्रेमातिशयः। एतेऽपि स्वकीये दिव्यप्रबन्धे श्रीरङ्गनाथं बहुप्रकारं विविधाः अवस्थाः अनुभूयानुभवन्ति। माता इव कदाचित्, नायक इव कदाचित्, पितेव कदाचित् सर्वस्वमिव भगवन्तमनुभवन्ति। कदाचित् स्वयमेव नायिकादशामापन्नाः पक्षिभिः दौत्यं कुर्वन्ति। विरहोत्कण्ठितायाः माता इव स्वदुहितुः बाधां सर्वेश्वराय विज्ञापयन्ति। भगवद्विरहमसहमानाः प्राणान् त्यक्तुमुद्युक्ताः भवन्ति। तमेव शृण्वन्ति, भजन्ते, पिबन्ति, नृत्यन्ति, प्रलपन्ति, रुदन्ति, जल्पन्ति, किमुत सर्वस्वातन्त्र्येण किमु वा न कर्तुं पारयन्ति? उन्मत्ताः भवन्ति। तुलसीदामभिरलङ्कृत्य श्रीरङ्गनाथेति आकाशं दृष्ट्वा उच्चैः रुदन्ति। दीर्घशरणागतिं प्रकटयन्ति। श्रीरङ्गनाथविषये सप्तमशतके द्वितीयदशकं परिशीलयामः। श्रीशठकोपमुनिः भगवद्विश्लेषमसहमानाः (पेरियपेरुमाळ्) श्रीरङ्गाधिपस्य सन्निधौ प्रपत्तिं कुर्वन्ति। तत्रापि स्वमनोरथस्य साफल्यमधिगताः दुःखपरवशाः भूत्वा नायिकादशां प्राप्तवत्सु तस्याः नायिकायाः जननी श्रीरङ्गनाथं परिप्रश्नं कुर्वन्ती एवं विज्ञापयति -

कङ्गलम् पगलुम् कण्डुयिलरियाल् कण्डनीरकैगळालिरैक्कम्
शङ्गुशक्करङ्गळेन्रु कैकूप्पुम् त्तामरै कण्णेन्रेतळरुम्।
एङ्गने तरिक्केनुन्रे विट्टेन्रु मिरुनिलं कैकुळाविरुक्कुम्
शङ्गयल् पायनीर् तिरुवरङ्गत्तायिवल् तिरत्तेन् शय्गिन्राये।।

(तिरुवाय्मोजि ७-२-१)

हे श्रीरङ्गनाथ! एषा (आळ्वार्) नायिका त्वं विरहय्य न जीवेत्। अतः रात्रिंदिवं स्वापम् असहमाना दुःखमनुभवन्ती दिव्यावयवदिव्यायुध-संकीर्तनमालापयितुं प्रारभमाणा शक्तिहीनत्वात् करौ शिरसि निधाय प्रणमति। "हे श्रीरङ्गनाथ! एनां किं वा करिष्यामि? सत्वरं वद। किमर्थं मां बाधसे? अहं तु विरहबाधां न सहे। किमु वा पापकर्मैतत्? न युक्तमेवं भवते बाधयितुं माम्" इति वदन्ती तिष्ठति। त्वमिदानीं किं वा समाधास्यति? एवमेव एषा नायिका-

वट्किललिरैय्युम्माणिवण्णावेण्णुम् वानमेनोक्कुम्मैय्याक्कुम्।
....तिरुत्तेन् शेय् दिहायै।।
७-२-३

लज्जां विहाय परमपदस्थानात् त्वमागमिष्यसीति मत्वा आकाशं पश्यन्ती विलपति स्म। हे असुरान्तक! इति प्रार्थयते। आर्द्रीभवति। भवन्तं काकुत्स्थ! इत्याह्वयन्ती तिष्ठति। हे ध्वजालङ्कृत सप्तप्राकार! श्रीरङ्गनाथ! अस्याः विषये किमकरोः किल!

कट्टमेकादलेन्नु मूरुचिक्कुम् कडल्वण्णा कडियै कण्णेनुम्
(७-२-४)

इति स्मृतिरहिता मोहभावमुपगता कदाचित् हठात् प्रबुध्य भवते अञ्जलिं विकीर्य हे श्यामशुन्दर! त्वं मां नानुगृह्णासि। कठिनचित्तो भवसि किल। त्वयि मोहमुपगतास्मि । धिक्। अत एव एतावतीं बाधामनुभवामि इति सानुनयं प्रतिक्षणं वदन्ती मोहमुपगतवती तिष्ठति। हे रङ्गनाथ! स्त्रीवधं मा कुरु। किं वा चिकीर्षसि? एनां रक्षयितुं वदेति -

पालतुन्बङ्गलिन्बङ्गल्.................................
....कोमलकोळुन्दे।।
(७-२-७)

एन् तिरुमगळ् शेरमार्वने — मुडिविल्तनक्के ।।

हे श्रीरङ्गरसिक! एषा नायिका श्रीभूनीळानां ममापि च प्राणनाथोऽसीति भवन्तमेवानुसन्धधाना खिद्यति। कदावाऽस्याः खेदापनुति भविष्यतीति नाहं जाने इति।

मडिविल् तनक्कोन्नळि गिलेनेन्नुम्

....

....

मुगिल्वण्णनडिये।।

हे श्रीरङ्गनाथ! स्वदुःखनाशमुपायं न जानामीति वदति। त्रैलोक्यनिर्वाहकेति वदति। चन्द्रशेखरचतुर्मुखब्रह्मादीनां निर्वाहकेति वदति। नित्यसूरिणां निर्वाहकेति वदति। कदाचित् श्रीरङ्गरङ्गेति

वदति। भवत्पादारविन्दसुखमलभमाना तिष्ठतीति वयं भावयामः। किन्तु भगवच्छ्रीपादयुगळमिदानीमुपलभ्य परमानन्दमनुभवन्तीति जननी विज्ञापयामास। अत्र श्रीमन्नम्माळ्वार् (श्रीशठकोपसूरिः) स्वदिव्यप्रबन्धे श्रीरङ्गक्षेत्रस्य रङ्गनाथस्य च मङ्गळाशासं कुर्वन्तः इति एनाः गाथाः श्रीरङ्गनाथस्यात्यन्तं भोग्यरूपाः भवन्ति। प्रतिदिनं श्रावयन्ति। श्रीरङ्गमन्दिरे शिलालिपौ एनाः गाथाः अधुनापि परिदृश्यन्ते। न केवलं दशसंख्याकाः गाथाः सर्वत्रापि महाप्रबन्धे श्रीरङ्गनाथ एवार्चावतारसुलभ इति दीर्घशरणागतिरूपेण च परिकीर्तितम्। श्रीपराशरार्यस्तु श्रीशठकोपमुनिदिव्यप्रबन्धानां व्यख्यानं कालक्षेपरूपेण कुर्वन्तः श्रीशठकोपदिव्यसूरिणः श्रीसूक्त्यभिप्रायानुसारमेव स्वग्रन्थान् विरचयामासुः। अत एव स्वकीये श्रीरङ्गराजस्तवे पूर्वशतके नाथमुनेराचार्यमत्यङ्कुशस्वातन्त्र्यवैभवभगवदनुकम्पासम्पादनसाक्षात्कृतद्राविडाम्नायं शठकोपमुनिं प्रणमन्ति। यथा --

ऋषिं जुषामहे कृष्णतृष्णा तत्त्वमिवोदितम्।
सहस्रशखां योऽद्राक्षीत् द्राविडीं ब्रह्मसंहिताम्।।

इति षष्ठे श्लोके प्रणमन्ति। नाथ-यामुन-रामानुजमुनिप्रभृतिप्रबलप्रपन्नजनसम्प्रदायसम्पज्जुष्टाशिष्टसंघशिरः परिष्कारभूतैरेतैः श्रीपराशरभट्टदेशिकैः विशेषतः ऋषिपदविवरणानुगुणं ब्रह्मसंहितासाक्षात्कारप्रख्यापनात् द्राविडाम्नायसन्तानाविच्छेदो द्रढीकृता इति मन्तव्यम्। एतत्प्रशिष्यैः श्रीमद्वेदान्ताचार्यैः श्रीरङ्गनाथपादुकासहस्रस्तोत्रे -

वर्णस्तोमैः वकुळसुमनोवासनामुद्वहन्ती
माम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तः।।

इति प्रस्तुतम् ।

श्रीपादुकासहस्रव्याख्यानावसरे द्रमिडसंहितायाः प्रवाहतो नित्यत्वं अस्माभिश्च प्रत्यपादीति सर्वं समञ्जसमिति प्रतिपादितवन्तः। श्रीपराशरभट्टार्याणां विशेषादरभूताः प्रपन्नजनकूटस्थाः श्रीमन्तः शठकोपमुनयः। श्रीरङ्गराजस्तवे वारं वारं दिव्यसूरिणमेनं बहुत्र

स्तुवन्ति। श्रीरङ्गराजस्तवसमीक्षा वेलायां श्रीशठकोपदिव्यसूरिणः परिचयः महान् लाभकरो भवेत्।

गोदादेव्याः श्रीरङ्गानुभवः -

श्रीरङ्गभोगिशयनोपरि जातनिद्रं
नीलाकृतिं निखिलपालनजागरूकम्।
श्रीरामचन्द्रकुलदैवतमञ्जनाभं
श्रीरङ्गनायकमहं प्रणमामि नित्यम्।।

श्रीवैष्णवसम्प्दाये दिव्यसूरिषु गोदादेव्याः प्रभावः वर्णनातीतः। एषा भूदेव्याः अंशत्वेनसंसारसागरनिमग्नान् चेतनानुद्धर्तुकामा भुव्यवततार।

कर्कटे पूर्वफल्गुण्यां तुलसीकाननोद्भवाम् ।
पाण्डे विश्वं भरां गोदां वन्दे श्रीरङ्गनायकीम्।।

इत्यस्याः तिरुनक्षत्रतनियन् जन्मनक्षत्रे कीर्तयन्ति।

कल्पादौ हरिणा स्वयं जनहितं दृष्टेन सर्वात्मना
प्रेक्तं स्वस्य च कीर्तनं प्रपदनं स्वस्मै प्रसूनार्पणम् ।
सर्वेषां प्रकटं विधातुमनिशं श्रीधन्वि नव्येपुरे
जातां वैदिकविष्णुचित्ततनयां गोदामुदारां स्तुमः।।

(गोदाचतुःश्लोकी, ३)

कल्पादौ भगवता श्रीवराहेणोक्तदिशा भगवतः संकीर्तनं कृत्वा तस्मै प्रसूनार्पणं कृतवती। एषा तुलसीकाननोद्भवेति श्रीविष्णुचित्ततनयेति सर्वैः संस्तूयमानविभवाः चकास्ति। श्रीवैष्णवसम्प्रदाये स्तोत्राणामपि महानादरः इत्यत्र गोदावैभव एव प्रमाणभूतः। भगवान् श्रीभाष्यकाराः सदा अनया गोदादेव्या विरचितं तिरुप्पावैनाममहाप्रबन्धमनुसन्दधानाः "तिरुप्पावैजीयर्" इति प्रसिद्धिमुपगतवन्तः।

श्रीविष्णुचित्तकुलनन्दनकल्पवल्लीं
श्रीरङ्गराजहरिचन्दनयोगदृश्याम्।
साक्षात् क्षमां कमलामिवान्यां
गोदामनन्यशरणश्शरणं प्रपद्ये।।

(गोदास्तुतिः - श्रीवेदान्ताचार्याः)

एनां श्रीरङ्गनायकीं प्रति महात्मनः भागवताः महोज्वलेन प्रणमन्ति। एषा तु अर्चारूपिणं श्रीरङ्गनाथं उपयेमेति महच्चित्रम्। भागवतोक्तप्रकारेण कात्यायिनी व्रतधार्यमाणाः गोप्य इव स्वयमपि गोपवनितेव आचरन्ती स्वकीये धन्विपुरे स्थितं देवं (रङ्गमन्नार्) श्रीकृष्णमिव स्वकं ग्रामं गोकुलमिव स्वकीया सख्या गोपवनिता इव रूपयन्ती मार्गशीर्षमासे श्रीव्रतमाचचार। अस्मिन्. व्रते त्रिंशत् दिवसभूयिष्ठे त्रिंशत् गाथायुतगोदादेव्याः दिव्यप्रबन्धः "तिरुप्पावै" द्रमिडभाषामयः महत्प्राधान्यं भजते। सर्वाः गोप्यः स्वयं उत्थाप्य श्रीकृष्णमन्दिरमुपेत्य श्रीकृष्णं बलरामं नीलां च देवीं यशोदां नन्दविभुं च पर्यङ्किकाभ्यः उत्थाप्य भगवते मङ्गळाशासनानि समर्पयन्ति । भगवता मधुरालापैः सम्भाष्य तेनैव श्रीकृष्णेनात्तविविधाभरण-वाद्यादिसत्कारा स्वगोपगोष्ठ्यां भगवन्तमाह्वयन्ती आराधयन्ती नृत्यन्ती प्राणनाथमिवामनुत। अस्याः गाथाः वेदवेदान्त-पुराणेतिहासध्वनियुताः रसभराः सर्वैः आचार्यसार्वभौमैः आद्रियन्ते। अष्टोत्तरशतदेवालयेषु श्रीवैष्णवगृहेषु च अवश्यं प्रतिदिनम् अनुसन्धीयन्ते। तिरुपतिश्रीवेङ्कटाचलक्षेत्रे प्रतिदिनं "शात्तुमुरै" मङ्गळाशासनसमये श्रीवैष्णवयतिशेखरैः भागवतोत्तमैः विज्ञाप्यन्ते अधुनापि श्रोतुं द्रष्टुं शक्यते। श्रीपराशरभट्टार्याणां तु अस्मिन् तिरुप्पावैमहाप्रबन्धे महानादरः। अत एव तिरुप्पावैमहाप्रबन्धस्य अद्भुताद्भुततनियन् प्रार्थनाश्लोकं विरचितवन्तः। योऽयं श्लोकः तिरुप्पावैमहाप्रबन्ध-स्याध्ययनवेलायाम् आचार्यवर्यैः परमादरेण पठ्यते।

नीळातुङ्गस्तनगिरितटी सुप्तमुद्बोध्य कृष्णं
पारार्थ्यं स्वं श्रुतिशतशिरस्सिद्धमध्यापयन्तीम्।
स्वोच्चिष्टायां स्रजिनिगळितं या बलात्कृत्य भुङ्क्ते
गोदा तस्यै नम इदमिदं भूय एवास्तु भूयः।।

(तिरुप्पावै - तनियन्)

अयं प्रार्थनाश्लोकः श्रीतिरुप्पावैव्रतसारांशार्थं ज्ञापयति। श्रुतिशत-सिरस्सिद्धं स्वकीयं पारतन्त्र्यम् अनन्यार्हशेषत्वं भगवते अध्यापितवती।

स्वोच्छिष्टायां स्रजिनिगळितं बलात्कृत्य भुङ्क्ते इति एषा आमुक्तमाल्यादाभवत्। गीतमालिकां पुष्पमालिकां (पूमालै पामालै) वेदसुगन्धभरितां समर्पितवती। अतः भगवान् श्रीरङ्गनाथः स्वयं पल्यङ्किकां प्रेषयित्वा अर्चावतारेऽपि स्वनियमं विहाय गोदादेवीं उपयेमे। आश्चर्यमाश्चर्यं कलियुगे इति देवमनुष्यवर्गैः जयजयारावेण च संस्तूयते स्म।

माता चेत्तुलसी पिता यदि तव श्रीविष्णुचित्तो महान्
भ्राता चेत् यतिशेखरः प्रियतमः श्रीरङ्गधामा यदि।
ज्ञातारस्तनयास्त्वदुक्तिसरसस्तन्येन संवर्धिताः
गोदादेवि कथं त्वमन्यसदृशासाधारणा श्रीरसि।।

(श्री गोदाचतुश्शलोकी)

इति गोदादेव्याः वैभवं स्मरन्तः सर्वेऽपि गोदादेवीं साक्षात् श्रीरङ्गनायकीति असाधारणेति परमामनन्ति। श्रीवेदान्ताचार्याणां गोदास्तुतिः अस्याः श्रीरङ्गनाथे अनिर्वचनीयसंबन्धं ज्ञापयति। अस्याः सूक्तयः श्रीरङ्गराजस्तवेऽपि प्रतिभान्ति। अतः साम्प्रदाये प्रधान-भूतायाः अस्याः स्थानं श्रीरङ्गनाथहृदयक्षेत्रमेव। सर्वत्रापि स्वकीये प्रबन्धे रामकृष्णादिमूर्तीनामवताररहस्यानि वदन्ती तेभ्यः मङ्गळा-शासनानि समर्पितवती। तिरुप्पावैमहाप्रबन्धाध्ययनमन्तरा श्रीवैष्णव-दिव्याराधना न समाप्तिमियात्।

शित्तुं शिरुकाले....................................
.............मत्तैनम् कामङ्गळ् मात्तेलोरेम्पावाय्।।

इति जन्मजन्मनि श्रीरङ्गनाथस्य सेवाम् अभिलषितवती। श्रीरङ्गनाथं स्वदयितं मधुरभक्त्याऽनन्दयति स्म। पश्यन्तु अधुनाऽपि तिरुप्पावै मार्गशीर्षव्रतान्ते गोदाकल्याणमहोत्सवः सर्वेषु श्रीवैष्णवदेवालयेषु कुर्वन्तीति विषयः निस्सन्देह एव। अत्र श्रीवेदान्तदेशिकसार्वभौम-गोदास्तुतिपद्यानि सरसोदाहरणयोग्यानि भवन्ति।

तातस्तु ते मधुभिदः स्तुतिलेशवश्यात्
कर्मामृतैः स्तुतिशतैरनवाप्तपूर्वम्।

त्वन्मौळिगन्धसुभगामुपहृत्य मालां
लेभे महत्तरपदानुगुणं प्रसादम्।।

(गोदास्तुतिः १०)

अत्र श्रीविष्णुचित्तस्य महायशसः करणं गोदादेवीति वर्णयति।

दिग्दक्षिणापि परिपक्त्रिमपुण्यलभ्यात्
सर्वोत्तरा भवति देवि तवावतारात्।
यत्रैव रङ्गपतिना बहुमानपूर्वं
निद्राळुनाऽपि नियतं निहिताः कटाक्षाः ।।

(गोदास्तुतिः-११)

चूडापदेन परिगृह्य तवोत्तरीयं मालामपि त्वदलकैरधिवास्य दत्ताम्।
प्रायेण रङ्गपतिरेष बिभर्ति गोदे सौभाग्यसंपदभिषेकमहाधिकारम्।।

(गोदास्तुतिः १८)

रङ्गपतेः सौभाग्यं संपदभिषेकमहाधिकारस्य निदानभूतेति भावयन्ति।

रङ्गेश्वरस्य तव च प्रणयानुबन्धात्
अन्योऽन्यमाल्यपरिवृत्तिमभिष्टुवन्तः।
वाचालयन्ति वसुधे रसिकास्त्रिलोकीं
न्यूनाधिकत्वसमता विषयैर्विवादैः।।

(गोदास्तुतिः २१)

आर्द्रापराधिनि जनेऽप्यधिरक्षणार्थं
रङ्गेश्वरस्य रमया विनिवेद्यमाने।
पार्श्वे परत्र भवती यदि तत्र नासीत्
प्रायेण देवि वदनं परिवर्तितं स्यात्।।

(गोदास्तुस्तिः २४)

इत्यादिस्थलेषु गोदाश्रीरङ्गनाथयोः अन्योऽन्यप्रेमप्रकर्षसम्बन्धः भक्त-वात्सल्यपद्धतिः शेषशेषिभावसम्बन्धः बहुधा निरूपितवन्तः। श्रीपराशर-भट्टार्याणां यथा श्रीरङ्गपतिः तद्वत् गोदादेवी श्रीरङ्गनायकी जननी सञ्जाता। अत एव अस्याः श्रीसूक्तिमर्माः स्वकीयेषु प्रबन्धेषु वारं वारं श्रीपराशराः उट्टङ्कितवन्तः।

श्रीमद्यामुनमुनेः श्रीरङ्गानुभवः (९५३A.D.)

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम्।
स्तोत्रयामास योगीन्द्रः तं वन्दे यामुनाह्वयम्।।
यत्पादाम्भोरुहध्यानविध्वस्ताशेषकल्मषः।
वस्तुतामुपयातोऽहं यामुनेयं नामाम्यहम्।।
नमो नमो यामुनाय यामुनाय नमो नमः।
नमो नमो यामुनाय यामुनाय नमो नमः।।

श्रियःपतिस्तु सर्वेषां माता पिता धाता च भवति। स एव हितमभिवाञ्छति। श्रुतिस्मृतिर्ममैवाज्ञेति भगवद्वचनमश्रद्धधानाः स्वेच्छया महान्धकारभूयिष्ठे संसारमण्डले व्यवह्रियमाणाः मानवाः पुनः पुनः गृहीतनानाजन्मपरम्पराः श्रान्ताः तप्ताश्च भवन्ति स्म। अत एतेषां भगवन्मुखविकासमन्तरा नैको मोक्षोपयः चकास्ति इत्ययं विषयः सर्वविदित एव। अतः भगवतः हृदयसन्तुष्टिः सम्पादनीयता भवति। यद्यपि भगवतः सन्तुष्ट्यै सत्स्वपि श्रवणमननाद्युपायेषु, ते अन्ये चोपायाः निर्धूतकल्मषानां महाभागानामेव साध्या भवन्ति। सन्तत-संसारचक्रबंभ्रम्यमाणजनानामदृष्टसन्तरणोपायानां स्थितिमवलोक्य दयापरवशाः पूर्वाचार्याः सर्वानपि भगवत्कटाक्षपूर्णान् परिकल्प्यमाणाः स्तोत्रं नामाद्भुतोपायमाविश्चक्रुः । भगवतः स्तोत्रसंकीर्तने जात्यादिनियमो वा कर्माङ्गभूतप्रायश्चित्तो वा नास्ति। सर्वेषां सर्वत्र सर्वदा प्रसन्नधिया स्तोतुं सुलभमार्गेति कृत्वा स्तूयमानसमये एव कश्चन विलक्षणभक्तिविशेषो मनसि प्रादुर्भूय परमानन्दञ्च जनयतीति मन्वानाः आचार्याः स्तोत्राणि प्रारभन्ते। स्तोत्राणि वेदपुराणेष्वपि च समादृतानि। तत्रापि "कलौ संकीर्त्य केशवम्" इति महात्मनां वचनमुपादेयं भवति ।

यदि वयमेव स्तोत्राणि कुर्मः तत्र दोषबाहुळ्यं भवत्येव। ज्ञाना-धिकानां भक्तिप्रभाववचोभिः मिलितानि स्तोत्राणि भगवतः हृदयविकासाय शीघ्रफलप्रदानि भवन्ति । यथा भगवान् श्रीरामः - "मधुरा मधुरालापा किमाह मम भामिनी" इति श्रीरामायणे महाभक्तं

हनूमन्तं पृच्छति । मम भामिनी भक्ता मधुरा भवति । तस्याः आलापाश्च मधुरा भवन्ति । ता एव वद । ताभिरेव जीवामीति व्यनक्ति। अतः पूर्वाचार्याणां भागवतानामेव स्तेत्राणि परमात्मने प्रीतिजनकानीति सुस्पष्टम्। श्रीवैष्णवसम्प्रदाये बहूनि स्तेत्राणि ग्रथन्ते। सर्वेष्वपि स्तोत्रेषु भगवतः यामुनाचार्येणानुगृहीतं स्तोत्ररत्नं निरुपमानं निस्समाभ्यधिकञ्च भवति। द्रमिडभाषायाम् आळ्वन्दार् स्तोत्रम् इत्यामनन्ति। आळ्वन्दर्पदस्य रक्षकः इत्यर्थः। श्रीयामुनाचार्याः ईश्वरमुनेः पुत्राः। नाथमुनेः पौत्राः भवन्ति। बाल्यात् प्रभृति सुनिशितप्रतिभावन्तः स्वतर्कवादपटिमाप्रागल्प्यात् पण्डितम्मन्य-मानमहंकराभूयिष्टं विद्वज्जनकोलाहलं पराजित्य राज्ञाभिषिक्ताः श्रीराममिश्रमहाभागवतकटाक्षेण पुनः श्रीरङ्गनाथं कुलदैवतं महानिधिमुपलब्धवन्तः। अवाङ्मनसगोचरं भगन्तं भक्तिरसेन मधुरातिमधुरं स्तोत्रयामासुः। अस्मिन् स्तोत्रे प्रत्यक्षरं प्रतिपदं प्रतिभावञ्च साभिप्रायरसनिर्भरं मनोहरञ्च भवति। श्रवणमात्रेणं आर्द्रीकरोति चेतः। श्रीयामुनाचार्याणामनन्तरकालीना भगवन्तः रामानुजाचार्याः श्रीकूरेशमिश्राः श्रीपराशरभट्टाः श्रीवेदान्तदेशिक-चरणाश्च स्तोत्रमेनं बहुधा कीर्तयन्ति स्म। श्रीवैष्णववाङ्मये सर्वत्रापि श्रीयामुनदेशिकस्तोत्रमेव परमप्रामाण्येन अङ्गीक्रियते। अत्र प्रतिपादितशब्दार्थाः यथातथं श्रीरामानुजाचार्यादिमहाभागवत-शिखामणिभिः समादृतानि स्तोत्रेणानेनापरिचितः श्रीवैष्णवः न भवतीति वचनं न सत्यदूरम्। एते च मधुजिदङ्घ्रिसरोजतत्त्वज्ञानानुराग-महिमातिशयान्तसीम्नं पितामहं नाथमुनिं प्रणम्य श्रीपराशरमहर्षीन् महोपकारकान् प्रणमन्ति। श्रीमतां नाथमुनीनां उपदेष्ठारः श्रीशठकोपमुनयः इति कृत्वा तेषां कुलपतेरङ्घ्रियुगळं नंमन्ति।

यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति यस्मिन्
अस्मन्मनोरथपथस्सकलस्समेति।
स्तोष्यामि नः कुलधनं कुलदैवतं तत्
पादारविन्दमरविन्दविलोचनस्य।। (स्तोत्ररत्नम् ६)

इति श्रीरङ्गनाथं मनसि निधाय स्तुवन्ति स्म।

स्वाभाविकानवधिकातिशयेशितृत्वं
नारायण त्वयि न मृष्यति वैदिकः कः।
ब्रह्मा शिवश्शतमखः परमस्वरा-
डित्येतेऽपि यस्य महिमार्णवविप्रुषस्ते।।

इत्यस्मिन् श्लोके जगज्जन्मादिकाराणत्वं स्वामित्वं श्रीमन्नारायण-स्यैवेति वदन्तः केचन ब्रह्मरुद्रादिदेवतान्तराणां परत्वमस्तीति. भ्रमन्ति, तेषां भ्रमनिवारणाय भगवति श्रीमन्नारायणे "स्वाभाविकानवधिकाति-शयेशितृत्वम्" स्थापयन्ति। "स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमः स्वराट्" इति वेदवाक्यमत्र श्लोके स्थापयन्ति। ये च श्रीमन्नारायणस्य सर्वस्वामित्वम् ऐश्वर्यं न सहन्ते ते सर्वदा वेदबाह्या इति वदन्ति। अपरञ्चायं श्लोकः-

कः श्रीः श्रियः परमसत्त्वसमाश्रयः कः
कः पुण्डरीकनयनः पुरुषोत्तमः कः।
कस्यायुतायुतशतैककलांशकांशे
विश्वं विचित्रचिदचित्प्रविभागवृत्तम्।।

श्रीमन्नारायणस्यैव परत्वमस्ति। नान्येषामिति स्थापयन्ति। श्रीगुणरत्न-कोशे पराशरभट्टार्यैरपि

वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि..........................।
....यत्पादचिह्नैस्तरन्ति।

इत्यादिषु परत्वसाधनेषु श्रियःपतित्वं प्रथमलक्षणमिति तच्च भगवति श्रीमन्नारायणे पर्यवसतीति निश्चप्रचमवादि । महालक्ष्म्याः अपि श्रीकरः कः? परमसत्त्वसमाश्रयः कः? पुण्डरीकनयनः कः? पुरुषोत्तमः कः? कस्यायुतायुतशतैककलांशकांशे विश्वं चिदचित्प्र-विभागवृत्तं चकास्तीति आनन्दाश्चर्यातिशयेन भगवद्गुणपारवश्येन स्तुवन्ति। शुद्धसत्त्वरूपः भगवान् कः? रजस्तमगन्धविरहितः श्रीमन्नारायणः एक एवेति स एव पुण्डरीकाक्ष इति छान्दोग्योपनिषदि च "तस्य यथा कप्यासं पुण्डरीकमेवाक्षिणी" इति पुण्डरीकाक्षत्व-परत्वचिह्नेन प्रतिपादितम्।

एतच्च नान्येषां चिह्नमिति कृत्वा श्रीमन्नारायणः पुरुषोत्तमत्वचिन्हभूयिष्ठः इति स्थापयन्ति। हे नारायण! त्वमेव श्रियः श्रीः, त्वमेव परमसात्त्विकः, त्वमेव पुण्डरीकाक्षः, त्वमेव सर्वव्यापकः भवसि। अतः त्वमेव परतत्त्वमिति स्तुवन्ति। ब्रह्मरुद्रादित्यादि-सकलदेवताः भगवति एकदेशे सन्तीति श्रीमद्भगवद्गीतायां विश्वरूपाध्याये आश्चर्यचकितोभूत्वाऽर्जुनः वदति। अयं च श्लोकः भगवद्रामानुजाचार्याणां प्रियतमः भवति। विद्याभ्यासकाले रामानुजाचार्याः अद्वैतगुरुं यादवप्रकाशं कप्यासशब्दार्थे विवदन्ते स्म।

कस्योदरे हरविरिञ्चिमुखप्रपञ्चः
..............................।
....
कः केनेवैष परवानिति शक्यशङ्कः।।

हंरविरिञ्चिमुखप्रपञ्चः कस्योदरेऽस्ति? इमं कः रक्षति? कस्य नाभेः प्रपञ्चः अजनिष्ठ? त्वदन्यः कः इमं लेकं क्रान्त्वा निगीर्य पुनरुद्गरति? एषः केन वा परवानिति शक्यशङ्कः? "नैवासुर-प्रकृतयः प्रभवन्ति बोद्धुम्" इत्यादिषु यो नारायणानुवाक-सुबालोपनिष-दन्तर्यामिब्राह्मणादिषु सर्वत्र प्रसिद्धः देव इति प्रतिपादितः तं व्यास-पराशर-वाल्मीकि-मनु-याज्ञवल्क्य-शौनकापस्तम्ब-दिव्यसूरि-प्रभृतयः परमार्थवेत्तारः जानन्ति। एवंस्थिते चेतनोज्जीवनमार्गे, तच्च विहायासुरप्रकृतयः दुर्दैवात् भ्रष्टाः भवन्ति। तमादिदेवं न जानन्ति।

मायाबलेन भवतापि निगुह्यमानं
पश्यन्ति केचिदनिशं त्वदनन्यभावाः।।

महात्मनः केचित् सुकृतिनः धन्याः परत्वस्वरूपं मायाबलेन भवता निगुह्यमानमपि सदा पश्यन्तीति ज्ञापयन्ति। "अहं वेद्मि महात्मानम्" इति विश्वामित्रादयः श्रीरामायणे महाभारते च पुण्यात्मनः भीष्मप्रभृतयः "श्रीकृष्णं च" दर्शितवन्तः। एवमेव प्रतिदिनसम्पूज्यमानं श्रीरङ्गनाथम् अनन्तकल्याणगुणाकरमिति स्तुवन्ति।

वशी वदान्यो गुणवान् ऋजुश्शुचिः

मृदुर्दयालुर्मधुरः स्थिरस्समः।
कृती कृतज्ञस्त्वमसि स्वभावतः
समस्तकल्याणगुणामृतोदधिः।।

अस्मिन् श्लोके आभिगामिकगुणमुखेनैव सौलभ्यमुच्यते। यथा विभूत्यानन्त्यमुक्तम् अथात्र गुणानन्त्योक्तिः । गुण्यते इति गुणः। अभ्यसनीयः आनुकूलतमत्वेन शीलनीयः इत्यर्थः। ईदृशत्वं सौशील्यस्य गुणान्तरेभ्यः समाधिकम् इदं च "महतो मन्दैस्सह नीरन्ध्रसंश्लेष-स्वभावत्वम्" । तदेतत् गुह-शबरि-गोपालादिवृत्तान्तेषु प्रसिद्धम्। "समस्तकल्याणगुणात्मकोऽसौ तेजोबलैश्वर्यमहावबोधः" इत्यादिक-मिहानुसन्धेयम्। अत्र कल्याणगुणशब्देन निर्गुणश्रुतीनां उत्सर्गाप-वादनीत्या हेयगुणविषयत्वसूचनात् कल्याणगुणकार्त्स्न्यवचनाच्च निर्गुणवादः परिमितगुणवादश्च निरस्तः। "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामानिति दहरविद्योक्तन्यायात् कामशब्दः इह कल्याणगुणपरः।

इग्गुणं कळेल्लां अर्चावतारत्तिले।
काणलामो वेन्न अरुळिच्च्येय्किरार इवैयेल्लामेन्नुतुडंकि।।
"इवै येल्लां नमक्कु नम्बेरुमाळ् पक्कलिले काणलाम्।"[1]

एते च गुणाः सर्वेऽपि श्रीरङ्गनाथस्य (उत्सवमूर्तिन) समीप एव द्रष्टुं शक्यन्ते। सर्वमपि स्तोत्ररत्नं श्रीरङ्गनाथस्तुतिरूपं सत् द्वयार्थगर्भं भवति। एतावता शब्दतो अर्थतश्च द्वयमन्त्रपूर्वखण्डोऽपि प्रत्यभिज्ञापितः। स्तोत्रे प्रतिपाद्यं भगवत्सम्भाषणमपूर्वं हृद्यं भवति। एते च श्रीरङ्गनाथसेवां कुर्वन्तः स्वदिव्यदेहावसानपर्यन्तं श्रीरङ्गक्षेत्र-मधिवसन्तः श्रीवैष्णवसिद्धान्तस्थापने कृतभूरिपरिश्रमाः भगवन्तं

---

[1] [मुमुक्षुप्पडि। द्वयमन्त्रप्रकरणम् १८८page तिरुमन्त्रर्थमु आन्ध्रतात्पर्यमु। पिळ्ळैलोकाचार्याणां मणवाळ महामुनुलानतिच्चिन तिरुक्कैडन्दै श्रीमान् ति. चक्रपाणि अय्यवार्लगारु।]

श्रीरामानुजाचार्यं श्रीविशिष्टाद्वैतसिद्धन्तप्रचाराय दर्शननिर्वाहकत्वेन चादिष्टवन्त:। स्वस्तोत्ररत्नमहाप्रबन्धस्यान्ते

"अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधिमात्मवन्तम्।
पितामहं नाथमुनिं विलोक्य प्रसीदमद्वृत्तमचिन्तयित्वा।।

इत्यस्मिन् श्लोके हे श्रीरङ्गनाथ! मद्वृत्तमचिन्तयित्वा अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधिमात्मवन्तं विद्यया जन्मना पितामहं नाथमुनिं श्रीरङ्गनाथेति त्वन्नामधारिणं त्वदेकमननशीलं विलोक्य प्रसीदेति शरणमुपगतवन्त:। अथान्तिमे स्वपरगतेषु स्वरक्षणहेतुषु भगवत्कटाक्षविशेषजनितसदाचार्यसम्बन्ध एव प्रधानतम इति निर्धार्य तदधीनभगवत्प्रसादेन निर्भय: प्रहृष्टश्चासीत्। यामुनार्या: श्रीरङ्गैकप्रवणा: श्रीरङ्गायत्तचित्ता: श्रीरङ्गैकधना: श्रीरङ्गनाथं अतृप्तामृतमिवास्वादितवन्त: इत्येतेषां परम्परायामेव भगवद्रामानुजाचार्या: कूरेशमिश्रा: श्रीपराशरभट्टार्याश्च अन्तर्गता: श्रीरङ्गं श्रीरङ्गनाथमनुभूतवन्त:। अत एव श्रीरङ्गराजस्तवे पूर्वशतके चतुर्थश्लोके

विधाय वैदिकं मार्गमकौतस्कुतकण्टकम्।
नेतारं भगवद्भक्ते: यामुनं मनवामहे।।

श्रीरामानुजमुनिदेशिकं महापूर्णगुरुं तदाचार्यं यामुनमुनिं श्रीपराशर प्रणमन्तीति समञ्जसम्।।

भगवद्रामानुजाचार्याणां श्रीरङ्गानुभव: -
[कलि ४११८, १०१७-११३७A.D. April ४]

पुण्याम्भोजविकासाय पापध्वान्तक्षयाय च।
श्रीमानाविरभूद्भूमौ रामानुजदिवाकर:।।
पाषण्डद्रुमषण्डदावदहनश्चार्वाकशैलाशनि:
बौद्धध्वान्तनिरासवासरपति: जैनीभकण्ठीरव:।
मायावादिभुजङ्गभङ्गगरुडस्त्रैविद्यचूडामणि:
श्रीरङ्गेशजयध्वजो विजयते रामानुजोऽयं मुनि:।।
प्रणामं लक्ष्मणमुनि: प्रतिगृह्णातु मामकम्।

येन विश्वसृजो विष्णोरपूर्यत मनोरथः ।।
[यतिराजसप्ततिः १०]

श्रीमद्रङ्गपतिश्च वेङ्कटपतिः श्रीवारणाद्रेः पतिः
श्रीयद्वद्रिपतिश्च केचन तथा दिव्यस्थलाधीश्वराः ।
आचार्यश्च स यामुनो मुनिवरः श्रीशैलपूर्णस्तथा
श्रीरामानुजसंयमीन्द्रगुरवे तादृक् प्रसादं ददुः ।।[1]

श्रीवैष्णवसम्प्रदायस्य "रामानुजदर्शनम्" इति नाम भगवता श्रीरङ्गनाथेनैवानुगृहीतमिति अहो श्रीमद्रामानुजार्यवैभवः ! अयं च विषयः श्रीसुन्दरजामातृमुनयः स्वकीये "उपदेशरत्तिनमालै" द्राविड-प्रबन्धे एम्बेरुमानर् दर्शनमेन्रे इदुक्कु नम्बेरुमाळ् पेरिट्टु नाट्टिवैत्तार् । अम्बुवियोर् इन्ददर्शनत्तै एम्बेरुमानार् वळर्त अन्दच्चेयलरिक्क ।।
[उपदेशरत्मालै ३८]

अस्याः गाथायाः संस्कृतछायां श्रीमद्भिः उ.वे. प्रतिवादिभयङ्कर-अण्णङ्गराचार्यस्वामिभिः अनुगृहीतामालोकयन्तु ।

अस्योचितां परमवैदिकदर्शनस्य
रामानुजार्यरचितोपकृतिं कृतज्ञः ।
रङ्गेश्वर प्रथयितुं रचयाञ्चकार
रामानुजस्य मतमित्यभिधानमस्य ।।

श्रीविशिष्टाद्वैतसिद्धान्तस्तावत् श्रीरामानुजकपोलकल्पितेति नूतन-सम्प्रदाय इति चाज्ञानेनोच्यन्ते। तेषां समाधानाय गाथेयं प्रकाशिता। श्रीविशिष्टाद्वैतसम्प्रदायः परमवैदिकः एव। अनादिकालात् प्रवृत्तः चकास्ति। जगति ख्यातयशसां शुचीनां युक्तानां गुणपुरुषतत्त्व-स्थितिविदां निसर्गादेवाच्युतचरणकमलैकान्तमनसां श्रीमन्नाथ-यामुन-यतिवर-लोकाचार्य-वरवरमुनीन्द्रादिसदाचार्यदैवतकसत्सम्प्रदायसौरभ-समृद्धेऽन्वये समुदपद्यामहीति यत्तदिदं सत्यं सर्वेषामपि भाग्यानामुपरि

[1] [श्लोकोऽयं वरदविष्णुमहागरुभिः अनुगृहीत श्रीरामानुज वैभवहेतुःश्लोकः ।
An Austrology of Bhagavad Ramanuja.

विराजते।एवंभूतश्रीरामानुजदर्शनस्य संस्कृतद्राविडभेदभिदुरे पूर्वाचार्य-सूक्तिवर्गे सहस्रशाखाद्राविडब्रह्मसंहिता प्राधान्यमाटीकते।

यो नित्यमच्युतपदाम्बुजयुग्मरुक्‍-
मव्यामोहतस्तदितराणि तृणाय मेने।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो
रामानुजस्य चरणौ शरणं प्रपद्ये।।[1]

इति द्रविडवेदाध्ययनप्रबन्धकाले श्रीकूरेशमिश्रानुगृहीतमिमं श्लोकं पठन्ति भक्तजनाः। एवमेव भगवन्तः श्रीशठकोपमुनयः तिरुवाय्मोजि-महाप्रबन्धे पञ्चमशतके द्वितीयदशकं प्रारभमाणाः-

पोलिग पोलिग पोलिगपोयित्तुवल्लुयिरच्चावम्
नलियुम् नगरमुम् नैन्दनमनुक्किङ्गु यादोन्रमिल्लै।
कलियुम् केडुम् कण्टुकोण्मिन् कडल्वण्णम् पूदङ्गळ् मनन्मेले
मलियप्पुगुन्दिशै पाडियाडियुतरुक्कण्डोम् ।।
[तिरुवाय्मोजि ५-२-११]

इत्यस्यां गाथायां भविष्त्कालश्रीवैष्णवभागवतगोष्ठ्याः मङ्गळाशासनं प्रणीताः। आगामिनिकलौ भूलोके श्रीवैष्णवाः भगवद्गुणगानं कीर्तयन्तः परवशाः यथेच्छं सञ्चरिष्यन्तीति कलियुगः कृतयुगेन विवर्तनं भवेदिति "पोलिगपोलिगपोलिग", "वर्धताम् वर्धताम् वर्धताम्" इति आशंसित-वन्तः। अस्यां गाथायां भगवद्रामानुजाचार्यावतारं सूचितवन्तः इति पूर्वाचार्याः स्वस्वतिरुवाय्मोजिमहाप्रबन्धव्याख्यानवेलायां उदघोषयन्[2]। श्रीमन्नम्माळ्वार्मङ्गळाशासनस्थविषयभूताः मधुरकवि-नाथमुनि-

---

[1]द्रविडवेदे प्रार्थनाश्लोकः। कूरेशमिश्रैः अनुगृहीतः प्रसिद्धः नित्यानुसन्धाने द्वितीयः श्लोकः।।

[2]आळ्वन्दारस्वामिपादानां निर्वाहानुसारं तिरुमलैयाण्डान् निर्वाहानुगुणञ्च "आळ्वारुडय श्रीवैष्णव श्रयैक्काण्डैक्काग नित्यसूरिगळिङ्गेवर, अवर्गळै मङ्गळाशासन पण्णुगिरार् ।

प्रभृतिश्रीमद्रामानुजाचार्यपर्यन्ता वैष्णवगोष्ठीनिर्वाहकाः, रामानुजदासाश्चस्यां गोष्ठ्यामन्तर्भवन्ति। तृतीयगाथायां

"करियमुगिल्वण्णनेम्मान् कडल्वण्णन् पूदङ्गळ् मण्मेल्।।"

इत्यत्र व्याख्यानावतारिकायां "नित्यसूरिगळुम्पुगुन्दु परिमारलाम्पडि संसारमडैय श्रीवैष्णवरगले व्यापित्ताल्।।" इति लीलाविभूतिं द्रष्टुं नित्यसूरिगणा यथा परमानन्दं भजन्ते तथा श्रीवैष्णवाः आचरन्त इति अनुगृहीताः। श्रीमन्तः शठकोपमुनयः भूतभविष्यद्वर्तमानज्ञानसम्पन्नाः भवन्ति। अनेन कारणेन एतेषां मङ्गळाशासनानि रामानुजदासगोष्ठीं प्रत्येवेति निर्णेतुं शक्यते। अस्मिन् दशके नञ्जीयर्महाशया अपि व्याख्यानमनुगृहीतवन्तः।

"नाम् एम्बेरुमानार् स्थितिगमनशयनादिगळै कोण्डाडिनार्पोलेयुम्"

इति भगवद्रामानुजाचार्याणां स्थितिगमनशयनादीन् यथा पूजयामः तथेति वदन्ति। "कलियुम् केडुम् कण्डुकोण्मिन्" इत्यत्र शठारेः दिव्यसूक्तयः नम्माळ्वार् स्वामिभिः श्रीनाथमुनेभ्यः ते च पुण्डरीकाक्षेभ्यः ते यामुनमुनेभ्यः, तेभ्यः पेरियनम्बिमहाशयाः अधिगतवन्तः। ते च गाथानां ध्वन्यार्थाः, श्रीरामानुजार्यविषये अन्तर्भवन्तीति निर्धारिताः। एवं निर्धारितं भगवद्रामानुजावतारज्ञानं तत्समकालिकेभ्यः श्रीकूरेश-गोविन्द-पराशरभट्टार्येभ्यः उपदिष्टाः तेभ्यः नञ्जीयरमहाशयाः लोके विस्तृतरूपेण कटाक्षितवन्तः। तदनु मणवाळमहामुनयः (मैसूर्नगरे सालग्रामक्षेत्रम् जन्मस्थलम्) सुन्दरजामातृमुनीन्द्राः यतीन्द्रप्रवणाः भूत्वा आर्तिप्रबन्ध-उपदेशरत्नमाला-यतिराजविंशत्यादिग्रन्थेषु रामानुजवैभवं विशदयामासुः। श्रियःपतेः निर्हेतुकजायमानकटाक्षपूर्णपात्राः आदिशेषांश-स्वरूपाः भूतपुर्यां श्रीपेरम्बुदूर्नाम पुण्यक्षेत्रे पुण्यदम्पत्योः कान्तिमती-केशवसोमयाजिनोः पुत्रत्वेन दिव्यजन्मना अवातरन्।

ततो जगन्मङ्गळपिङ्गळाब्धे चैत्राख्यशुक्लच्छदपञ्चमीके।
आर्द्राभिदर्क्ष्येण युते च वारे बृहस्पतेस्सन्मृगराज लग्ने।।
वेदान्तसिद्धान्तसमर्थनाय बाह्यन्तरभ्रान्तमतापुनत्यै।

शेषांशकः केशवयज्वदेव्यां तेजोनिधिः कश्चिदिहाविरासीत्।।[1]

(यतिराजवैभवम्)

एतेषाम् अवतारकालः क्री.श. १०१७ इति सर्वैः विनिश्चितम्। कालक्रमेण कृतोपनयनादिसंस्काराः वेदवेदाङ्गादिविद्यासु विनीताः तञ्जमाम्बानाम्नीं कन्यां धर्मपत्नीत्वेन स्वीचक्रुः। यादवप्रकाशाख्याद्वैतयतेः सकाशे वेदान्तविद्यामधिगन्तुं ययुः। तेनाऽद्वैतयतिना "सर्वं खल्विदं ब्रह्म" इति वाक्यस्य विपरीतार्थं प्रत्यपादीति खिन्नाः तस्य अपार्थोक्तेः यथार्थमुक्तवन्तः। अर्थसारमदर्शयन् कदाचित् श्रीकाञ्च्यां शिष्यजनपरिवाराः श्रीमन्तः यामुनार्याः रामानुजं विलोकितवन्तः। रामानुजाचार्यस्य पाठभङ्गो मा भूदित्यसंभाष्य श्रीरङ्गमापुः। स्तोत्ररत्नस्थितं -

स्वाभाविकानवधिकातिशयेशितृत्वं
नारायण त्वयि न मृष्यति वैदिकः कः।
ब्रह्मा शिवश्शतमखः परमस्वराडि-
त्येतेऽपि यस्य महिमार्णवविप्रुषस्ते।।

पेरियनम्बिद्वारा प्रेषितं श्रुत्वा यामुनार्यं दिदृक्षवः रामानुजाः श्रीरङ्गं प्रतस्थिरे। अनन्तरं यामुनार्याः समस्तरहस्यान् भगवद्रामानुजार्यैः स्वाश्रितेभ्यः पञ्चसूरिभ्यः अध्येतुमाज्ञां प्रदाय, स्वाचार्यपदं जग्मुः। देहावसाने तु तेषां मनसि त्रिविधा अतृप्तयः तथैवातिष्ठन्। अतः पार्थिवदेहे नमितमङ्गुळित्रयमिति ज्ञात्वा तत्रस्थाः मूकाः बभूवुः। तदनु रामानुजाचार्याः भगवन्तं यामुनदेशिकं तेषां मनोरथपूरणाय शपथत्रयं विज्ञापयामासुः।

अबाधितार्थैरनपाय वाचां तद्व्याससूत्रस्य यथार्थभाष्यम्।
कृत्वा यतीन्द्रो धुरियामुनार्यमनोरथं पूरितवान् स आद्यम्।।
भट्टारकं तं च पराशराख्यं कृत्वा कृतं देवसहस्रनाम्नाम्।

[1]आन्ध्रपूर्णमहागुरुभिः वटुकनमहाशयैः अनुगृहीते यतिराजवैभवकाव्ये ६,७ श्लोकौ।

भाष्यं प्रतिष्ठाप्य यामुनार्यमनोरथं पूरितवान् द्वितीयम्।।
पिळ्ळानभिख्यं कुरुकेश्वराख्यं कृत्वा तु तं तत्कृत षट्सहस्रम्।
भाष्यं प्रतिष्ठाप्य स यामुनार्यमनोरथं पूरितवान् तृतीयम्।।
(यतिराजवैभवम्, ७२, ८२, ८४)

इत्थं श्रीयामुनाङ्गुळिविमोचको भूत्वा श्रीकाञ्चीपूर्णानुगृहेण श्रीदेवराजकृपालब्धवाक्यार्थमहोदधयः सञ्जाताः। गच्छति काले वीतरागाः यामुनार्यमनोरथपूरणदीक्षादक्षाः विशिष्टाद्वैतसिद्धान्तसंरक्षणाय चेतनोद्धारणार्थं च तत्रैव देवराजसन्निधौ तृरीयाश्रमे प्रविष्ठाः त्रिदण्डकाषायशिखायज्ञोपवीतभूषिताः "यतिराजः" इति देवराज-सकाशात् स्वीकृतदिव्यनामानः महामहिमोपेताः आश्चर्यप्रभावाः पूर्वाश्रमगुरुजनानामपि स्वयं गुरुवराभूत्वा श्रीरङ्गनाथदिव्यपादसेवां च कर्तुं श्रीवैष्णवनिर्वाहकाश्च अभवन्। भगवता श्रीरङ्गनाथेन "उभयविभूतिनायकः" इति बिरुदं स्वीकृत्य विरेजुः । अतिमानुषचेष्टाः श्रीरङ्गदिव्यालयकैङ्कर्यमहाधुरन्धराः श्रीरङ्गदिव्यालयपर्यवेक्षकाः श्रीरङ्गनाथस्य उत्सवप्रबन्धगोष्ठीनिर्वाहकाश्च समभवन्। तदनु (उडयवर्) विभूतिद्वयनायकाः रामानुजाचार्याः बहुकष्टदशामापन्नाः श्रीमन्नारायणाष्टाक्षरवैभवं तिरुमन्त्रार्थं श्रीगोष्ठीपूर्णमहागुरोस्सकाशात् समधिजग्मुः। तत्रैव गोष्ठीपूर्यां नृसिंहोत्सवावसरे समागतेभ्यः भक्तजनेभ्यः श्रीमदष्टाक्षरमहामन्त्ररहस्यान् गोपुरोपरि स्थित्वा दयार्द्रहृदयेन प्रकटयामासुः। गुरोराज्ञाधिक्कारः नरकप्रवेश इति जानन्तोऽपि तेन मन्त्रेण सर्वजनानां मोक्षाधिकारो लभ्यत इति मन्वानाः आत्मनः नरकप्रवेशः परमानन्द एवेत्यमन्यन्त । तदनु गुरुवराः रामानुजाचार्याणां साहसं सहृदयतां विशालबुद्धिं सर्वजनकल्यणानुरागं च दृष्ट्वा श्रुत्वा बहुधा प्राशंसुः। इत्थं रामानुजमुनिचन्द्रमाः श्रीरङ्गनाथसेवातत्पराः यामुनदेशिकमनोरथानुगुणं श्रीभाष्यरचनां कर्तुं श्रीशैलपूर्णार्यात् चतुर्विंशतिवारं श्रीमद्रामायणं कालक्षेपमुखेन तिरुमलशैलेषु श्रुतवन्तः। बहुप्रयासेन च काश्मीरदेशं गत्वा श्रीकूरेशद्वितीयाः व्याससूत्राणां बोधायनकृत्यनुगुणं श्रीभाष्यं

श्रीवैष्णवजगत्यां निर्ममु:। वेदार्थसंग्रहः, वेदान्तदीप:, वेदान्तसार:, गीताभाष्यम्, शरणागतिगद्यम्, श्रीरङ्गगद्यम्, वैकुण्ठगद्यम्, नित्यग्रन्थाद्या: श्रीवैष्णवसम्प्रदाये रचयामासु:। कदाचित् मीनमासे उत्तरफल्गुण्यां श्रीरङ्गे भगवति श्रीरङ्गनाथे भगवत्या श्रीरङ्गनायक्या प्रोन्नतदिव्यासने विराजमाने स्वाश्रितचेतनानां उज्जीवनार्थं श्रीमन्त: भष्यकारा: दिव्यदम्पत्यो: चरणारविन्दयुगळौ शरणागतिं कर्तुं प्रायतन्त। आदौ पुरुषकारभूतां समस्तजननीं शरणमापु:। तत्रादौ शरणागति-गद्यमेव विज्ञापयामासु:। "गद्यं कवीनां निकषं वदन्ति" इति वचनं न सत्यदूरं खलु। भगवद्रामानुजाचार्या: वृत्तग्रन्थिचूर्णमुत्कलिका-प्रायरूपगद्यानि स्वकीयगद्यत्रये मधुरातिमधुरं प्रादर्शयन्। वृत्तग्रन्थिरूपेण

"उदग्रपीनां सविलम्बिकुण्डलालकावळिबन्धुरकम्बुकन्धरम्",

"प्रियावतंसोत्पलकर्णभूषण श्लथालका बन्धविमर्दशंसिभि:"

इति यामुनार्यस्तोत्रपद्यानि गद्ये भक्त्यतिशयगौरवेण विन्यस्तवन्त: वंशस्थवृत्तदानि। कुत्रचित् श्रीरङ्गनाथं चूर्णगद्यरूपेण "सत्यकाम ! सत्यसङ्कल्प! आपत्सख! काकुत्स्थ! श्रीमन्नारायण! पुरुषोत्तम! श्रीरङ्गनाथ! मम नाथ! नमोस्तु ते! कदाहं मां मम कुलधनं मम नाथं मम भोग्यं मम मातरं मम पितरं मम सर्वं साक्षात्करवाणि चक्षुषा! कदाहं भगवत्पादाम्बुजदद्वयं शिरसा धारयिष्यामि!" इति सुललित-चारुपदगुम्फितानि प्रसादगुणशोभितानि विन्यस्तानि समस्तानि पदानि मनोहराणि च भवन्ति। कदाचित् सस्वगद्यत्रये उत्कलिकाप्रायरूपेण दीर्घसमासजटिलयुतपदबन्धं निबध्नन्ति।

"पारमार्थिकभगवच्चरणारविन्दयुगळैकान्तिकात्यन्तिकपरभक्तिपरज्ञानपरमभक्तिकृतपरिपूर्णानवरतनित्यविशदतमानन्यप्रयोजनानवधिकातिशयप्रीतिकारिताशेषावस्थोचिताशेषशेषतैकरतिरूपनित्यकैङ्कर्यप्राप्त्यपेक्षया पारमार्थिकी भगवच्चरणारविन्दशरणागतिर्यथाविरताऽस्तु मे।।"

इति श्रीरङ्गनाथं योगिध्यानैकलब्धं परभक्तिपरज्ञानपरमभक्तियुक्तं कुरुष्वेति प्रार्थयन्ति। श्रीमन्नारायण! अशरण्यशरण्य अनन्यशरण्य: त्वत्पादारविन्दयुगळं शरणमहं प्रपद्ये इति विज्ञापयन्ति। भगवान् श्रीरङ्गनाथोऽपि "द्वयमर्थानुसन्धानेन सदैवं वक्ता यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्व! नित्यकिङ्करो भविष्यसि मा ते भूदत्र संशय:" इति अभयं दत्तवान्। पुन: श्रीरङ्गनाथं

"अन्त्यकाले स्मृतिर्या तु तव कैङ्कर्यकारिता।
तामेनां भगवन्नद्य क्रियमाणां कुरुष्व मे।।

इति शरणागतिगद्यान्ते विज्ञापयन्ति। श्रीरङ्गनाथ: परंमपदनाथ इति रामानुजाचार्याणामभिप्राय:। अत: श्रीरङ्गगद्ये "स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजस्सौशील्यवात्सल्यमार्दवार्जवसौहार्दसाम्यकारुण्यमाधुर्यगाम्भीर्यचातुर्यस्थैर्यधैर्यशौर्यपराक्रमसत्यकामस्सत्यसङ्कल्प: कृतित्वकृतज्ञताद्यसङ्ख्येयकल्याणगुणगणौघमहार्णवं परब्रह्मभूतं पुरुषेत्तमं श्रीरङ्गशायिनं अस्मत्स्वामिनं ... नित्यकिङ्करो भवानि।।

नित्यकैङ्कर्यरतिरूपनित्यदास्यं दास्यतीति विश्वासपूर्वकं भगवन्तं नित्यकिङ्करतां प्रार्थये इति शरणमभजन्। श्रीवैकुण्ठगद्यारम्भे तु सविनयं

यामुनार्यसुधाम्भोधिमवगाह्य यथामति।
आदाय भक्तियोगाख्यं रत्नं सन्दर्शयाम्यहम्।।

श्रीवैकुण्ठमत्यद्भुतं ज्ञानचक्षुषा दिव्यहृदयेन दृष्ट्वा मनसाध्यात्वा स्वयं परमानन्दमनुभवन्त: तं वेदान्तवेद्यं ज्ञानैकगम्यं मांसचक्षुषोरगोचरं नित्यमुक्तानुसेव्यमानपादारविन्दं समस्तपण्डितपामरजननयनगोचरमकुर्वन् भगवत: स्वरूपं कथं भवति? श्रीवैकुण्ठं कथं प्रकाशतेति श्रीमन्नारायणस्य दिव्यासनदिव्यायुधदिव्याभरणदिव्यारामादय: कथं भवन्तीति दर्शयन्त: कथं प्रार्थना शरणागति: कर्तव्येति च शरणागते: भगवान् किं समाधानं दास्यति कथं वा पादारविन्दयुगळसेवामनुगृण्हातीति प्रपन्नजनानां कर्तव्यं किमिति द्वयमर्थानुसन्धानेनैव

किमर्थं करणीयमिति सर्वं स्वध्यानप्रपञ्चे यत् दृष्टवन्तः तत्सर्वं गद्यत्रये प्रत्यपादयन्। आश्चर्यमाश्चर्यं रामानुजाचार्याः दूरदर्शिनीभूताः श्रीवैकुण्ठं सर्वजननयनयोः साक्षात्कृतवन्तः।

लक्ष्मीपतेः यतिपतेश्च दयैकधाम्नोः
योऽसौ पुरा समजनिष्ट जगद्धितार्थम्।
प्राप्यं प्रकाशयतु नः परमं रहस्यं
संवाद एष शरणागतिमन्त्रसारः।।

इति परिसमाप्तौ गद्यत्रये परिदृश्यते। तिरुनारायणपुरे यदा यतीशानः विरेजिरे तस्मिन् समये भगवद्रामानुजाचार्याः

"श्रीमन् श्रीरङ्गश्रियमनुपद्रवामनुदिनं संवर्धय।
श्रीमन् श्रीरङ्ग श्रियमनुपद्रवामनुदिनं संवर्धय।।

इति वाक्यरत्नं द्विवारं पठन्ति स्म इति महान्तश्च वदन्ति। अतः अधुनापि रामानुजीयाः स्वस्वदिव्यदेशेषु गृहेषु प्रतिदिनं उपरितनवाक्यं तीर्थविनियोगवेलायां पठन्ति। इदं वाक्यं पद्यछायात्मकं मधुरं गुञ्जति। आश्रितजनोभ्योऽपि परमानुग्रहलाभाय शरणागतिं कृतवन्तः। अत एव अस्माकं श्रीपराशरभट्टार्याः स्वकीयश्रीरङ्गराजस्तवे श्रीरामानुजमुनिं एवं स्तुवन्ति-

रामानुजमुनिर्जीयात् यो हरेः भक्तियन्त्रितः।
कलिकोलाहलक्रीडमुथाग्रहमपाहरत्।।
श्रीरङ्गं करिशैलमञ्जनगिरिं तार्क्ष्याद्रिसिंहाचलौ
श्रीकूर्मं पुरुषोत्तमं च बदरीनारायणं नैमिशम्।
श्रीमद्वारवतीप्रयागमधुराऽयोध्यागयाः पुष्करं
सालग्रामगिरिं निषेव्य रमते रामानुजोऽयं मुनिः।।
(श्रीपराशरार्याणां श्रीरङ्गनाथस्तोत्रम्).

पुरा सूत्रैर्व्यासः श्रुतिशतशिरोऽर्थं ग्रथितवान्
विवव्रे तं श्राव्यं वकुळधारतामेत्य स पुनः।
उभावेतौ ग्रन्थौ घटयितुमलं युक्तिभिरसौ
नर्जज्ञे रामावरज इति स ब्रह्मकुमारः।।

(श्रीपराशरभट्टार्याणां मुक्तकम्)

[रामानुजस्तुतिपद्यानि]

श्रीवेदान्तदेशिकसार्वभौमाः अपि भगवद्रामानुजाचार्याणां विषये स्वकीये यतिराजसप्ततिमहाप्रबन्धे रङ्गनाथभक्तजनमानसराजहंस इति रामानुजं कीर्तयन्ति।

मूले निविश्य महतां निगमद्रुमाणां
मुष्णन् प्रतारकभयं धृतनैकदण्डः।
रङ्गेशभक्तजनमानसराजहंसो
रामानुजः शरणमस्तु मुनिः स्वयं नः।।
(यतिराजसप्ततिः २२)

एवमेव श्रीवरवरमुनितल्लजाः स्वयतिराजविंशतिस्तवे --

श्रीरङ्गराजचरणाम्बुजराजहंसं
श्रीमत्पराङ्कुशपदाम्बुजभृङ्गराजम्।
श्रीभट्टनाथपरकालमुखाब्जमित्रं
श्रीवत्सचिह्नशरणं यतिराजमीडे।।
(यतिराजविंशति)

वादभीकरमहागुरवः श्रीरामानुजसुप्रभाते -

"श्रीरङ्गराजपदपङ्कजयोरशेष-
कैङ्कर्यमाकलयितुं सकुतूहलस्त्वम्।।"

श्रीभगवद्रामानुजभागिनेयसद्वंशमुक्तामणिः विल्लर् नडादूर् वेङ्कट-शेषार्याः स्वकीये यतिपतिषण्णवतिमहाप्रबन्धे वसन्ततिलका वृत्ते -

श्रीरङ्गराजदयिता सह संभवाय
श्रीदेवराजहृदयङ्गमनीरदाय।
श्रीश्रीनिवासधरणीधरविग्रहाय
सम्पत्कुमारजनकाय नमो नमस्ते।।

इत्थं भगवाद्रामानुजार्याः पूर्वाचार्यैरर्वाचीनाचार्यैश्च श्रीरङ्गनाथेन च सर्वत्र श्रीवैष्णवभागवतशिखामणिभिः संस्तुतः। श्रीरङ्गराजविंशत्यां

"रामानुजाख्ययतिवल्लभ भागधेय

रङ्गेश सिन्धुतनया प्रिय मङ्गळं ते।।"

(श्रीरङ्गराजविंशतिः-१८)

श्रीपराशरभट्टारकाणां नामकरणदक्षाः श्रीरङ्गकैङ्कर्यशालिनः श्रीरङ्गनाथभोग्यभूताः श्रीरङ्गपीठाध्यक्षाः श्रीरङ्गनाथपरदैवताः नितरां जयन्ति। एतेषां श्रीरङ्गेन श्रीरङ्गनाथेन चानुभवः वाचामगोचर एव। अस्मिन् महाप्राकारनिर्माणे श्रीरङ्गनाथेऽनुभवः महत् प्राधान्यं भजते।।

श्रीपराशरार्याणां श्रीरङ्गानुभवः -

श्रीवैष्णवसम्प्रदाये भगवद्रामानुजाचार्याणामनन्तरकाले श्रीवैष्णवगोष्ठी-निर्वाहकेषु श्रीपराशरार्याः नितरां प्राधान्यं भजन्ते। एते भक्तिज्ञान-वैराग्यसम्पन्नाः श्रीविशिष्टाद्वैतसिद्धान्तस्य महान्तमुपकारमकार्षुः। भगवद्रामानुजाचार्याणां प्रियतमान्तेवासिनां श्रीकूरेशमिश्राणां महाभागवतोत्तमानां प्रियतनूजाः। यथा श्रीकूरेशमिश्राः [कूरत्ताळ्वान्] समस्तशास्त्रेषु निशितप्रतिभासम्पन्नाः अकुण्ठितप्रज्ञापाटवाः विराजन्ते स्म, तथैव एतेऽपि महापाण्डित्यगरिमाणः भगवत्प्रसादलब्ध-दिव्यजन्मानः श्रीरङ्गदिव्यमन्दिरे बाल्यचेष्टाः कुर्वन्तः श्रीरङ्गनाथस्य पूर्वनिर्विशेषतां कुर्वन्तः पुत्रकृतकीकृताः। भगवता भाष्यकारेणैव श्रीपराशरभट्टारकेति दिव्यनाम्नानुगृहीताः। भगवत्पुत्रेति सर्वैः स्तुवन्ते स्म। अल्पे वयसि सम्प्रदायस्य अनल्पां सेवामकार्षुः। श्रीरङ्गदेवालय-कैङ्कर्यदुरन्धराः सञ्जाताः। अत एव श्रीरामानुजार्याः श्रीरङ्गामृत-कवीन्द्राणां सकाशात् । श्रीरङ्गेशपुरोहितत्वं स्वीकृत्यानुजग्रुहुः । तदारभ्य एतान्,

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः।

श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे।।

इति भागवतोत्तमाः श्रीवैष्णवसम्प्रदायस्थाः अहरहं स्तुवन्ति स्म। एते श्रीरङ्नाथं श्रीरङ्गक्षेत्रमेव स्वधारकत्वेन पोषकत्वेन च मन्यन्ते स्म। श्रीरङ्गनाथस्य दत्तपुत्राः भूमण्डले नितरां प्रशस्तिमापुः। श्रीरङ्गनाथस्य दिव्यपल्लकीपरिवृढं दिव्याभरणानि च दिव्यहाराः धृत्वा रामानुजाज्ञया

वेदान्तिनं श्रीवैष्णवानुरागपूर्णं चक्रुः। ज्ञानाधिकवृद्धाः तिरुनारायण-पुरतीरस्थाः साक्षात् श्रीरङ्गनाथः समागतवानिति एनं प्रणेमुः। श्रीरङ्गनाथविषयेऽत्यन्तस्वतन्त्राः बाल्यावस्थायां भगवते समर्प्यमाणं दिव्यान्नानि निवेदनात्पूर्वमेव स्वीकुर्वन्ति स्म। अहो पराशराणां विषये श्रीरङ्गदेवस्य पराधीनता! यथा पराशरमहर्षयः विष्णुपुराणे भगवतः परतत्त्वं विवृण्वन्, तथा एतेऽपि श्रीमहाविष्णोः दिव्यं नाममन्त्रम् अष्टाक्षराख्यं अष्टश्लोकीति रूपेणानितरसाध्यं जग्रन्थुः। श्रीपराशर-भट्टपादाः प्राचीनस्तोत्राणि स्वकीयश्रीरङ्गराजस्तवस्तोत्रद्वारा विवृण्वन्तः नितरां ख्यातिमापुः। यथा स्वपितृपादाः अर्थपञ्चकप्रतिपादनपूर्वकाणि पञ्चस्तवानि विरचयामासुः। तथा श्रीपराशरभट्टपादाः श्रीरङ्गराज-स्तवस्तोत्रं द्वयार्थप्रतिपादकत्वेन द्वयमन्त्रस्थवाक्यद्वयविवररणार्थं शतकद्वयं भगवते समर्पयामासुः। महच्चित्रं खलु। "श्रीमन्नारायणचरणौ शरणं प्रपद्ये" इति द्वयमन्त्रपूर्वखण्डस्य समस्तज्ञानावगमनाय श्रीरङ्गराजस्तवपूर्वशतकं सम्यक् प्रतिपादयति। यथा सम्प्रदाय-निष्ठावतां भगवतः शरणागतिः गुरुवन्दनपूर्वकमेव कर्तव्यतया प्रतिपादयन्ति, तद्वदेतेऽपि स्वाचार्यवन्दनादारभ्य मन्त्ररत्नप्रकाशान् पूर्वाचार्यपरम्पराप्रविष्टान् श्रीरङ्गदिव्यमन्दिरमणिमयमण्टपप्राकार-गोपुरादीन्, परिवारगणान्, मन्दिरविशेषान्, सम्प्रदायविशेषान् सम्यगवर्णयन् । पूर्वशतकपठनवेलायां सर्वमपि श्रीरङ्गक्षेत्रं, श्रीरङ्गक्षेत्रस्य देवतापरिचारकबृन्दाः कावेरीनदी, चन्द्रपुष्णरिणी, द्वादशसूरिणामनुभवः, पुन्नागवृक्षाः, गरुडभगवान्, पञ्चायुधाः, चामरग्राहिणीः, पारिजातवृक्षः, अतृप्तनयनैः श्रीमत्शब्दार्थं विवृण्वन्तीति किमिदमाश्चर्यम्! किमु वा वक्तव्यम्?

अग्रे तार्क्ष्येण पश्चादहिपतिशयनेनात्मना पार्श्वयोश्च
श्रीभूमिभ्यामतृप्त्या नयनचुळकनै सेव्यमानामृतौघम्।
वक्त्रेणाविस्मितेन स्फुरदभयगदाशङ्खचक्रैर्भुजाग्रैः
विश्वस्मै तिष्ठमानं शरणमशरणाः रङ्गराजं भजामः।।

(श्रीरङ्गराजस्तवम् - पूर्वशतके ७५)

इत्यस्मिन् श्लोके श्रीरङ्गनाथदिव्यसौन्दर्यचित्रणं तेषां दिव्यमङ्गळ-मूर्तेः कमनीयं चित्रणं ददुः। परन्तु श्रीरङ्गनाथमूलस्थाने श्रीभूमिदिव्यमहिष्योः दर्शनं, शङ्खचक्रादीनां दर्शनं नाधुना प्रत्यक्षेण साक्षात्क्रियते। कारणानि तु न जानीमः।

आर्तापाश्रयमर्थिकल्पकमसह्यागस्करक्ष्मातलं
सद्यः संश्रितकामधेनुमभियत् सर्वस्वमस्मद्धनम्।
श्रीरङ्गेशयमाश्रयेम कमलाचक्षुर्मही जीवितं
श्रीरङ्गे सुखाकरोतु सुचिरं दास्यं च धत्तां मयि।।

(श्रीरङ्गराजस्तव-पूर्वशतके ७६)

भगवान् स्वाराध्यदैवतं श्रीरङ्गनाथः आर्तानामाधारः अर्थिजनेभ्यः कल्पवृक्षः असह्यापचारकर्तॄणामपि क्षेमारूपः सद्यः समाश्रितेभ्यः कामधेनुः इति स्वाश्रितेभ्यः सर्वस्वम्, एवमेव अस्माकं धनम्

कुलधनं इति महालक्ष्म्याः चक्षुरिति भुवः प्रणनाथेति, अत एव दासजनाः वयं शरणमुपगताः इति, अत्रैव श्रीरङ्गे सुचिरं दास्यं प्राप्स्यामहे इति, भगवन्तं श्रीरङ्गनाथम् उपायत्वेन श्रीरङ्गनाथ-पादपद्मपरिचर्यैव उपेयमिति भगवद्रामानुजसिद्धान्तं स्थापितवन्तः। श्रीरङ्गशब्दश्रवणमेवालम्। आनन्दाम्बुधिनिमग्नाः भवन्ति। श्रीरङ्गनाथं हे देव! इति, पितः इति, नाथेति, रङ्गबन्धुरिति, रङ्गवल्लभेति, रङ्गिन्निति, श्रीरङ्गचन्द्रमा इति, श्रीरङ्गराजेति,. रङ्गेन्दुरिति, श्रीरङ्गाधिपतिरिति, रङ्गकलभेति, रङ्गराडिति, श्रीरङ्गमन्दिरेति, श्रीरङ्गसंसर्गेति, रङ्गेशयेति, रङ्गरङ्गेति, रङ्गकुञ्जरेति, रङ्गतुङ्गालयेति, श्रीरङ्गभर्तेति, रङ्गनिधिरिति रङ्गविन्देति, रङ्गाधिराजेति, श्रीरङ्गशायिन्निति, श्रीरङ्गधामेति, रङ्गेन्द्रसिंहेति, श्रीरङ्गकान्तेति रङ्गप्रवणेति, श्रीरङ्गजीवितेति अत्यन्तस्वातन्त्र्येण सम्बोधयन्ति। "यच्च किञ्चित् जगत्सर्वं दृश्यते श्रूयतेऽपि वा। तत्सर्वं श्रीरङ्गनाथ एव" इति तेषामभिप्रायः। श्रीरगङ्नाथं यथा शठारिदिव्यसूरिः धारकत्वेन, पोषकत्वेन, भोग्यत्वेन, अनुभूताः तद्वत् एतेऽपि श्रीरङ्गनाथमनुक्षणं सर्वत्रानुभवन्ति स्म। श्रीरङ्गनाथगुणगण-

कीर्तनमेवात्मस्वरूपम् इति श्रीरङ्गनाथ दास्यमेव सदाभिलषणीयमिति सर्वत्राचार्याणामभिप्रायः द्योत्यते । उत्तरशतके नास्तिकदर्शनखण्डनं बहुचमत्कारं कुर्वन्तः श्रीरङ्गनाथं परतत्त्वेन स्थापयन्ति। भगवच्छब्दवाच्यः श्रीरङ्गनाथः इति, जगज्जन्मादिकारणभूतः इति, भगवतः अवताररहस्यज्ञानम्, अवैदिकाः न जानीयुरिति तच्च ज्ञानं

श्रीरङ्गेश त्वद्गुणानामिवास्म-
द्दोषाणां कः पारदृश्वा यतोऽहम्।
ओघेमेघोदन्यवत्त्वद्गुणानां
तृष्णापूरं वर्षतां नास्मि पात्रम्।।

(श्रीरङ्गराजस्तवम् पूर्वशतके९४)

तव भरोऽहमकारिषि धार्मिकैः शरणमित्यपि वाचमुदैरिरम्।
इति स साक्षिकयन्निदमद्य मां कुरु भरं तव रङ्गदुरन्धर।।

(श्री.रं. उ.श.१०२)

हे रङ्गदुरन्धर धार्मिकैः आचार्यैस्तवभरः कृतोऽस्मि ।। शरणमिति वचम् अवोचम्। धार्मिकैः तव भरत्वेन करणमेव फलायालम्। पुष्कलप्रपत्तिचर्यान् पूर्वाचार्यान् इव तदीयं तदुक्तशरणागत्यनुवादकं च मां रक्षयत्वकक्षायां विनिक्षिपेदिति विज्ञापयन्ति।

श्रीरङ्गे शरदश्शतं सह सुहृद्वर्गेण निष्कष्टकं
निर्दुःखं सुसुखञ्च दास्यरसिकतां भक्ता समृद्धिं पराम्।
युष्मत्पादसरोरुहान्तररजस्स्यामत्वमम्बा पिता
सर्वं च त्वमसि त्वमेव भवनस्स्वीकुर्व कस्मात्कृपाम्।।

(श्रीगुणरत्नकोशः ६१)

इत्थं श्रीपराशरभट्टार्याः श्रीरङ्गस्य जयकेतनाः भगवद्रामानुजार्याणामाज्ञां पालयन् श्रीरङ्गेशपुरोहिताः भूत्वा श्रीरङ्गराजोत्सवदक्षाः श्रीरङ्गनाथेन लालिताः पोषिताः ब्रह्मरथमारोपिताः सदैव श्रीरङ्गदास्य रसिकतां शरदश्शतम् आशासिताः । जीवपरमात्मनोः प्रतीकारावुभौ श्रीपराशरश्रीरङ्गनाथौ शेषशेषित्वेन नवविधसम्बन्धैः चकासतः श्रीवैष्णवलोके नितरां श्रूयेते।

जयति श्रीरङ्गराजराजः। जयति रङ्गराजप्रियतनूजाः।।
आगामिनिप्राकारे श्रीपराशरभट्टार्यमहिमादीन् ज्ञास्यामः इति कृत्वाऽस्मिन् प्राकारे श्रीपराशराणां श्रीरङ्गानुभवः स्थालीपुलाक-न्यायेनानुभूतः।।

श्रीमद्वेदान्तदेशिकानां श्रीरङ्गानुभवः -

[१२६८ - १३६९A.D. विभवनामसंवत्सरे सौम्यवारे]
अब्दे सौम्ये च वारे गतवति तरणौ वृश्चिकं कृत्तिकर्षे
राकायां वेङ्कटेशो यतिनृपतिमतं सर्वतः स्थापयित्वा।
वेदान्ताचार्यसूरिः कृतसकलविधानेकदिव्यप्रबन्धाः
श्रीशैलाधीशघण्टाकृतिवपुरभजत् देशिकेन्द्रो दयालुः।।

श्रीमद्विशिष्टाद्वैतसिद्धान्तज्ञापनाय भगवद्रामानुजाचार्येण यावान् परिश्रमः कृतः, तावानेव श्रमः तत्प्रचाराय संरक्षणाय च वेदान्ताचार्याः [श्रीवेदान्तदेशिकाः] कृतवन्त इत्यत्र नास्त्यतिशयोक्तिः। विश्वामित्र-गोत्रोद्भवाः तोताम्बाऽनन्तसूरिणोः प्रियतनूजाः विभवनामसंवत्सरे १२६८ श्रीकाञ्चीपुरदिव्यक्षेत्रस्य नातिदूरे तूप्पल्नामके दीपप्रकाशसन्निधौ श्रीवेङ्कटेश्वरस्य घण्टावतारत्वेनावतारिताः। अप्रतिहतप्रतिभा-विकासमहोदयः विंशत्यब्दे विश्रुतनानाविधप्रपञ्चः" इति - "उत्प्रेक्ष्यते बुधजनैरुपपत्तिभूम्ना घण्टाहरेस्समजनिष्ट यदात्मनेति" (सङ्कल्प-सूर्योदये स्वकीये नाटके) ज्ञापितवन्तः।

प्रतिष्ठापितवेदान्तः परिक्षिप्तबहिर्मतः।
भूयाः त्रैविद्यमान्यस्त्वं भूरिकल्याणभाजनम्।।

इति महात्मानः आशीर्वचनपरम्पराभिः एधयामासुः। एते आचार्याः

यतिप्रवरभारतीरसभरेण नीतं वयः।।
निर्विष्टं यतिसार्वभौमवचसामावृत्तिभिः यौवनम्।।

इति स्वयमेव वदन्ति। गरुडमन्त्रभूषिताः कृतानुष्ठानाः तिरुवहीन्द्रक्षेत्रे भगवता गरुडेन कृपयाऽनुगृहीतहयग्रीवमन्त्रदीक्षाः नितरां वाग्वैभवेना-

चार्यकटाक्षैः विराजन्ते स्म। महापुरषाणां वेदान्ताचार्याणां वादविद्यां दृष्ट्वा सर्वेऽपि

वेङ्कटेशावतारोऽयं तत् घण्टाचाथ वा भवेत्।
यतीन्द्रांशो भवेदेवम्............................॥

इत्यपि आश्चर्यमानन्दं च प्रकटयामासुः। "विंशत्यब्दे विश्रुतनानाविद्यस्त्रिंशद्वारं श्रावितशारीरकभाष्यः" इत्यभियुक्तवचनं न सत्यदूरम्। काणाद-पाणिनीय-पातञ्जल-पूर्वोत्तरमीमांसादिसमस्तशास्त्रनिष्णाताः नालायिरदिव्यप्रबन्धरहस्यमर्मज्ञाः वेदवेदान्तविद्यापरिमळसौगन्धयः, चरमपर्वनिष्ठाशरणागतिधर्मशोभिताः, श्रीहयाननदिव्यकरुणाकटाक्षलब्धनवरसभरितादद्भुताद्भुतकवित्वसाम्राज्ययशो भूषिताः, निष्कामाः, परमवैराग्यगुणगणमण्डिताः, ब्रह्मतन्त्रस्वतन्त्राः, कवितार्किकसिंहाः, श्रीविशिष्टाद्वैतसिद्धान्तस्थापनाचार्याः सञ्जाताः। श्रीरङ्गनाथविषये दिव्यसूरिरामानुजानुभवादीन् च स्मृत्वा स्मृत्वा स्वयमपि श्रीरङ्गराजगुणाम्बुधिमवगाहमानाः नानाविधेषु शताधिकग्रन्थेषु श्रीरङ्गनाथदिव्यशरणागतिमाविश्चक्रुः। स्थालीपुलाकानुसारमेवानुभवामः। स्तोत्रविभागे दशावतारस्तोत्रं महामहिमभूयिष्टं भवति । तत्र दशावताराः सर्वेऽपि श्रीरङ्गनाथस्यैवेति वदन्तः,

देवो नः शुभमातनोतु दशधा निर्वर्तयन् भूमिकां
रङ्गे धामनि लब्धनिर्भररसैरध्यक्षितो भावुकैः।
यद्भावेषु पृथग्विधेष्वनुगुणान् भावान् स्वयं बिभ्रती
यद्धर्मैरिह धर्मिणी विहरते नानाकृतिर्नायकः॥

(दशावतारस्तोत्रम् -१)

भगवान् श्रीरङ्गनायकः एव दशधा विहरत इति जगन्नाटके प्रधाननायको भवतीति भावयन्ति। अथ भगवद्ध्यानसोपाननामके स्तोत्रे

लक्ष्मीभूम्योः करसरसिजैर्लालितं रङ्गभर्तुः।
पादाम्भोजं प्रतिफलति मे भावनादीर्घकायम्॥

(भगवद्ध्यानसोपाने-२)

अहो! रङ्गभर्तृः पादाम्भोजं भावनादीर्घकायां लक्ष्मीभूम्योः करसरसिजैर्लालितं प्रतिफलतीति चमत्कृतवन्तः। "रङ्गास्थाने रसिकमहिते शिञ्जिताशेषचित्ते" इति श्रीरङ्गनाथं भगवद्ध्यानसोपानेन भक्तजनसुलभमकुर्वन्। अभीतिस्तवे तु -

"रमासखमधीमहे किमपि रङ्गधुर्यं महः ।" इति,

"तदप्युचितमर्चनं परिगृहाण रङ्गेश्वर ।"

इति स्वार्चनं भगवते श्रीरङ्गायोचितमेवेति वदन्ति । श्रीरङ्गनाथ-नामोच्चारणं नरकपातभीतिं प्रशयमयतीति -

रमादयित रङ्गभूरमण! कृष्ण! विष्णो!
हरे! त्रिविक्रम! जनार्दन! त्रियुगनाथ! नारायण!
इतीव शुभदानि यः पठति नामधेयानि
तेन तस्य यमवश्यता नरकपातभीतिः कुतः?।।

(अभीतिस्तवे -७)

श्रीरङ्गनाथस्मरणमेव यमपुरिनिवारणमिति तन्नामजन्तूनां शुभदमिति उपदेक्ष्यन्ति। न्यासतिलके -

प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन्
हस्तः श्रीरङ्गभर्तुर्मामव्यादभयमुद्रितः।
श्रीमानशेषजनसंग्रहणाय शेते
रङ्गे भुजङ्गशयने समहाभुजङ्गः।। ६ ।।
रङ्गास्तीर्णभुजङ्गपुङ्गववपुः पर्यङ्कवर्यं गतौ
सर्गस्थित्यवासनकेलिरसिकौ तौ दम्पती नः पती।
नाभीपङ्कजशायिनश्रुतिसुखैरन्योन्यबद्धस्मितौ
डिम्बस्याम्बुजसंभवस्य वचनैरोंतत्सदितित्यादिभिः।। ७ ।।

अत्रस्थे श्लोके श्रीरङ्गनाथं नयनमहश्छटा सुधां तरङ्गयेति प्रार्थयन्ति। यथा-

घनकरुणारसौघभरितां परितापहरां
नयनमहश्छटां मयि तरङ्गय रङ्गपते।
दुरितहुताशनस्फुरितदुर्दमदुःखमषीमलिनित-

विश्वसौधदुरपन्हववर्णसुधाम्।।

अथ श्रीरङ्नाथे देवतासार्वभौमे श्रीरङ्गे तिष्ठति कथमन्यान् परिमितफलदाकृतीन् शरणं भजाम इति देवतान्तरभजनं निवारयन्ति।

त्वयि सति रङ्गधुर्य शरणागतकामदुधे
निरुपाधिकप्रवाहकरुणापरिणाहवति।
परिमितदेशकालफलदान् फलदाकृतिकान्
कथमधिकुर्महे ! विधिशिवप्रमुखानमुकान्।।

गोदास्तुतौ श्रीरङ्गनाथं वर्णयन्तः देशिकाचार्याः श्रीरङ्गनाथस्य गोदादेव्यां महती काप्यनिर्वचनीया प्रीतिः भवतीति, अत एव कटाक्षाः तस्यां देव्यां निहिता इति चमत्कारशब्दैः व्यञ्जयन्ति-

दिग्दक्षिणाऽपि परिपक्त्रिमपुण्यलभ्यात्
सर्वोत्तरा भवति देवि तवावतारात्।
यत्रैव रङ्गपतिना बहुमानपूर्वं
निद्रालुनाऽपि नियतं निहिताः कटाक्षाः।।

गोदाश्रीरङ्गनायकयोः महत्तरमनिर्वाच्यगाढानुबन्धं जीवपरमात्मनोः पतिपत्नीभावमलौकिकभावमाविष्करोतीति ज्ञापयन्ति।

रङ्गेश्वरस्य तव च प्रणयानुबन्धा-
दन्योन्यमाल्यपरिवृत्तिमभिष्टुवन्तः।
वाचालयन्ति वसुधे रसिकास्त्रिलोकीं
न्यूनाधिकत्वसमताविषयैर्विवादैः।।

वेदान्ताचार्याणां गोदादेव्यां महती भक्तिः स्तोत्रेऽस्मिन् परिदृश्यते। गोदादेवी श्रीरङ्गनाथस्य प्रेयसी बभूवेति, तत्रापि भगवद्रामानुजाचार्याणां प्रीतिपात्रेति महान् गौरवातिशयः। एते महानुभावाः न केवलं श्रीरङ्गं, रङ्गनाथमेव स्तुवन्ति, अपि तु श्रीरङ्गनाथपादुकामपि प्रार्थितवन्तः। श्रीरङ्गनाथस्य दिव्यपादुकामुद्दिश्य अनितरसाध्यं पादुकासहस्रनामस्तोत्रं विरचयामासुः। एकास्यामेव निशायां इदं स्तोत्रं समर्पयामासुरिति प्रामाणिकानामभिप्रायः। एतेषां पादुकासहस्रं न केवलं

श्रीवैष्णवभक्तिसाहित्यम्, अपि तु संस्कृतवाङ्मयेऽपि विशिष्टस्थान-मभजत्। अस्मिन् स्तोत्रे कवित्वसामग्री नितरां चकासते। रसाविष्करणं, शब्दगुम्फनशैली, वृत्तिविन्यासः, नानाविधवृत्तबन्धानि, महाकाव्य-लक्षणोपेतानि भक्तान् साहित्यमर्मज्ञान् अलौकिकब्रह्मानुभवरसज्ञान् गुञ्जयन्ति।

सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः।
जयन्ति भुवनत्राणपदपङ्कजरेणवः।।
(पादुकासहस्रम्-प्रस्तावपद्धतिः-१)

भक्तिभाजां प्रथमोदाहरणाय भरताय प्रणमन् श्रीरङ्गनाथदिव्यापदुका-स्वरूपभूतं श्रीशठारिमुनितल्लजं प्रणमन्ति। यथा - "पादुके रङ्गभर्तृस्त्वन्नामानं मुनिमिहभजे त्वामहं स्तोतुकामः।।" श्रीरङ्गनाथ पादुकाप्रभावमर्मज्ञान् प्राचेतसप्रभृतीन् धन्यान् प्रणमन्ति-

"प्राचेतसप्रभृतिभिः प्रथमोपगीतं
स्तोष्यामि रङ्गपतिपादुकयोर्युगं तत्।।" ५ ।।

शठकोपमुनिः श्रीरङ्गनाथदिव्यपादुकारूपमभजत् इति वैदिकसार्वभौमाः वदन्ति। अत एव भगवदालये भगवत्पादुकायुगळं शिरसि अनुगृण्हन्ति। तत्पादुकायुगळस्य शठारीति नाम्ना व्यवहारः सुप्रसिद्धः एव।

शठकोप इति समाख्या तव रङ्गधुरीणपादुके युक्ता।
सूते सहस्रमेवं सूक्तीः स्वयमेव यन्मया भवति।।

अतः शठकोपमुनयः श्रीरङ्गपादुकाभूताः इत्यनुभवन्ति। अथ पादुकासहस्रे प्रभवपद्धतौ देशिकाः श्रीरङ्गनाथपादुकाप्रभावं वक्तुं कः समर्थः भवति? श्रीरङ्गनाथपादुकाप्रभावः विचित्रः परमानन्दपूर्णः भवतीति ज्ञापयन्तः, अत्र पादुकाप्रभावरचनवेलायां सामग्रीं सूचयन्ति-

निश्शेषमम्बरतलं यदि पत्रिका स्यात्
सप्तार्णवी यदि समेत्य मषी भवत्री।
वक्त्रा सहस्रवदनः पुरुषः स्वयं चेत्
लिख्येत रङ्गपतिपादुकयोः प्रभावः।।
वन्दे तद्रङ्गनाथस्य मान्यं पादुकयोर्युगम्।

उन्नतानामवनतिः नतानां यत्र चोन्नतिः।।

एवमेव -

अधियौवतमापतत्सु कल्पेष्वधिकारं भजतां पितामहानाम्।
अभिरक्षतु रङ्गभर्तुरेषा करुणा काचन पादुकामयी नः।।
(पादुकासहस्रे प्रभावपद्धतिः ३४)

इति सर्वेषां पितामहादीनां गतागतकालेषु श्रीरङ्गभर्तुः पादुके शरणप्राये इति वर्णितवन्तः। तथा च भरताय योगक्षेमं प्रसादयन् भगवान् श्रीरामः पादुकायुगळमनुगृहीतवान्। तच्चास्माकमपि परित्राणमेवोपकल्पयत्विति प्रार्थयन्ति। तच्चात्र श्रीरङ्गनाथपादुकायुगलमिति पूर्वाचार्यैः प्रख्यापित-मिति शरणं भजन्ते।

यद्भ्रात्रे भरताय रङ्गपतिना रामत्वमातस्थुषा
नित्योपास्यनिजाङ्घ्रिनिष्क्रियतया निश्चित्य विश्राणितम्।
योगक्षेमवहं समस्तजगतां यद्गीतये योगिभिः
पादत्राणमिदं मितंपचकथामघ्नाय मे निह्नुताम्।।
(पादुकासहस्रे समर्पणपद्धतिः १९)

इति बहुधा श्रीरङ्गनाथदेवस्य पादुकाप्रभावमन्वभन्। एवमेव रत्न-सामान्यपद्धतौ -

रत्नोपलप्रकारसंभव एष दूरात्
रङ्गाधिराजचरणावनि तावकीनः।
आर्द्रापराधपरिखिन्नधियां प्रजाना-
माश्वसनार्थ इव भाति करप्रसारः।।

आर्द्रापराधपरिखिन्नधियां प्रजानामाश्वासनार्थं श्रीरङ्गनाथमणिपादुका स्वकरकिरणं प्रसारयति इति चमत्कारजन्यवाक्यानि काव्योक्तर्षकराणि निक्षिपन्ति। निर्वेदपद्धतौ तत्रभवद्भिः देशिकसार्वभौमैः श्रीमद्रङ्गेश्वर-चरणकमलसेवको भवेयमिति यमपरिषदः घोषं यथा नाहमाकर्णयेयं तथा कुरु इति पादुकां विज्ञापयन्ति।

कालेजन्तून्कलुषकरणे क्षिप्रमाकारयन्त्या
घोरं नाहं यमपरिषदो घोषमाकर्णयेयम्।

श्रीमद्रङ्गेशवरचरणयोरन्तरङ्गैः प्रयुक्तं
सेवाह्वानं सपदि शृणुयां पदुकासेवकेति।। (९६९)

इत्थं वेदान्तदेशिकाः बाल्यात्प्रभृति श्रीरङ्गनाथपरिचर्यामेवाभिलषन्तः परमवैराग्यभूषिताः श्रीरङ्गनाथात् परं तस्य पादौ ततोऽपि पादुकायुगळं सहस्रसंख्याकैः हृद्यानवद्यपद्यकलितसुकवितागुणभोग्यपरीमळतुलसीदळैः स्तुवन्ति स्म। श्रीरङ्गं, कावेरीनदीं, श्रीरङ्गनाथं, श्रीरङ्गपरिषदः, श्रीरङ्गसार्वभौमत्वं, श्रीरङ्गवासं, श्रीरङ्गनायकीं, श्रीरङ्गदासान्, भक्तान्, गुणान्, गोपुरान्, सर्वानपि वर्णयन्तः श्रीरङ्गरसमाविश्चक्रुः । शताधिकग्रन्थकर्तारः महाप्रभावशालिनः एते भगवद्रामानुजाचार्यसिद्धान्तस्थापनायैवावतीर्णाः श्रीपराशरभट्टार्याणां एकलव्यशिष्यतामभजन् स्ववेदान्तग्रन्थेषु श्रीपराशरार्याणां अप्रकाशितग्रन्थानां वाक्यविवरणानि व्याख्यानानि उट्टङ्कयन्तः भक्तिभावमाविष्कृतवन्तः श्रीपराशरभट्टारकान् वारं वारं प्रणमेमुः। अत एवार्वाचीनापि श्रीपराशरभट्टार्येभ्यः एतानत्र महाप्राकारे स्मरणं युक्तं भवतीति एतेषां श्रीरङ्गनाथविषयानुभवः श्रीपरशरभट्टपादानां प्रभावादपि जात इति कृत्वा किञ्चिदेव सौरभमन्वभवाम। एवंरीत्या पितामहात् प्रभृति दिव्यसूरिपर्यन्तबृन्दाः श्रीरङ्गनाथमहिमानं बहुधा संकीर्तितवन्तः। श्रीरङ्गमहाक्षेत्रे सञ्जाताः श्रीरामानुजप्रियान्तेवासिनः श्रीरङ्गनाथप्रसादमहिम्ना लब्धावताराः स्वामिनः दत्तपुत्राः भगवद्रामानुजेनैवानुगृहीतश्रीपराशरदिव्यनामानः भट्टाचार्याः श्रीरङ्गहृदयमर्मज्ञाः भूत्वा सकलवेदोपनिषत्सारभूतं हरिनामसंकीर्तनं नारायणतत्त्वं द्रविडाम्नायविवरणभूतं मन्त्रसारं द्वयमन्त्रविवरणञ्च सकलपूर्वाचार्यसूक्त्यविरोधेन "श्रीरङ्गनाथदिव्यचरणाविन्दयुगळं शरणं भजन्तः तस्यैव चरणौ उपायोपेयरूपेण प्रतिपादयामासुः। तस्य चरणसेवा जीवानां स्वरूपसिध्यर्थं समाश्रयणीयेति तामेव पूर्वाचार्यानुग्रहप्राप्तां काङ्क्षयामासुः। तेन श्रीरङ्गराजस्तवं समर्पितवन्तः। श्रीरङ्गेशपुरोहिताः एते भगवद्रामानुजाचार्याणां गद्यानुसारं श्रीरङ्गे सुखमास्वेति कृत्वा श्रीरङ्गराजास्थाने ब्रह्मरथमारूढा श्रीरङ्गनाथदिव्यचरणारविन्दयुगळं

स्मरन्तः स्वाचार्यपदमलङ्कृताः। इत्थं प्राकारेऽस्मिन् श्रीरङ्गमहाक्षेत्र-प्रभावः श्रीरङ्गराजेन महाभागवतानाम् अनुभवः, तदनुभवजनितप्रीतनतां श्रीपराशरभट्टार्याणां श्रीरङ्गनाथेनानुभवः निरूपितः।

इत्थं श्रीरङ्गराजस्तवसमीक्षात्मकाध्ययने श्रीरङ्गक्षेत्रज्ञानम्, मन्दिर-गोपुर-मण्टप-निर्माणकालज्ञानं श्रीरङ्गक्षेत्रभौगोळिकं विज्ञानं चारित्रकमितिहासप्रमाणं श्रीरङ्गभक्तकविजनरचनाः तासां च ज्ञानं परमावश्यकमिति धिया समारब्धेऽस्मिन् प्राकारे आङ्ग्लशासकानां परिकल्पना परिणामश्च ज्ञेया इति विविधविषयानां प्रस्तावाः अत्र संगृहीताः।।

"कावेरी वर्धतां काले काले वर्षतु वासवः।
श्रीरङ्गनाथो जयतु श्रीरङ्गश्रीश्च वर्धताम्।।"

❖ ❖ ❖



ABOUT AUTHOR

Dr Maringati Tirumazisai ALWAR, born in Machilipatnam (A.P.) in 01-6-1954, as the second son of U.Ve.Sriman M. Srinivasa charyulu and Smt. Lakshmamma.

He was educated traditionally in Sri Venkatesvara Vedapathasala and S.V. Oriental College, Tirupati from 1967 to 1977, he also obtained M.A. Degree from Andhra University, Waltair, in 1982 and awarded Ph. D. (Visistadvaita) from Rastriya samskrita Vidyapeeth, Tirupati in 1999. Employed as a Lecturer in Sanskrit in A.P.R.E.I. Society Institutions since 20 years. He is well known to the Public by his frequent Radio-talks and Discourses in Vedantic topics. He is honoured by so many Pithadhipati-s. He has more than 30 articlesfor his credit and published them in different Standard Journals. Presently the author honours the Sanskrit Society by publishing his thesis.